Barcode : 99999990252888
Title - -
Author - ,
Language - sanskrit
Pages - 152
Publication Year - 1918
Barcode EAN.UCC-13

॥ श्रीः ॥

शुद्धि सिद्धान्तपञ्जिकान्तर्गता

शौच-पञ्जिका

जयपुर-राजसभा-प्रधानपण्डितेन विद्यावाचस्पतिना

श्रीमधुसूदनशर्ममैथिलेन

नानाविधधर्मशास्त्रनिबन्धतत्त्वानुसंधानपुरस्सरं

सगुपनिबद्धा

सेयं

श्रीसूर्यनारायणशर्मणाऽऽचार्येण

श्रीगोस्वामिव्रजनाथशर्मणः

कारोनेशननाम्नि यन्त्रालये खुर्जनपुरे (आगरा)

मुद्रापयित्वा

प्राकाश्यं नीता

प्रथमावृत्तिः ५००	संवत् १९७५	मूल्यमेकं रूप्यम्

प्राप्तिस्थानम्—श्रीसूर्यनारायणशर्मा, आचार्य, पुरानी बस्ती, घड़का कूआ, जयपुर ।

॥ श्रीः ॥

शुद्धि-सिद्धान्तपञ्जिकान्तर्गता-

शौचाशौच—पङ्क्तिपावना

जयपुर-राजसभा-प्रधानपण्डितेन विद्यावाचस्पतिना

श्रीमधुसूदनशर्ममैथिलेन

नानाविधधर्मशास्त्रनिबन्धसत्त्वानुसंधानपुरस्सरं

समुपनिबद्धा

सेयं

श्रीसूर्यनारायणशर्मणाऽऽचार्येण

श्रीगोस्वामिब्रजनाथशर्मणः

कार्यनेशनलास्त्रि यन्त्रालये सुधापुरे (सागरा)

मुद्रापयित्वा

प्रकाश्यं नीता

प्रथमावृत्तिः
५००

संवत् १९७६

मूल्यमेकंरूप्यम्

धर्मशास्त्र का नूतन निबन्ध।

'आशौच पञ्जिका'

वर्तमान में जनता जो धर्म पर से हटती जारही है, उसके मुख्य दो कारण हैं— अज्ञान और अविश्वास। बहुधा श्रद्धालु होने पर भी मनुष्य धर्म की बहुत सी बातें जानते ही नहीं, तब वे शास्त्रानुसार आचरण कैसे करें? वर्तमान समय में विद्याप्रचार बहुत स्वल्प है, और हमारे धर्मशास्त्रों के निबन्धों की विचार-शैली ऐसी जटिल है कि साधारण विद्वान् भी उनका ठीक आशय नहीं समझ सकते— अल्प शिक्षितों और अशिक्षितों की तो बात ही क्या! उक्त सभय स्मृति-वचनों पर वैसी मीमांसा की आवश्यकता थी, विरुद्ध वचनों की व्यवस्था बताना आवश्यक था, इसलिये वैसे निबन्ध लिखे गये थे; किन्तु आज बहुत लोग मीमांसा के शास्त्रार्थ जानना नहीं चाहते, वे थोड़े में सिद्धान्त की बात समझ लेना चाहते हैं। वैसे ग्रन्थ हमारे यहां उपस्थित नहीं। बड़े २ विद्वानों से पूछ कर ही सदा निर्णय करना भी इस समय के लोगों की रुचि के प्रतिकूल है; न सर्वत्र ऐसे विद्वान् मिलते ही हैं। इससे सर्व साधारण धर्म के सिद्धान्तों से बहुधा अनभिज्ञ ही रहते हैं और अज्ञान-वश बहुत सी धर्म-विरुद्ध क्रियाएँ उनके द्वारा होती हैं।

दूसरी बात यह कि केवल वचनमात्र पर आजकल के शिक्षितों का विश्वास नहीं होता। वे धर्म के प्रत्येक अङ्ग की युक्तिपूर्वक असलियत जानना चाहते हैं, जो कि सामयिक-रुचि के अनुकूल हमारे धर्म-निबन्धों मे नहीं मिलती। और यों सर्वसाधारण का विश्वास क्रमशः विचलित होता जाता है। अतः धर्मरक्षक विद्वानों का समयानुकूल ग्रन्थ प्रस्तुत करना, इस समय प्रधान कर्तव्य है—इसमें कोई सन्देह नहीं।

जयपुर राज्य के प्रधान पण्डित—न केवल भारत में, किन्तु पाश्चात्य संस्कृत विद्वानों में भी प्रसिद्धि प्राप्त—विद्या-वाचस्पति श्री मधुसूदनजी ओझा ने सब शास्त्रों के रहस्य-बोधक समयानुकूल बहुत से ग्रन्थों का निर्माण किया है और कर रहे हैं। वेद, पुराण, दर्शन आदि की तरह धर्मशास्त्र के भी पूर्वोक्त प्रकार के समयानुकूल कई ग्रन्थ आपने बनाये हैं। उनमें से यह आशौचपञ्जिका सर्वसाधारण के लाभार्थ प्रकाशित की

जाती है। सम्बन्ध में मृत्यु अथवा जन्म होने पर कुछ काल के लिये कुटुम्बी अशुचि (अपवित्र) हो जाते हैं—जिसे कि सूतक, पातक, या आशौच शब्द से पुकारते हैं। इसका धर्मशास्त्रों में बड़ा विवेचन है। और प्रायः सब को ही इसके ज्ञान की आवश्यकता पड़ती है। किस को किस मौक़े पर कितना आशौच है, और उसमें क्या २ करना व क्या २ न करना चाहिये इसके ठीक ज्ञान के विना या तो सर्व-साधारण मनमाना शास्त्रविरुद्ध आचरण कर पाप-भागी बनते हैं— या पण्डितों के घर दौड़ते फिरते हैं। इस कठिनता को यह ग्रन्थ मिटा देगा। इसके आरम्भ में आशौच क्या वस्तु है, सपिण्ड किसे कहते हैं, किसी की मृत्यु या जन्म पर कुटुम्बियों में क्यों अपवित्रता होती है—इत्यादि बातों को शास्त्र-रहस्य बतलाते हुए वैज्ञानिक युक्तियों से समझाया गया है—जैसा कि अद्भुत विवेचन प्रायः पाठक अन्यत्र नहीं देख सकते। प्रसङ्गागत-विवाह सापिण्ड्य की भी विवेचना हुई है, और कितना सम्बन्ध विवाह में छोड़ना यह स्पष्ट किया है। आगे के अध्यायों में आशौच का विषय ऐसी सरल संस्कृत भाषा में लिख दिया है कि जैसा अवसर है। वह अनुक्रमणिका में देख कर साधारण संस्कृतज्ञ भी अनायास कर्तव्य की व्यवस्था समझ सकते हैं। शास्त्रार्थ छोड़ कर केवल सिद्धान्त स्पष्ट समझा दिया है और वचन संग्रह आगे प्रथक् दे दिया है। विशेषता यह कि हरएक बात को नक़्शे दे देकर बड़ी सुस्पष्टता से समझाया है। हम इस पुस्तक की प्रशंसा करना नहीं चाहते; पाठक देख कर ही समझ सकेंगे कि सरलता से शास्त्र-रहस्य बताने की यह बिलकुल नई परिपाटी है। और ऐसे ग्रन्थों की वर्तमान समय में अत्यन्त आवश्यकता है। यदि इस ग्रन्थ का लोक में आदर हुआ तो श्रोझाजी के अन्यान्य उपयोगी ग्रन्थ भी शीघ्र प्रकाशित किये जायँगे। यह पुस्तक नीचे लिखे पते पर १) मूल्य में प्राप्त होगी।

पं० श्री सूर्यनारायण आचार्य,
पुरानी बस्ती, बड़ का कुआ
जयपुरसिटी।

॥ भूमिका ॥

कर्मभूमित्वेन शास्त्रेषु वर्णितेऽस्मिन्नस्माकं भारते वर्षे सृष्टिकालादारभ्यैव धर्मस्य प्राधान्यमस्ति। धर्मश्च सोपपत्तिकोऽपि सूक्ष्मोपपत्तिकत्वाद् दुर्ज्ञेय इति तन्निर्णयार्थं श्रुति-स्मृति-सदाचारानेव मूलत्वेन समाश्रयन्ते श्रद्धालवो भारतीयाः। परं श्रुतयः स्मृतयश्चापि देशकालपात्रभेदेन विभिन्नान् धर्मान् प्रतिपादयन्त्यो दृश्यन्ते। ततश्च 'केन, कदा कौ धर्मपक्षौ आश्रयितव्यौ' इति विशेषज्ञानार्थं तेषु तेषु धर्मविषयेषु तत्तद्विद्वद्भिर्निर्मिता विविधा व्यवस्थापकग्रन्था अपि समवलोक्यन्ते। यद्यपि ते सर्वेऽपि ग्रन्थाः श्रुतिस्मृतिमूलकत्वात्, समुचितप्रकारेण शास्त्रीयवचनानां व्यवस्थाकारकत्वाच्च धर्मनिर्णयविषयेऽत्यन्तं प्रमाणभूतास्तथापि तेषु खण्डनमण्डनात्मकदुरूहतर्कस्य समाश्रितत्वेन न तेभ्यः सुखेन धर्मविषयनिर्णयं कर्तुं प्रभवेत्साधारणो विद्वानिति धर्मतत्त्वं जिज्ञासमानानां लोकानां सुखावबोधार्थं विद्यावाचस्पतिश्रीमधुसूदनशर्ममहाशयैरनेके धर्मविषयका ग्रन्था निर्मिता निर्मीयन्ते च। तेष्वन्यतमेयमाशौच-पञ्जिकाऽद्यविद्वज्जनानां सेवायां समुपस्थाप्यते। एतस्यामाशौचविषये संभावितानां सर्वेषां भेदानां, संबन्धभेदेन भिन्नतामुपगच्छतोऽशौचकालस्य च विनिर्णयस्तु प्राचीनग्रन्थानामाधारेण शास्त्रार्थांशं परित्यज्य सिद्धान्तमात्रबोधनेन सरलतया क्रमबद्धतया च कृत एव, परंवर्तमानकाले तर्केण धर्मतत्त्वं बुभुत्सूनां नूतनपरिपाटीपरिष्कृतचेतसां लोकानां संदेहविनिवृत्तिपूर्वकमशौचोपपत्तिपरिज्ञानार्थमपि कृतः प्रयत्नः। अर्थादेतस्यां 'किं नामाशौचम्? कुतस्तत्संभवः? कस्माच्च संबन्धभेदेन तत्र तारतम्यम्? इत्यादयो विषया अपि सर्वमान्येन युक्तिवादेन, शास्त्रीयप्रमाणप्रदर्शनेन, धर्मशास्त्रीयव्यवस्थाग्रन्थानां संयोजनेन च सम्यक्तया विवेचिताः। समुचितान् कोष्ठान् विरचय्य तद्द्वारा सापिण्ड्यादयः सूक्ष्मा विषयास्तथा स्पष्टीकृताः, यथा साधारणप्रज्ञोऽपि जनो विनैव विशेषाऽऽयासेन तांस्तान् विषयान् याथार्थ्येन बोद्धुं प्रभवेत्। किमत्र बहुनोक्तेन, विद्वांसो जनाः स्वयमेव ग्रन्थमेनमालोक्यास्योपयोगितां विनिश्चिनुयुः। अस्माकं मतेन, विद्यावाचस्पतिमहोदयैर्लोकोपकारबुद्धया विनिर्मितोऽयं ग्रन्थ आशौचविषयेऽद्वितीयः परमोपयोगी चेति सर्वेऽपि धर्मनिर्णयकाङ्क्षिण आशौचतत्त्वपरिज्ञानार्थं ग्रन्थमेतमुपयुञ्जीरन्निति सुहृदमाशास्महे।

निवेदकः

प्रकाशकः

श्रीः ।

विषयसूचिः

अध्याय-संख्या	अधिकार-संख्या	विषयाः	पृष्ठ-संख्या
१		परिभाषाध्यायः—	१
	१	शास्त्रसंग्रहः	१
	२	प्रसिद्धा (शुद्धि-संस्कारादिस्वरूपम्)	२
	३	आशीःस्वरूपम्	३
	४	आशीर्विशेषाः (आशीर्वनिमित्तानि, स्पर्शाशीर्षादिभेदाश्च)	४
	५	विशेषाश्रयाः(कस्य कस्य सम्बन्धिनः कुत्र कुत्र कीदृश-आशीर्षम्)	५
	६	स्पर्शास्पर्शव्यवस्था (आशीषि कस्य कियन्तं कालमस्पृश्यत्वम्)	६
	७	कर्त्तव्याकर्त्तव्यव्यवस्था (आशीषि किं किं न कार्यम्)	७
	८	आशीर्धारम्भहेतवः	१०
	९	आशीर्धारम्भकालः (मध्यरात्र–सूर्योदयादिमतभेदः)	१०
	१०	आशीर्वनिवृत्तिहेतवः (कैन कैन निमित्तेन आशीर्षं नास्ती-त्यादि)	११
	११	शुद्धिधीरम्	१२
२		सूत्राध्यायः—	१४
	१२	प्रभवचिन्ता (अशुचिरयोपपत्तिः)	१४
	१३	सम्बन्धसूत्रम् (,,)	१७
	१४	योनिसम्बन्धाः(,,)	१७
		(गोत्रमेकः, सगोत्रमेकश्च)	
		(सपिण्डमेकः, सापिण्ड्यमेकर्षा)	

अध्याय-संख्या	अधिकार-संख्या	विषयाः	पृष्ठ-संख्या
	१५	योनिसम्बन्धप्रभेदाः	२०
	१६	विवाहसापिण्ड्यम्	२१
		(पितृ-मातृ-पक्ष्य-द्वन्द्व-मेरुः)	
		(गन्तर्निद्वन्द्व-प्रदर्शन-मेरुः)	
	१७	दायसापिण्ड्यम्	२७
		(कक्षामेरुः)	
	१८	आशौचसापिण्ड्यम् (शरीरारम्भकक्लारहस्यम्)	२९
	१९	पिण्डरहस्यम् (आशौचस्य मुख्योपपत्तिः)	३०
	२०	विद्यार्त्विज्यसम्बन्धौ	३९
	२१	प्रेतसंसर्गः	३९
	२२	खननदाहौ	३९
	२३	उदकदानम्	४०
	२४	निमित्तिसंसर्गः	४०
	२५	आशौचतादात्म्यम् (तारतम्यरहस्यम्)	४०
३		जन्माध्यायः	४२
	२६	सूतिकाया गर्भस्रावे पाते प्रसवे च आशौचम्	४२
	२७	सूतिकापितृकुले आशौचम्	
		(१) पितुर्गृहे प्रसवादौ	४४
		(२) पतिगृहे प्रसवादौ	४५
	२८	सूतिकाभर्तुराशौचम्	
		(१) मुख्यभार्यायाः प्रसवादौ	४५
		(२) परपूर्वायाःपरंगत्वाद्या वा भार्यायाः प्रसवादौ	४६
	२९	सूतिकाभर्तृकुले आशौचम्	४७
		(१) दत्तकादनाम्	५८
	३०	सूतिकासंसर्गे सपिण्डानां-भर्तुश्चाशौचम्	४८

अध्याय-संख्या	अधिकार-संख्या	विषयः	पृष्ठ-संख्या
४		मरणाध्यायः—	४९
	३१	पुरुषशौचाधिकारः	४९
		(१) ब्राह्मणादीनां सामान्येन नियमाः	४९
		(२) दन्तजननात्प्राग्बालमरणे पित्रादीनां विकल्पाः	५१
		(३) षड्विंशान्मासात्प्राग् बालस्य खननदहनयोर्नियमाः	५२
		(४) तृतीयाद्वर्षात्कृतचूडस्याकृतचूडस्य च नियमाः	५३
		(५) अष्टमाब्दादुपनीतानुपनीतयोर्विकल्पः	५४
		(६) प्रौढ़ानां मृतानामाशौचम्	५५
		(७) शूद्रबालकानां पृथगादेशः	५७
	३२	स्त्रीशौचाधिकारः	
		(१) मातापित्रोर्मरणे पत्यादीनाम्	५९
		(२) कन्यामरणे पित्रादीनाम्	५९
		(३) भार्यामरणे पत्यादीनाम्	६०
		(४) परपूर्वायां भार्यायां मरणे	६०
	३३	विगोत्राधिकारः	
		(१) भगिनी-मातुल-मातृष्वसृ-श्वशुरादीनां विगोत्राणां योनिसम्बन्धिनामाशौचम्	६१
		(२) गुरुशिष्यादीनां परस्परमाशौचम्	६३
	३४	संसर्गाशौचाधिकारः	६३
		(१) मित्रमरणे	६३
		(२) श्रोत्रियादिमृतौ स्वगृहेऽन्यमरणे च	६३
		(३) ऋत्विगादिमरणे	६४
		(४) महाराजमरणे	६४
		(५) अशौचिनामन्नभोजनादौ	६४

अध्याय-संख्या	अधिकार-संख्या	विषयाः	पृष्ठ-संख्या
५		उत्तरक्रियाध्यायः—	६५
	३५	रोदने आशौचम्	६५
	३६	स्पर्शने	६५
		(१) असज्ञातीयशवस्पर्शे	६६
	३७	अलङ्करणादौ	६६
	३८	अनुगमने	६६
	३९-४०	दहनवहनयोः	६६
		(१) भृत्यादिना विजातीयस्य वा	६७
	४१	अस्थिकृतिदहने पुत्र-सपिण्डादीनामाशौचम्	६७
	४२-४३	उदकदानपिण्डदानयोरशौचं प्रायश्चित्तं च	६८
६		दोषाशौचाध्यायः—	६८
	४४	संसर्गदोषान्नित्याशौचम्	६८
	४५	आत्मीयदोषान्नित्याशौचम्	६९
	४६	कालदोषाद् व्याप्याशौचम्	६९
	४७	रजस्वलाशुद्धिः	६९-७०
७		आशौचसङ्कराध्यायः (पानाध्यायः)	७०
	४८	गौडसम्प्रदायः	७०
		(१) संपातभेदाः	७१
		(२) सजातीयसंपाते व्यवस्थाः	७१
		(३) विजातीयसंपाते व्यवस्थाः	७२
	४९	द्राविडसम्प्रदायः	७३

अध्याय-संख्या	अधिकार-संख्या	विषयाः	पृष्ठ-संख्या
	५० फक्किकाधिकारः		७७
		(द्वित्राद्यशौचसम्पाते विशेषाभिधानम्)	
८		अतिक्रान्ताशौचाध्यायः—	७९
	५१ अन्तर्दशाहे श्रवणे		७९
	५२ दशाहानन्तरं जननश्रवणे		८०
	५३ खण्डाशौचे शावेऽतिक्रान्ते		८०
	५४ सदेशस्थशावाशौचे पूर्णे		८३
	(१) मरणमासादावज्ञाते		८५
	५५ विदेशस्थपूर्णशावाशौचम्		८१
	५६ देशान्तरलक्षणम्		८१
	(१) देशान्तरसम्बन्धे स्वीयमतम्		८२
९		आशौचापवादाध्यायः—	८५
	५७ कर्तृविशेषादाशौचाभावः		८५
	(१) ब्रह्मचारिणां यत्यादीनां चाशौचव्यवस्था		८५
	(२) आपत्काले		८७
	५८ कर्मविशेषादाशौचाभावः		८७
	(१) तीर्थे यज्ञविवाहादौ		८७
	(२) आगमोक्ते स्मार्ते वा कर्मणि		८८
	(३) आशौचे आद्धुपाते		८९
	(४) आशौचे सन्ध्यावन्दनम्		८९
	(५) भोजनकाले आशौचप्राप्तौ		९०

अध्याय-संख्या	अधिकार-संख्या	विषयः	पृष्ठ-संख्या
	५९	द्रव्यभेदाधिकारः	९०
		(१) अशौचिनः पण्याद्यस्तुग्रहणम्	९०
		(२) दध्यादिद्रव्यविशेषे	९१
		(३) विवाहादौ भोजने	९१
		(४) भोजनमध्ये आशौचप्राप्तौ	९१
	६०	अपमृत्युमरणादौ पातकिमरणादौ चाशौचाभावः	९२
	६१	वेदाग्निमदादिब्राह्मणादीनां वचनादाशौचाभावः	९३
		(१) कर्मविशेषेष्वेवायमपवादो न सर्वत्र	९४
		(२) नाड्यच्छेदात्प्राक् प्रतिग्रहादिकम्	९४
		(३) आशौचान्तरे सत्यपि पिण्डदानम्	९५
१०		प्रमाणसङ्ग्रहाध्यायः—	९७
	६२	स्मृतिसङ्ग्रहः	९७
	६३	नानामुनि-पुराणादि-वचनसङ्ग्रहः	१२६
	६४	निबन्धनामोल्लेखः	१२९

॥ इति ॥



शुद्धिपत्रम् ।

पृष्ठसं०	पङ्क्तिसं०	अशुद्धम्	शुद्धम्
५	१०	तन्नाधं	तन्नाद्यं
८	१९	कर्तव्यसा	कर्तव्यतया
१३	२४	नीपक्षेशनसमुखा	नीपक्षेशनरुग्रमसुखा
१५	२	पृथग्ग्रन्मनो	पृथग्ग्रन्मानो
१६	११	पेत्येत्रितयं	पेत्येतत्त्रितयं
	१६	पृष्ठे १३ पङ्क्तौ 'सत्वादारभ्य प्रकृत्तायांम्' इत्यादिः पृष्ठान्तः १४॥ पङ्क्त्यारभ्यैतेऽग्रेतनः पाठः प्रमादादि दापि पतितः, स इह न पाव्यः पाठकैः ।	
१७	१	च द्वौ दोषौ	सत्वे च द्वौ दोषौ
२३	२६	पितृमातामहप्रमातामहौ	पितृमातामहप्रमातामहौ
	२६	पृष्ठे १० पङ्क्त्यये त्रीणि त्रीणि पैदाणि क्रमेण एवं पाठ्यानि- जनकद्वन्द्वानां संख्या, प्रतिजनकद्वन्द्वं जन्यद्वन्द्वानां- जन्यद्वन्द्व संख्या समष्टि संख्या।	
२६	२५	मूलद्वन्दं	मूलद्वन्द्वं
२७	२७	तथतेषां	तथैतेषां
२८	१२	पितामहवर्गाः	पितामहवर्ग्याः
२९	१	प प्रत्यासन्नत्वात्	प प्रत्यासन्नत्वात्
२९	१४	मूलसपिण्डः	मूलपिण्डः
३१	२	सोमसयशुक्रनिवापं	सोमसयं शुक्रनिवापं
३१	२३	निवाप्य	निवाप्य-
३२	१२	तदतिरिक्ता स्वेकविंशति	तदतिरिक्तास्वेकविंशति-
३२	१४	प्रत्यर्पणार्थं	प्रपरदर्थे
३३	१	पुरुषोयमष्टाविंशति-	पुरुषो यमष्टाविंशति-
३३	२	पुनः कलान्तरेणा-	पुनः कालान्तरेणा-
३३	२१	प्रपितामहकणाः	प्रपितामहफलाः-
३४	१०	चनुरशीति-	चतुरशीति
३५	११	प्रपौत्र	प्रपौत्रे

३८	२४	पञ्चहुति-	पञ्चाहुति-
३९	१०	पः संबंधः	यः संबन्धः
३९	१०	सम्यधेन	संबन्धेन
३९	१३	ता तम्येन	तारतम्येन
४०	२	पत्र	यत्र
४०	२१	चापक्षते	चापेक्षते
४२	१८	वृद्धाशौचं	वृद्धयाशौचं
४२	२५	सप्तमादिषु	सप्तमादिषु
४३	२	तृतीयमस्थि	तृतीयमास्थेषु
४३	७	नासे	नासेषु

४३ पृष्ठान्ते प्रमादात्परित्यक्तोऽयं पाठोऽधिकः पाठ्यः—

'इदं त्वत्र बोध्यम् । द्विविधं तावत् चातुर्वर्ण्यस्य पूर्णाशौचंव्याख्यास्यामः—'शुद्धयेद्विप्रो दशाहेन द्वादशाहेन भूमिपः । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति' इत्येवं प्रतिवर्णनियताशौचं प्रातिस्विकमेकम् । "सर्वे वा स्युर्दशाहिनः" इत्येवं प्रत्याकृष्टाशौचं द्वितीयम् । तत्र येषां प्रातिस्विकाशौचं कुलाम्नायसिद्धं दृष्टं तेषामेव क्षत्रियवैश्यशूद्राणामिहापि गर्भस्राव-गर्भपातयोरुक्तरीत्या प्रातिस्विकाशौचं विधीयते । अथ येषां प्रत्याकृष्टाशौचिनां दशाहाशौचमेव 'पूर्णाशौचंकुलाचारप्राप्तंभवेत्, तेषामिहापि स्रावपातयोर्ब्राह्मणवदेवाशौचं नेयम् । पूर्णाशौचानुसारेणैवेहाप्याशौचप्रत्याकर्षात् ।

४४	८	निकृष्टशूद्रायाः	सामान्यतस्तु शूद्रायाः
४४	१४	(कोष्ठे) प्रत्यन्तस्त्रीणाम्	अन्त्यशूद्रस्त्रीणाम्
४६	५	परपूर्वायाः	परपूर्वायाः भार्यायाः

४६ पृष्ठे प्रकोष्ठके द्वितीये कोष्ठे 'स्पर्शाशौचम्' इति शीर्षके 'कन्याप्रसवे' इत्यादि पञ्चसाद्धासु पञ्चसु पङ्क्तिषु सचैलस्नानानुवृत्तिसूचकं ,, चिन्हं प्रमादात्पतितम्, न तत्रोचितम् ।

४७	१९	स्ना—	स्नान—
४८	१२	स्याद्यस्य	स्याद्यस्य
४८	१७	निमित्ताना—	निमित्तिना

५८	२३	शशिरसाङ्कीर्वी (१९६१)	नगरसांङ्कीर्वी (१९६७)
५०	६	पद्-	पड
५०	१०	व्रतघन्धान्तम् ।	व्रतघन्धान्तं वा नयाहम्।
५०	१३	चतुविंशमास-	चतुर्विंशमास-
५०	१५	(कोष्ठि) ७६	७६-
५५	१९	रून्धनानां	रून्धानानां
५७	२	गायत्र्यं	गायत्र्या
५७	२	त्रिष्टभा	त्रिष्टुभा
५७	८	ब्राह्मादिवर्णा-	तस्मादेवं ब्राह्मणादिवर्णा-
५७	१५	निरवांसिताः	निरवसिताः
५७	१६	वान्त्यजात्यावसायि	वान्त्यजान्त्यावसायि
५७	१६	भेदश्चतुर्था	भेदैश्चतुर्था
५८	८	विशेणाशौच-	विशेदेणाशौच-
५९	२४	यमात्रेय	वैमात्रेय
६०	८	मसर्णानां	वर्णानां
६०	९	वरणे	मरणे
६१	१	तत्र । योनि-	तत्रयोनि-
६१	४	३७	३
६१	११	पैतृष्वस्त्रीय	पैतृष्यस्त्रीय
६१	११	पङ्क्तघन्ते मातुलपुत्रस्येत्यधिकम् ।	
६१	२४	निर्गेण	निर्गुण
६२	५	पैतेत्रेधा	पैते त्रेधा
६२	७	पुत्री	पुत्रो
६२	७	मातुश्वसुः	मातुःष्वसुः
६२	९	मातामहभगिनीपुत्र	इत्यनन्तरं मातामही भगिनीपुत्र इत्यपि पाठ्यम् ।
६२	१६	सपिण्डकुलाग्रहीतरय	सपिण्डकुलाद्गृहीतस्य
६४	१०	यात्तेषां	यावत्तेषां
६४	१५	नाङ्गासन्न	न्धिनाङ्गासन्न

६४	१६	ज्यते	भज्यते
६६	५	कृच्छ्रम्	कृच्छ्रम्
६६	५	दुपवासः	दुपवासः
६६	२१	स्नेहेन वा	स्नेहेनास्नेहेन वा
७७	२४	द्वितीये	तृतीये

७१ पृष्ठे १० पङ्क्तिक्रमनन्तरं पूर्वं 'तत्रादौ सजातीयाधिकरणमिति पठित्वा तदनन्तरं 'पूर्वाशौचप्रथमदिने' इत्यादि २०५ अङ्काङ्कितमधिकरणं पाठ्यम् ।

७२	१०	सर्जातीये पूर्वोखण्डे	सजातीये खण्डे
७२	२२	स्वप्रसवनित्त—	स्वप्रसवनिमित्त—
७३	१२	क्रिया शौचाध्याये	क्रियाशौचाध्याये
७३	१६	वहित्वा	वहनं कृत्वा
७४	११	त्र्यहादिपूर्णसूतकपाते	त्र्यहादिशावे दश-त्र्हादिपूर्णसूतकपाते
७४	२८	पुत्रभार्याश्चासपिण्डा—	पुत्रभार्याश्च सपिण्डा—
७६	१६	अन्त्यान्त्यरात्रे—	अथान्त्यरात्रे—
७९	६-७	निर्दशग्रहाधिकारः	निर्दशाधिकारः
७९	७	स्वदेशस्थपूर्ण	सदेशस्थपूर्ण
७९	१६	पर्णाशौचे	पूर्णाशौचे
८०	२८	कान्यायां	कन्यायाः
८२	२	अत्वारिंत्	अत्वारिंशत्

८३ पृष्ठे ११ पङ्क्तिक्रमनन्तरः ८५ पृष्ठे १५ पङ्क्तिक्रमन्तः पाठ, सदेशस्थपूर्णशावाधिकारस्वरूपः, अतिक्रान्ताध्यायसङ्गतिश्लोकात् पूर्वं ८३ पृष्ठस्य ६ पङ्क्तिक्रमनन्तरं पाठ्यः ।

८३	२३	त्रिरात्रम् । पुत्रस्य	त्रिरात्रं पुत्रस्य
८५	२७	स्वास्थ्यलाभा—	स्वास्थ्यालाभा—
८६	८	स्पर्शाच्च	स्पर्शाशौच
८६	२४	आगृहीत—	प्रागृहीत—
८७	२४	यादिश्रवण—	यणादिश्रवण—

९०	१	नकुर्याद्ध ।	न कुर्याद्धा ।
९०	७	राजाद्धासंधने	राजाद्धासाधने
९२	२४	दर्पकृते च मृत्युकृते च	दर्पकृते च
९३	२२	ब्राह्मणाद्यु वा	ब्राह्मणाद्यु वा
९३	२३	यत्रापवादा	तत्रापवादा
११९	१६	कन्यासारसमुच्चये	कृत्यसारसमुच्चये
१२८	६	किं सत्यमिति किमसत्यं	किं सत्यं किमसत्य-- मिति
१२८	९	तथा विधानिच वचनान्यशभूय प्रस्तुतां स्त्वा	तथाविधानि च वचनान्प्रस्तुतां- यशभूयस्त्वा—

१२८ पृष्ठस्य १४ पङ्क्तिवनन्तरं ममास्मिन्लोकाभ्यां पूर्वं १२९ पृष्ठमारभ्य लिखितानि निग्रन्थनामानि पाठ्यानि ।

१२८	१७	पृथगिद्या कष्टायसु—	पृथगिद्याकष्टायसु
१२८	२१	द्विध्या हिंसा	विधा हि सा

यानु अर्थस्याप्रतिपत्तिसंभावना, अन्यथाप्रतिपत्तिसंभावना, वा, तथाविधाएवकाश्चिद् शुद्धयोऽत्र शोधयित्वा निदर्शिताः । साधारण—यन्त्रालयसुलभाः पदच्छेद-विसर्ग-बिन्दु-मात्रानुस्वार-त्-ट्-घ-धादि वर्ण परिवर्तनस्खरच्युत्याद्या अन्या अल्पशुद्ध यस्तु विद्वद्भिरेव स्वयमूहित्वा संशोध्य पाठ्याः । अन्त्ये प्रमाणसंग्रहाध्याये स्मृतिवचनोपन्यासे स्वरायशादशुद्धि बाहुल्यं । जातमिति मूल पुस्तकेष्व एव तत् संशोध्यम् । इह शुद्धि पत्रे सीसकाक्षर (टाइप) निर्मिता एव पङ्क्तयः पङ्क्ति संख्या यांरिगणिताः, शिलामुद्रिता यन्त्रकोष्ठाद्यास्तु संख्यातो बहिर्भूता एव । इति ।

। श्रीः ।

शुद्धिसिद्धान्तपञ्जिकायाम् —

आशौचपञ्जिका ।

१—श्रीमच्छिवकुमारेभ्य पादमूलं जगद्गुरोः ।
विज्ञानभाण्डागारस्य दीपं स्वान्ते सदा दधे ॥१॥
विद्यावाचस्पतिः श्रीमान् महार्घ्यमधुसूदनः ।
ममीक्षाचक्रवर्तीमां करोत्याशौचपञ्जिकाम् ॥२॥
सन्ति यद्यपि भूयांसो निबन्धाः किन्तु तेऽखिलाः ।
स्मृतिव्याख्योच्छलत्तर्कजटिला दुर्गमागयाः ॥३॥
तर्कैर्निर्णीतमर्थं ये जिघृक्षन्ति पृथक्कृतम् ।
येऽनुसा प्रतिपित्सन्ते तेषामर्थोऽयमुद्यमः ॥४॥
निर्मथ्य धर्मशास्त्राणि विमृश्य विमतानि च ।
तत्सारभूतः सिद्धान्तः सिद्धवत् त्विह दर्श्यते ॥५॥
अत्राध्यायाः परीभाषा मूत्रं जन्म मृतिः क्रिया ।
दोषः पालोऽतीतकालोऽपत्रादो वाक्यसंग्रहः ॥६॥

१—शास्त्रसंग्रहः ।

२—अत्र ग्रन्थेऽध्यायाः । अध्याये चाधिकाराः । अधिकारे सिद्धान्ताः । सिद्धान्ते च तत्प्रत्यंगवचनिकाः—इत्येवं विषयपरिच्छेदा भवन्ति ॥ तत्राध्याया दश (१०) । अधिकाराश्चतुःषष्टिः (६४) । सिद्धान्तास्तु षट्षष्ट्यधिकानि त्रीणि शतानि (३६६) ॥

३—तत्र प्रथमे परिभाषाध्यायेऽशौचसम्बन्धिनो विज्ञातव्याः पारिभाषिकाः कतिचिदर्थाः पृथक्कृत्य प्रदर्शिताः ॥१॥ द्वितीये सूत्राध्याये त्वाशौचप्रभवस्थानसंक्रमणद्वारादिभिरर्थजातिराशौचस्यमुपपादितम् ॥२॥

तृतीये जन्माध्याये जन्माशौचविचारः ॥३॥ चतुर्थे मरणाध्याये मरणाशौच-विचारः ॥४॥ पञ्चमे क्रियाध्याये शवानुगमनाद्ध्वं दैहिकक्रियानिमित्त-काशौचविचारः ॥ ५ ॥ षष्ठे दोषाध्याये साधारणमालिन्यरूपाशौचोत्पा-दकाः केचन दोषा आख्याताः ॥ ६ ॥ सप्तमे पाताध्याये आशौचसंकर-विचारः ॥७॥ अष्टमेऽतीतकालाध्याये आशौचमुख्यकालोल्लङ्घनादतिक्रा-न्तकालाशौचानि विदेशस्थमरणादिनिमित्तकानि दर्शितानि ॥ ८ ॥ नवमे-ऽपवादाध्यायेऽशौचोत्पत्तिप्रतिबन्धकस्थानान्युपदर्शितानि ॥ ९ ॥ दशमे तु वाक्यसंग्रहाध्याये आशौचविषयकाणि सर्वाण्यार्षप्रमाणवचनानि सं-गृह्य दर्शितानि । एवं यद्यद्ग्रन्थोल्लिखितत्तर्कप्रयोगविनिर्णीता आशौच सिद्धान्ता इह पञ्जिकार्यामुपनिबद्धास्तेषां ग्रन्थानां नामानि चेह प्रका-शितानि ॥१०॥ तदित्थं दशभिरध्यायैः सर्वे समीक्षिता आशौचविषयाः ॥

४—अथास्मिन् परिभाषाध्याये—शास्त्रसंग्रहः. प्रतिज्ञा, आशौच-स्वरूपम्, आशौचविशेषाः, विशेषाश्रयाः स्पर्शास्पर्शव्यवस्था, कर्तव्या-कर्तव्यव्यवस्था, आरम्भहेतवः, आरम्भकालः, निवृत्तिहेतवः, शुद्धिप्रकारः इत्येकादशाधिकाराः प्रदर्श्यन्ते इति शास्त्रसंग्रहाधिकारः ॥१॥

२—प्रतिज्ञा ।

५—प्रतिशरीरमात्मानस्त्रयो भवन्ति—शरीरात्मा, अन्तरात्मा, विशुद्धात्मा च ॥ तत्रैतं शरीरात्मानमधिकृत्य दोषांस्ततो निवर्तयितुं गुणांस्तत्राधातुं चेदमायुर्वेदशास्त्रं यथा प्रवर्तते, तथैवेदं धर्मशास्त्रं तमन्यं सत्त्वाख्यमन्तरात्मानमधिकृत्य दोषांस्ततो निवर्तयितुं गुणाँश्च तत्राधातु-मविशेषात् प्रवर्तते । अन्तरात्मशरीरात्मनोरन्योन्यं घनिष्ठसंबन्धादेकत्र विकारप्राप्तौ परत्रापि विकारोपसंक्रमणादायुर्वेदशास्त्रेऽप्यन्तरात्मनः संस्कारो यथाऽपेक्ष्यते, तथैवेह धर्मशास्त्रेऽपि शुद्धिप्रकरणे भूयसाऽस्त्येव शरीरात्मनोऽपि संस्कारापेक्षा । यस्तु पुनरयं तृतीयो विशुद्धात्मा विवि-च्यते स खलु सर्वेषां मुख्योऽपि विभुत्वादक्रियत्वाच्च न करोति न लि-प्यते—इत्यतः स इह धर्मशास्त्रे चायुर्वेदशास्त्रे च नाधिक्रियते । तस्य सर्वगुणोपपन्नत्वाद्दोषशून्यत्वाच्च संस्कारानपेक्षणादित्याहुः ॥

६—अथान्तरात्मनः सत्वाख्यस्य संस्कारविधानं धर्मशास्त्रम् । तत्र साक्षादन्तरात्मनःसंस्कारस्य कर्तुमशक्यत्वादात्मायतनानां संस्कारेणात्मनः संस्कारः क्रियते स धर्मः, अभ्युदयसाधकत्वान्निःश्रेयससाधकत्वाच्च । भूतभौतिकविग्रहः, प्रागमसुदयञ्चात्मायतनानि । तेषां दोषमार्जनं स्वस्त्ययनं गुणाधानं चेति त्रिविधाः संस्काराः संपाद्यन्ते । प्रज्ञापराधनिबन्धना आहारविहारादिव्यवहारोपनीतद्रव्याणां ये हीनयोग—मिथ्यायोगातियोगास्तज्जनिता ये नियमेनात्मायतनेषु सत्वेऽन्तरात्मनि चाशुभालिङ्गयाः संचीयन्ते तानि मलानि, ते दोषाः । आत्मायतनानामात्मनश्च प्रसादसिद्धौ तेषां प्रतिबन्धकत्वात् ॥ तत्परिमार्जनं शुद्धिसंस्कारः स च मलानां पाञ्चविध्यात् पञ्चधा विभज्य शास्त्रे निरूप्यते—मलमूत्रादिशारीरशुद्धिः प्रथमा । शय्यासनस्थानवसनभोजनपात्रादिद्रव्यशुद्धिर्द्वितीया । सापिण्ड्यादिसम्बन्धसूत्रब्रह्मणां जननमरणादिनिमित्तजनिताघशुद्धिस्तृतीया । प्रज्ञापराधनिबन्धनचारित्र्यदोषजनितैनः शुद्धिश्चतुर्थी । रजस्तमोगुणाधिक्यप्रयुक्तपरिदृष्टभावशुद्धिः पञ्चमी । पञ्चभिरेतैः शुद्धिसंस्कारैः प्रक्षीणदोषे सत्वात्मके शरीरात्मकेऽपि वा क्षेत्रे गुणाधानाय कृते यतः फलवान् भवति, न त्वन्यथा । यज्ञतपोदानैस्त्रिविधैः कर्मभिर्यैरुत सत्वेऽन्तरात्मनि शुभालिङ्गयाः संचीयन्ते तानि बलानि, ते गुणाः । आत्मायतनानामात्मनश्च प्रसादसिद्धौ तेषां प्रधानोपागत्वात् । तत्पर्य्याधानं दैवसंस्कारः । स्वस्त्ययनं तु दोषोत्पादकसामग्र्याः प्रतिबन्धेन स्वस्थस्यात्मनो निरुपद्रवमेकाकारतया स्थापनम् ॥ तत्र दैवसंस्कारः स्वस्त्ययनसंस्कारो वा शुद्धिसंस्कारमन्तरेण नोपयुज्येते—इत्यतः प्रथमं निरूपणीये शुद्धिसंस्कारे शारीरशुद्धि-द्रव्यशुद्धि-निरूपणानन्तरमिदानीमघशुद्धिर्निरूप्यते ॥ इति प्रतिज्ञाधिकारः ॥ २ ॥

३—आशौचस्वरूपम् ।

७—वेदबोधितचातुर्वर्ण्योचितकर्मफलसिद्धिप्रतिबन्धकोऽमेध्यत्वलक्षणो जननमरणादिजन्यापूर्वविशेषोऽघमित्याख्यायते । अघभिन्नमलसम्बन्धात् कस्यचिदेकव्यक्तिमात्रस्य देहमात्रं मलिनं भवति । अघात्मकमलसम्बन्धात्तु तत्कुलोत्पन्नानां सर्वेषां देहद्यात्मा चाशुचिर्भवतीति

विशेषः । अस्याघस्याशौचसंज्ञा शास्त्रे प्रसिद्धा । अशौचमाशौचं सूतकमघमित्यनर्थान्तरम् । तदपवादः शुद्धिः । तदुपायनिर्देश इह प्रकरणार्थः ।

८—आशौचमित्यशुचेर्भावः कर्म चेत्याहुः । अशुचित्वं चामेध्यत्वं कर्मानधिकारमात्रमित्याहुः । परे तु आशौचशब्देन कालस्नानाद्यपनोद्यः पिण्डदानोदकदानादिकर्माधिकारनिमित्तभूतोऽध्ययनादिकर्माधिकारप्रतिबन्धकीभूतः पुरुषगतः कश्चनातिशयः कथ्यते न तु कर्मानधिकारमात्रम् । स चातिशयोऽघशब्देन शास्त्रे प्रसिद्धः । वस्तुतस्तु संसर्गसंस्रवादिपरिशीलनाभ्यासात् संसर्गिपुरुषेष्वप्रतिबन्धं कश्चनातिशयः समुत्पद्यते । सत्यपि समाने संसर्गे योनिविद्याद्यस्मिंस्सम्बन्धवत्सु पुरुषेषु सोऽतिशयोऽविलम्बितमुत्पद्यते । संसर्गोपरामप्रायत्वे तु तत् क्रमेण ह्रसित्वा चिरेण सर्वथा निवर्तते । आश्रमविशेषसम्बन्धाच्चित्तवैराग्यात् कारणान्तराद्वा संस्रवनिवृत्तिनिमित्तसन्निधाने त्वेकहेलयाऽसौ निवर्तते । तस्य चातिशयस्य कालभेदेन त्रैरूप्यं भवति । संसर्गिणि जीवति सत्यन्यथा । मृते किञ्चित्कालपर्यन्तमन्यथा । तदूर्ध्वं पुनरन्यथा । तत्र मध्यमावस्थायां सोऽतिशयोऽघशब्देन संज्ञायतेऽशौचशब्देन च । तस्य तादृगवस्था-निवृत्तिरेव शुद्धिः । तत्कारणोपन्यासश्चेह प्रकरणार्थः ॥ इत्याशौचस्वरूपाधिकारः ॥३॥

४-आशौचविशेषाः ॥

९—प्रधाननिमित्तानुरोधेनाशौचं द्वेधा-जन्माशौचं मरणाशौचं चेति । तयोः क्रमेण सूतकं शावमिति च संज्ञामाहुः । यत्तु मृताशौचेऽपि सूतकशब्दो दक्षादिभिर्व्यवहृतो दृश्यते तदुभयत्राघस्वरूपस्यैक्याभिप्रायेण निमित्तशब्दभेदानादरादौपचारिकं द्रष्टव्यम् ।

परे त्वाहुः । जन्ममृत्युक्रियादोषा आशौचे निमित्तानि, तेन निमित्तभेदादाशौचं चतुर्धा—जन्माशौचम् मरणाशौचम् उत्तरक्रियाशौचम् दोषाशौचं चेति । जातकस्य जन्मनि मातापित्रादिसम्बन्धिवर्गे कञ्चित्कालमशुद्धिर्जायते तज्जन्माशौचम् । एवं मृतकस्य मरणे मातापित्रादिसम्बन्धिवर्गे स्त्रीपुत्रादिसम्बन्धिवर्गे च कञ्चित्कालमशुद्धिर्जायते तन्मरणाशौचम् । तथा मृतकस्य मरणे ये केचिदौर्ध्वदेहिकं दाहदाहादिकमुत्तरक्रियाष्टकं

कुर्वन्ति तेषां तत्करणनिमित्तिकाऽशुद्धिः कञ्चित्कालमुपजायते तदुत्तरक्रियाशौचम् । अथ सन्ति बहवो दोषा मलिनीकरणास्तत्सम्बन्धादप्यशुद्धिर्जायते तद्दोषाशौचम् ।

१०—एते च जन्ममृत्युक्रियादोषाः स्वरूपसन्तो निमित्तानि भवन्ति ज्ञायमानाश्च । तेनाशौचं द्वेधा-स्वरूपसदाशौचम्, वासनाशौचं चेति ।

११—अथाधिष्ठानभेदादाशौचं त्रेधा । स्पर्शाशौचम्, कर्माशौचम्, मङ्गलाशौचं चेति । यत्र शरीरस्पर्शो निषिध्यते तत्स्पर्शाशौचम् । यत्र वैदिकानि कर्माणि निषिध्यन्ते तत्कर्माशौचम् । यत्र तु विवाहोपनयनकन्यादानादीनि मङ्गलकर्माणि गयाद्यपूर्वतीर्थयात्रादीनि च निषिध्यन्ते तन्मङ्गलाशौचम् । तत्राद्यं संस्कारात्मकमपूर्वं जायमानमिह भूतात्माधिष्ठितबहिःशरीरे समवतिष्ठत इत्यतः शरीराशौचमङ्गाशौचं च कथ्यते । शरीरस्पर्शे सति इदं परशरीरे संक्रमते तस्मात्स्पर्शप्रतिषेधलक्षणं स्पर्शाशौचं च कथ्यते । अथ द्वितीयं तदपूर्वं जायमानमिह क्षेत्रज्ञात्माधिष्ठितान्तःशरीरे समवतिष्ठते इत्यतस्तदात्माशौचं प्राणाशौचं च कथ्यते । तत्र सति स्वाध्यायो दानप्रतिग्रहौ देवकर्माणि प्रेतपिण्डक्रियावर्जं पितृकर्माणि च प्रतिषिध्यन्ते । अतः श्रौतस्मार्तकर्मप्रतिषेधलक्षणं कर्माशौचं च कथ्यते । चर्मशरीरे तस्याद्यस्यानवस्थानात् ।

अथ तृतीयमाभ्युदयिकमङ्गलकर्मप्रतिषेधलक्षणं त्वशौचमतिमात्रसापिण्डयवति पुत्रे सत्वमात्राधिष्ठितमनुशयरूपं भवतीत्यतस्तदनुशयाशौचं प्रेताशौचं च कथ्यते । सपिण्डीकरणोत्तरं प्रेतत्वं विमुच्यते । तच्च संवत्सरान्ते विहितमतस्तद्वर्षाशौचं च कथ्यते ॥ * ॥ इत्याशौचविशेषाः ॥ ४ ॥

५—विशेषांश्रयाः ।

१२—जन्मनि सूत्यां सूतीसपत्न्यां सूतीभर्तरि च स्पर्शाशौचं कर्माशौचं चोत्पद्यते । इतरेषां सपिण्डानान्तु कर्माशौचमात्रं न स्पर्शाशौचम् ॥ अथ संसर्गिणि स्पर्शाशौचमात्रं न तु कर्माशौचम् । तृतीयाशौचं तु जन्मनि कस्यापि नास्ति । मरणे तु पुत्रे त्रिविधमशौचमुत्पद्यते । सपिण्डादौ तु द्विविधम्—स्पर्शाशौचं कर्माशौचं च । संसर्गिणि त्वेकं स्पर्शाशौचमात्रं न तु

कर्माशौचम् ॥+॥ निर्हारादुत्तरक्रियायां स्पर्शाशौचं कर्माशौचं चेति द्विविधाशौचसम्बन्धः। दोषविशेषाभिसन्धाने तु कर्माशौचमात्रं न स्पर्शाशौचं तृतीयाशौचं वा । तदित्थं जन्ममृत्युक्रियादोषनिबन्धनेष्वाशौचेषु स्पर्शकर्मोत्सर्गप्रतिषेधलक्षणान्युपदर्शितानि ॥+॥ इत्याशौचविशेषाश्रयविचारः ॥५॥

६–स्पर्शास्पर्शव्यवस्था ।

१३—कर्माशौचं कर्मप्रतिषेधलक्षणमधिककालेनापैति, स्पर्शाशौचं त्वस्पृश्यत्वलक्षणमल्पकालेन । तत्रासति विशेषाभिधाने कर्माशौचं यत्र यावदुक्तं तस्य प्रथमे तृतीयांशे स्पर्शाशौचमपि मातरि पितरि भ्रातरि तदन्येषु च सपिण्डेषु यथायथं समुच्चीयते । यथा मासे कर्माशौचे दशाहं स्पर्शाशौचम् । दशाहे तु कर्माशौचे त्र्यहं स्पर्शाशौचम् । त्र्यहे कर्माशौचे त्वेकाहं स्पर्शाशौचम् । ततो न्यूने कर्माशौचे स्नानात्प्राक् स्पर्शाशौचम् । इत्येवं तारतम्येन सर्वत्रोह्यम् । अयमेव च तृतीयांशः सति सम्भवे अस्थिसंचयनकालो भवति ॥ अत एवास्थिसंचयनदिने सर्वस्यास्पृश्यता निवर्तते । स च पूर्णाशौचेऽस्थिसंचयनकालो ब्राह्मणस्य चतुर्थाहः । क्षत्रियस्य पञ्चमाहः । वैश्यस्य षष्ठाहः । शूद्रस्य दशमाहः । त्र्यहाशौचे तु सर्वेषां द्वितीयाहः । अन्यत्राप्येवं सर्वत्रासति विशेषाभिधाने कर्माशौचत्रिभागकालेनास्पृश्यतानिवृत्तिरित्याह देवल ऋषिः । अतिक्रान्ताशौचे तु सचैलस्नानमात्रेणास्पृश्यतानिवृत्तिः । इति मरणाशौचविषयकः स्पर्शास्पर्शकालः ॥ १ ॥

१४—जननाशौचे तु पुत्रजनने कन्याजनने वा शरीराशौचमस्पृश्यत्वलक्षणमेकस्याः सूतिकाया एव सम्पूर्णं दशरात्रकालापनेयं भवति । अथ पितुर्विमातृणां च तदत्यल्पं पुत्रजनने स्नानमात्रापनेयं भवति । कन्याजनने तु पितुर्विमातृणां च तावन्मात्रमपि नास्ति । मातापितृभिन्नानां तु सपिण्डानां पुत्रजनने कन्याजनने वा कुत्राप्यस्पृश्यत्वं नास्ति ॥ २ ॥

१५—सूतिकास्पर्शे तु कृते स्पर्शनिमित्तकमस्पृश्यत्वप्रयोजकमघमनुवर्तते। तच्च सूतिकाभर्तरि दशरात्रकालापनेयम् । सपिण्डादिषु तु स्नानमात्रापनेयमिति विशेषः ॥ इति स्पर्शास्पर्शविचारः ॥ ६ ॥

७—कर्तव्याकर्तव्यव्यवस्था ।

१६—मरणाशौचे जननाशौचे वा सन्ध्योपासनं पञ्चमहायज्ञान् षट् कर्माणि च वर्जयेत् । तत्राचमनम् प्राणायामः, आचमनम् मार्जनम्, आचमनम् सूर्य्यार्घ्यदानम्, सूर्य्योपस्थानम्, गायत्रीजपश्चेत्येतानि सन्ध्यावन्दनस्वरूपसम्पादकान्यष्टौ कर्माणि गृहस्थानां नित्यानि । तानि च सर्वाण्यप्याशौचकालमध्ये प्रतिषिद्धानि ॥+॥ पञ्चैव महायज्ञाः—भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति ॥ तेष्याशौच कालमध्ये प्रतिषिद्धाः ॥+॥ यजनं याजनमध्यापनमध्ययनं दानं प्रतिग्रहश्चेत्येतानि षट् कर्माणि गृहस्थानां नित्यानि । तान्यपि सर्वाण्याशौचकालमध्ये प्रतिषिद्धानि—इत्येके ॥+॥

१७—परे त्वाहुः । आशौचे सति सन्ध्योपासनार्घमाचमनं सूर्योपस्थानं च न कुर्यात् । ५ । प्राणायामं तु न कुर्याद्वा विना मंत्रेण कुर्याद्वा । मार्जनं गायत्रीजपं च न कुर्याद्वा मानसमन्त्रेण कुर्याद्वा । सूर्यार्घ्यदानं तु गायत्रीं सम्यगुच्चार्य कुर्यादेव, नत्वेव न कुर्यादिति दाक्षिणात्याः । गौडास्तु सूर्यार्घ्यदानमपि नैव कुर्यादित्याहुः । प्रदक्षिणं कृत्वा सूर्यं ध्यायन् नमस्कुर्यात् । सेपा कुशवारिविवर्जिता मानसी सन्ध्या न कदाचित् परित्याज्या—इति सन्ध्यावन्दने विशेषः ॥ २ ॥+॥

१८—महायज्ञेषु वेदाध्ययनं वेदाध्यापनं च ब्रह्मयज्ञः । तस्याशौचे सति नैव कुर्य्यात् । अथपिण्डदानमुदकदानं च पितृयज्ञः । पिण्डदानं श्राद्धशब्देनाख्यायते । उदकदानं तु तर्पणशब्देन । तत्राभ्युदयिकश्राद्धं जननाशौचे सत्यपि कुर्यादेव । अथ मृताहमारभ्य दशाहपर्य्यन्तं दशगात्रश्राद्धं तथाद्यश्राद्धमारभ्य सपिण्डीकरणान्तं षोडशश्राद्धं चेत्येतद्द्वयं मरणाशौचमध्ये कर्तव्यतया नियतत्वादशौचेऽपि कुर्यादेव । सपिण्डीकरणोत्तरं हि श्राद्धकर्ता पुत्रादिरशौचेन विमुच्यते न ततः प्राक् । त्रिविधं हि मातापितृमरणे पुत्रस्याशौचं प्रवर्तते दशाहव्याप्यं द्वादशाहव्याप्यं संवत्सरव्याप्यं च । तत्राद्यं दशम्या रात्रेरवसाने दशगात्रकर्मावसाने च निवर्तते । द्वितीयं द्वादश्या रात्रेरवसाने सपिण्डीकरणावसाने च । तृतीयंतु चान्द्रसंवत्सरान्ते । अथ

सपिण्डज्ञातीनां द्विविधमाशौचं भवति । त्र्यहव्याप्यं दशाहव्याप्यं च । तत्राद्यं तृतीयरात्रेरवसानेऽस्थिसंचयनकर्मावसाने च निवर्तते । द्वितीयन्तु दशम्या रात्रेरवसाने दशगात्रकर्मावसाने चेति । तत्राशौचनिवर्तकानां कर्मणामाशौचे कर्तव्यता नाप्नोतीति न प्रतिपिध्यन्ते तत्र तानि कर्माणि किन्तु यद्येषामपि कर्मणां कर्तव्यदिने किञ्चिदशौचान्तरं प्रसज्यते तदा तदशौचे व्यतीते तच्छ्राद्धं कुर्यात् । न त्वाशौचकालमध्ये इत्याह ऋष्यशृङ्ग ऋषिः । एवं सांवत्सरिकश्राद्धदिनेऽप्याशौचप्राप्तौ तदशौचान्तद्वितीयदिने कुर्यात् न त्वाशौचकालमध्ये । अथाशौचान्तद्वितीयदिने मलमासादिकालदोषप्राप्तौ विघ्नान्तरप्राप्तौ वा तदुत्तरं प्रथमोपस्थितायां कृष्णैकादश्यामावास्यायां वा श्रवणदिवसे वा कुर्य्यादिति लघुहारीतः प्रचेताश्च । अमावास्यादिश्राद्धजातं तु नाशौचे कुर्य्यात् । यद्यावश्यकं स्यात्तदाशौचोत्तरं कृष्णैकादश्यां कार्य्यमिति शिष्टाः ॥ + ॥ इति पितृयज्ञे विशेषः ॥ ४ ॥

२०—अथ यजनं याजनं च देवयज्ञः । तत्र याजनं सत्याशौचे नैव कुर्यात् । होमस्तु यजनम् । तत्र नियमानियमानुरोधेन व्यवस्था । तथाहि—येषां बह्वृचादीनां दशरात्रमहोमेऽपि नाग्निविच्छेदः कल्पेऽभ्युपगम्यते तैरशौचे प्राप्तेऽग्निहोत्रहोमो न कार्यः । अशौचोत्तरं तु तत्रैवाग्नौ होमसिद्धिर्न तु पुनराधानाद्यावश्यकता । अथ तैत्तिरीयादीनां चतूरात्रमहूयमानोऽग्निर्लौकिकः सम्पद्यते । तस्मात्तेषां होमस्यावश्यकत्वादशौचकालेऽपि शुष्कान्नेन फलादिना वा ब्राह्मणद्वारा होमं कारयेत् । एवं स्मार्तहोमेऽपि कर्तव्यता नियतेसत्याशौचप्राप्तौ स्वयमकृत्वा परद्वारेणाकृतान्नं कृताकृतान्नं वा हावयेत् । कृतान्नं तु परद्वारापि न हावयेत् । ओदनसक्तुलाजमोदकलड्डुकादीनि कृतान्नानि । तण्डुलमाषमुद्गादीनि कृताकृतान्नानि, व्रीहियवगोधूमादीनि त्वकृतान्नानि । स्मार्तं वैश्वस्तानं नित्यदेवार्चनं च यजनम् । तदाशौचे न कुर्यात् । आगमोक्तं काम्यपूजनानुष्ठानादिकं निष्कामपूजनादिकं च यजनमुच्यते तत्रापि काम्ये संकल्प्य प्रवृत्ते यद्याशौची स्यात् तदा मानस्या प्रक्रियया ध्यानयोगेन तत्कुर्यात् न मन्त्रमुच्चारयेत् । निष्कामनित्यमे त्वाशौचेऽपि तत्कार्यम् । नियमाभावे त्वाशौचे तदुभयं न कुर्यात् । आशौचे निवृत्ते सति पुनः कुर्यादिति देवयज्ञे विशेषः ॥ ५ ॥

२१ अथ दानं प्रतिग्रहश्चेत्युभयं भूतयज्ञः । दीयमानं द्रव्यं बलिशब्देनाख्यायते तद्दानं तद्ग्रहणं च भूतयज्ञः । तत्र पुत्रजन्मनि नाडीच्छेदात् पूर्वं हिरण्य-भूमि-चतुष्पद-धान्य-गुड-तिल-घृत-वस्त्र-तुरग-रथ-च्छत्र-च्छाग-मत्स्य-शयनासन-गृहादिद्रव्याणां दाने वा प्रतिग्रहे वा दातुः प्रतिग्रहीतुश्च दोषो नास्तीति कूर्मब्रह्मपुराणयोः प्रतिध्वायते । लवणमधुमांसानां पुष्पमूलफलशाकानां काष्ठलोष्टतृणपर्णानां दधिदुग्धघृततैलानामजिनौषधयोः सक्तुशाक-मोदक-तन्दुलादिशुष्कान्नानामशौचिस्वामिकानामपि तत्स्वाम्यनुमत्या स्वहस्तेन ग्रहणे नास्ति दोषः । अशौचिना वा गृह्यमाणे दातुः प्रतिग्रहीतुर्वा न दोष इति ब्रह्मपुराणम् । यद्यपि बलिरिति वैधं कर्म भवति तथापीह वैधमवैधं वा सर्वविधं व्याख्यातमविशेषात् । एतदन्यस्तु सर्वो भूतयज्ञः सत्यशौचे प्रतिषिद्धः ॥ इति भूतयज्ञे विशेषः ॥ ६ ॥

२२-अथ गृहे समागतानां भोजनदानाश्रयदानाद्यातिथ्यकरणं मनुष्ययज्ञः। तत्र जनने मरणे चाशौचिनां गुरुस्यान्नमशौचेकाले न भोक्तव्यम् । अशौचिगृहे कृतभोजनस्याशौचं प्राप्नोतीत्यतस्तत्प्रतिषिध्यते । अशौचं ग्रहीतुमिच्छतान्त्वाशौचिकुलान्नभोजनेऽपि दोषो नास्ति । तदित्थं प्रीतेन महायज्ञेन स्मार्तान्यपि षट्कर्माणि व्याख्यातानि ॥+॥ ७ ॥

२३—अथ त्रिविधमाशौचं पूर्वमाख्यातं स्पर्शाशौचं, कर्माशौचं, मङ्गलाशौचं चेति। तत्र श्राद्धकर्तुः पुत्रस्य दशरात्रं,सपिण्डानां तु त्रिरात्रं स्पर्शाशौचकालः । तत्राशौचिना शुचिना स्थेयम् । परागस्पर्शादिकमशुचिस्पर्शैस्तैलाभ्यङ्गादिकं च न कार्य्यम् । अथ कर्माशौचं दशरात्रं, केषांचित्तु त्रिरात्रम् । तत्र—

"तैलाभ्यङ्गे बान्धवानामङ्गसंवाहनं च यत् ।
तेन चाप्यायते जन्तुर्यच्चाश्नन्ति श्वशान्धवाः "

इति मार्कण्डेयपुराणोक्तं कार्यम् । "मत्स्यमांसादि न भक्षयेयुराप्रदानाद्"इति भगवान् गौतमः प्राह । अयं च मांसादिभक्षणनिषेधोऽशौचाभ्यन्तरेऽशौचिमात्रसाधारणः ॥ अथ तृतीयमाशौचं संवत्सरेणापैतीति संवत्स-

रपर्यन्तं पुत्रो विवाहोपनयनकन्यादानादीनि मङ्गलकर्माणि तीर्थयात्रां गयाश्राद्धं च न कुर्यात् । इति कर्तव्याकर्तव्यविचारः ॥ ७ ॥

८-आशौचारम्भहेतवः ।

२४-जन्माशौचं जन्मकालात्, नालच्छेदकालात्, जन्मश्रवणकालाद्वा प्रवर्तते । तत्र जननस्याशौचे निमित्तत्वाज्जन्मकालादेवारभ्याशौचप्रवृत्तिरिति दाक्षिणात्याः । नालच्छेदस्यैवाशौचे निमित्तत्वात्तदूर्ध्वमेवाशौचप्रवृत्तिर्न तु पूर्वमितिगौडाः । नालच्छेदो नाड़ीच्छेदो नाभिच्छेदः इत्येकार्थाः ॥ १ ॥

२५-मरणाशौचं तु मृत्युकालात्, दाहकालात्, मृत्युश्रवणकालाद्वा प्रवर्तते । तत्रानाहिताग्नेर्मृत्युकालादारभ्याशौचदिनगणना कार्या । न तु दाहादारभ्य । तेषां मरणस्याशौचे निमित्तत्वात् । आहिताग्नेस्तु दाहकालादारभ्यदिनगणना कार्या । न तु मृत्युकालात् । तेषां दाहस्याशौचे निमित्तत्वात् । इष्टिमतामन्त्येष्टिनिमित्ताशौचसम्बन्धेऽपि मृत्युनिमित्ताशौचस्य तत्राप्रवृत्तेः ॥ २ ॥

२६-एतच्च वस्तुसदाशौचप्रवृत्तौ निमित्तमुक्तम् । आशौचनिमित्तकविधिनिषेधव्यवहारप्रवृत्तौ तु जनने मरणे वा श्रवणकालादारभ्यैव गणना भवति तेन ततः पूर्वं स्पर्शकरणे कर्मकरणे वा न दोषः । ज्ञानस्यैव व्यवहारे निमित्तत्वात् । ३ । इत्याशौचारम्भहेतवः ॥ ८ ॥

९-आशौचारम्भकालः ।

२७-आशौचप्रारम्भकालसम्बन्धेन मतत्रयं स्मर्यते । तथाहि-सूर्योदयात् प्राक्कालपर्यन्तं रात्रौ जनने मरणे दाहे वा पूर्वदिनादारभ्य गणना कार्या सूर्योदयोत्तरं तूत्तरदिनादारभ्य । इत्येकं मतम् । १ ।

द्विर्विभक्तायां रात्रेर्निशीथकालपर्यन्तं रात्रौ जनने मरणे दाहे वा पूर्वदिनादारभ्य गणना कार्या निशीथोत्तरं तूत्तरदिनादारभ्य । इति द्वितीयं मतम् ॥ २

त्रिर्विभक्तायां रात्रेः प्रथमभागद्वयपर्यन्तं रात्रौ जनने मरणे दाहे वा पूर्वदिनादारभ्य गणना कार्या तृतीयभागे तूत्तरदिनादारभ्य । इति तृतीयं मतम् । ३ ।

२८—तत्र मिथिलादिपौरस्त्यदेशेषु सूर्योदयविभागव्यवस्था । मत्स्यादिपाश्चात्यदेशेषु निशीथविभागव्यवस्था । महाराष्ट्रादिदाक्षिणात्यदेशेषु तु त्रिभागव्यवस्था । तदित्थं यत्र देशे य आचारस्तत्र स तथा कार्यो नान्यत्र देशे । इत्यारम्भकालाधिकारः ॥ ९ ॥

१०—आशौचनिवृत्तिहेतुविचारः ।

ज्ञानं तपोऽग्निराहारो मृन्मनो वार्युपाञ्जनम् ।
वायुः कर्मार्ककालौ च शुद्धिकर्तृणि देहिनाम् ॥

२९—इत्येवं द्वादशेते शुद्धिहेतवो विष्णवादिभिराम्नायन्ते । तत्र ज्ञानतपसी अग्निमनसी कर्मकालौ वारि चेति समाशौचनिवृत्तिहेतवो द्रष्टव्याः । तत्र तावज्ज्ञानतपोऽग्निमनसां प्रभावादेव तत्तदधिष्ठाने समुत्पद्यमानमिदमाशौचं पात्रभेदान्न्यूनाधिककालेन निवर्तते । तदित्थं स्थितिकालानुरोधेनेदमाशौचं द्वादशधा-अनाशौचं, सद्यःशौचम, एकाहः, द्व्यहः, त्र्यहः, चतुरहः, षडहः, दशाहः, द्वादशाहः, पञ्चदशाहः, मासः, मरणान्तं चेति । तत्र यः साङ्गं सकल्पं सरहस्यं च सर्वशाखं वेदमर्थतः सम्यग् विजानाति, अग्निमान् क्रियावांश्च भवति तस्याशौचं नास्ति १ । राज्ञामृत्विजां दीक्षितानां व्रतिनां सत्रिणां घालानां देशान्तरस्थानां च सद्यःशौचम् । २ । साङ्गवेदविदामग्निनतां क्रियावतां च ब्राह्मणानामेकाहः।३। अन्येषां च तथाविधानां द्व्यहः । ४ । वेदेनाग्निना क्रियया च यथाक्रमञ्चिद्धीनानां त्र्यहः । ५ । हीनतराणां चतुरहः । ६ । अव्राह्मणानां तथाविधानां षडहः । ७ । जातिमात्रेण विप्राणां तु दशाहः । ८ । क्षत्रियाणां द्वादशाहः ।९। वैश्यानां पञ्चदशाहः ।१०। शूद्राणां मासः ।११। अश्नात्वा, अनाचम्य, अजप्त्वा अदत्त्वा, अहुत्वा तु भुञ्जानानां मरणान्तम् । तथा व्याधितस्य कदर्यस्य सर्वदा ऋणग्रस्तस्य क्रियाहीनस्य मूर्खस्य विशेषतः स्त्रीजितस्य व्यसनासक्तचित्तस्य नित्यशः पराधीनस्य अद्धात्यागविहीनस्य च सर्वस्य भस्मान्तं सूतकं भवति ।११। अत्र विशेषोऽपवादाध्याये वक्ष्यते ॥१॥

३०-अथ यद्प्यधिष्ठानभेदात् त्रिविधमाशौचमाख्यातं तेषामपि तारतम्येन निवृत्तिकाला भवन्ति तथाहि-आद्धकर्तुः पुत्रस्य तत्संसर्गिणश्च दश-

गात्रोत्तरं दशाहान्ते स्पर्शाशौचनिवृत्तिः । सपिण्डीकरणोत्तरं वर्षान्ते द्वादशाहान्ते वा कर्माशौचनिवृत्तिः । वर्षान्ते च सङ्कलाशौचनिवृत्तिः । अथ ज्ञातीनान्तु सपिण्डानां तत्संसर्गिणां चास्थिसंचयनोत्तरं त्रिरात्रान्ते स्पर्शाशौचनिवृत्तिः । दशगात्रोत्तरं दशरात्रान्ते कर्माशौचनिवृत्तिः । सङ्कलाशौचं तु तेषां नास्ति ॥२॥ तदित्थं कालः कर्म चेत्युभयमाशौचनिवर्तकं सिद्धम्।तत्र काल एवाशौचनिवृत्तौ मुख्यो हेतुः, कर्म गौणमित्येके । कर्मैव तत्र मुख्यो हेतुः, कालो गौण इत्यन्ये । परे त्वाहुः-दशमदिवसे दशगात्रकर्मसमाप्तावपि दशम्या रात्रेरवसानपर्यन्तमशौचं न निवर्तते । येऽपि वा दशगात्रादिकं किमपि कर्म न कुर्वन्ति, तेषामपीदमशौचं स्वे स्वे कालेऽतीते निवर्तते । यथा संवत्सरादूर्ध्वं मरणश्रवणे कर्मकरणाभावेऽप्यशौचनिवृत्तिं मन्वादयः प्राहुः । तस्मात् काल एवाशौचनिवर्तको न तु कर्मकलापः । तस्य फलान्तरोद्देशेन विधानात् इति । केचित्तु श्राद्धादिशुद्धिकर्मनिवर्तनीयमशौचान्तरमिच्छन्ति। तेषां तादृशाशौचनिवृत्तौ कर्मैव हेतुः, न कालः । तदन्याशौचनिवृत्तौ तु काल एव हेतुर्न कर्मेति विशेषः ॥३॥+॥

३१-अथाशौचं द्वेधा-वस्तुसदाशौचं, वासनाशौचं चेति । तत्र ज्ञाने सत्यसति वा निमित्तवशादुपजायमानमाशौचं यत्र सम्बन्धसूत्रादुत्पद्यते तदाद्यम् । यत्तु निमित्तश्रवणादशौचमुपजायते तद्द्वितीयम् । तत्र वस्तुसदाशौचं स्वेस्वे नियते कालेऽतीते स्वयं निवर्तते । ज्ञायमानं तु वासनाशौचं वस्तुसदाशौचस्थितिकालसन्निकर्षविप्रकर्षानुरोधान्न्यूनाधिकमात्रमुत्पद्य न्यूनाधिककालेनैव निवर्तते । यथा अन्तर्दशाहे श्रवणे शेषदिवसैर्निवृत्तिः । निर्दशस्य वर्षाभ्यन्तरं श्रवणे त्रिरात्रान्निवृत्तिः । वर्षादूर्ध्वन्तु श्रवणे स्नानमात्रान्निवृत्तिः । इत्येवं सर्वत्रोह्यम् ॥+॥ इत्याशौचनिवृत्तिहेतवः ॥१०॥

११—शुद्धिक्षौरम् ।

३२—आशौचोपक्रमदिने क्षौरं कार्यमिति दाक्षिणात्याः । तत्रापि दाहात् प्रागेव श्राद्धकर्त्रा, दाहादूर्ध्वन्तु सपिण्डादिभिरित्याहुः । आशौ-

चावसानदिने क्षौरं कार्यमिति गौडाः ।

"समाप्य दशमं पिण्डं यथाशास्त्र- मुदाहृतम् ।
श्मश्रुकेशनखानां च यत् त्याज्यं तज्जहात्यपि ॥"

इति ब्रह्मपुराणात्, "श्मश्रुकेशनखान् वापयेदक्षिलोमशिखावर्जम्" इति वसिष्ठोक्तेश्च प्रतिवर्णमशौचान्तदिने केशश्मश्रुलोमनखानां यत्त्याज्यं तज्जह्यात् । न कक्षोपस्थशिखाः, न भ्रुवं न वाक्षिलोमानि वापयेत् । गौरसर्षपकल्केन तिलकल्केन वा शिरःस्नानंकरोति वस्त्रशुद्धिं गृहशुद्धिं च करोतीत्याहुः ॥९॥

३३—अशौचान्तदिने क्षौरकरणे कारणद्वयमाहुः । केशश्मश्रुनखान्याश्रित्य पापं तिष्ठतीत्यनुशयनिवृत्त्यर्थमाशौचनिवृत्तिदिने केशादित्यागः कार्य इत्येकम् । एकोद्दिष्टादि श्राद्धमकेशश्मश्रुणा शुचिना कर्तव्यमित्याचक्षते । शरीरात्तु रुधिरस्रावे पुरुषोऽशुचिर्भवतीत्यतः श्राद्धदिने श्राद्धतः पूर्वं क्षौरकरणे रुधिरस्रावसम्भवे श्राद्धव्याघातः संभाव्यते । तस्मादशौचान्त द्वितीयदिने कर्तव्यमाद्यश्राद्धं लक्ष्यीकृत्य, तत्पूर्वदिने दशमदिवसे क्षौरं विधीयते । एवं कृते सति श्राद्धदिने रुधिरस्रावाभावादशुचित्वं नापद्यते, केश श्मश्रुपरित्यागात् शुचित्वं तूपलभ्यते । तदिदं द्वितीयम् ।

३४—"अनुभाविनां च परिवापनम्" इत्यापस्तम्बोक्तेः पुत्रादीनामेव मुण्डनविधिर्नान्येषामित्येके । अनुभाविनः पुत्रादय इत्यभिमानात् । अथ प्रेतादल्पवयस्कानामेव मुण्डनविधिर्नाधिकवयस्कानामिति विज्ञानेश्वर-रत्नाकरादयो दाक्षिणात्याः-"अनुभाविनः स्वनिष्ठा" इत्यभिमानात् । अशौचमनुभवतां पुंसां सर्वेषां सर्वाशौचे मुण्डनमिति गौडाः-"अनुभाविनः स्वनिष्ठाशौचाभिमानिनः" इत्यभिमानात् । तत्र देशाचारतो व्यवस्था ।३।

३५—"केशश्मश्रूधारयतामग्र्या भवति सन्ततिः" इत्युक्तेर्गृहाश्रमिणो वृथामुण्डनं न कुर्युरन्यत्र विहाराशौचादिनिमित्तेभ्यः । "नीचकेशश्मश्रुणा ब्राह्मणेन भवितव्यम्" इत्युक्तेः पञ्चमे दशमे वा दिने नियमेन कर्त्र्या केशकर्तनं कारयितव्यम् । " पञ्चमकं दशमकं वा प्रत्यायुष्यम् " इति श्रुतिनिर्देशात् "त्रिः पक्षस्य केशश्मश्रुलोमनखान् संहारयेत् " इत्यायुर्वेदाचा-

यैर्मेहर्षिचरकादिभिस्तथोपदेशाच्च ॥ क्षुरेण भद्राकरणं तु मृतके सूतके बन्धमोक्षणे यज्ञदीक्षणे राजनिदेशे तीर्थप्राप्तौ चेत्येवंविधे शास्त्रसिद्धे निमित्ते सत्येव कार्यं नान्यथेति बहवः । इदानीं तु लौकिका यथेच्छं चरन्ति । अस्माकं तु मैथिलानां सम्प्रदाये कृतोपनयनानां कन्यां केशकर्तनं व्यवहारविरुद्धम् । भद्राकरणं तु निमित्तमन्तरेणापि यथेच्छमाचारसिद्धं दृश्यते । तत्र देशाचाराद्व्यवस्था ।४।

३६—जननाशौचेऽपि श्मश्रुकर्म कर्तव्यमिति शुद्धितत्त्वादौ स्पष्टम् ॥५॥

इति शुद्धिदौराधिकारः ॥११॥

३७—श्रीक्षेत्रादपि दक्षिणोऽधि मिथिलं यो भैरवादुत्तरः
पूर्वो यः खलु लक्ष्मणाख्यसरितो यो गौतमात् पश्चिमः ॥
तस्मिन् संवसथेऽग्रहीद् बहुबुधे गाढाभिधे जन्म यः
सोऽयं श्रीमधुसूदनो व्यतनुताऽशौचे समीक्षामिमाम् ॥१॥

इति परिभाषाध्यायः प्रथमः

आशौचसूत्राध्यायः ।

३८—अस्मिन् द्वितीयेऽशौचसूत्राऽध्याये अशौचप्रभवः, सम्बन्धसूत्रम्, योनिसम्बन्धाः, योनिसम्बन्धभेदाः, विवाहसापिण्ड्यम्, दायसापिण्ड्यम्, आशौचसापिण्ड्यम्, पिण्डरहस्यम्, विद्यातिर्वेज्यसम्बन्धः, प्रेतसंसर्गः, खननदाही, उदकदानम्, निमित्तसंसर्गः, आशौचताद्रात्म्यम्-इत्येते चतुर्दशाधिकाराः प्रदर्श्यन्ते ।

१—प्रभव-चिन्ता ।

३९—चत्वारि तावन्निमित्तान्याशौचस्योक्तानि;—जन्म, मृत्युः, क्रिया दोष, इति । तत्र जन्माशौचस्य प्रभवः स्त्रीरजः प्रतिपद्यते । तस्य च रजसो मलत्वादियं रजस्वला स्त्री मलिनी भवति । द्विविधा हि शरीरधातवो भवन्ति—प्रसादभूता मलभूताश्च । तत्र गुर्वादयो द्रवान्ता गुणा रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि च द्रव्याणि प्रसादाउक्ताः ।

ये तु शरीरस्य बाधकराः स्युस्ते मला उच्यन्ते । यथा शरीरच्छिद्रेषूपदेहाः पृथग्जन्मनो बहिर्मुखाः परिपक्वाश्च धातवः, ये चान्येऽपि केचिद्भावाः शरीरे तिष्ठन्तः शरीरस्योपघातायोपपद्यन्ते तान् सर्वान् मलानाचक्षते । अतएवेदमार्तवं मलो व्यवसीयते, पृथग्जन्मत्वाद्बहिर्मुखत्वाच्च । मलानामशुचित्वं स्वात्मानिष्टजनकत्वादुपपद्यते । चेतना च सत्वं च शरीराग्निश्चात्मान उच्यन्ते । तत्र तज्जातीयेनात्मना परित्यक्तोऽर्थस्तज्जातीयायात्मने हितं न भवति । तस्मात्तस्य तदात्मसापेक्षमशुचित्वं प्रकल्प्यते । तस्य निःसरणसमये मूत्रपुरीषादिनिःसरणसमयवच्छरीरमशुचि प्रतिपद्यते । तत्काले स्पृष्ट्वा शरीरस्य परशरीरे स्वगतधर्मसंक्रामकत्वात् । तस्य शुद्धिः शौचप्रकरणेनाम्नाता ॥ १ ॥+॥

४०—अथैतस्या मलिन्याः शरीरतश्चत्वारि दिनानि यावत्कमले समुच्छितं पुराणं रजः प्रवर्तते । तच्चातिदुष्टं भवति, दग्धप्रायत्वात्, व्यापन्नप्रायभ्रूणसंकुलत्वाच्च । तत्र असृक्स्थिता भ्रूणकीटा म्रियमाणाः सन्तीत्यतस्तस्या असृजोऽशुचित्वं जायते, तत्संसर्गे चायुः-प्रज्ञा-तेजो-बलाद्यपहीयते-इत्यतोऽयमन्यो विशिष्टो दोषः । तस्य शुद्धिरप्यन्यत्राम्नाता ॥ २ ॥+॥

४१—अथ स्रावपातयोर्द्विभागादिभावापन्ना रजोभागा आत्मना परित्यक्ता बहिर्निःसरन्ति । तेषामात्मना परित्यक्तत्वादेवात्मानिष्टजनकत्वमशुचित्वं चोपपद्यते । शुक्रशोणितजीवसंयोगे तु कुक्षिगते गर्भसंज्ञा भवति । तस्य स्रावे पाते च जीवो निवर्तते । तस्मादप्यशुचित्वं प्राप्नोति । किञ्च—शुक्रशोणितजीवसंयोगरूपोऽयं गर्भो नामाकाशवाय्वग्नितोयभूमिविकारश्चेतनाधिष्ठानभूतः पंचमहाभूतचेतनासमुदायात्मकत्वात् षड्धातुः प्रतिपद्यते । तस्माच्च षड्धातुसमुदायान्महाभूतविकारः पञ्चत्वं प्राप्य चेतनाधातोरधिष्ठानत्वान्निवर्तते, तेषु भूतविकारेषूपपद्यमानमशुचित्वं सम्बन्धसूत्रोपगमादन्यत्रापि संक्रमते । तदिदमशौचमेतत्प्रकरणार्थः ॥३॥+॥

४२—अथ प्रसवे रजोमूला मातृगर्भसन्धानकारिणी काचिदेका नाडी छेद्यते । नाडीच्छेदाच्चायं जातकः सूतीशरीराग्निपरित्यक्तः पृथग् भवति । सूती चेयं जातकशरीराग्निपरित्यक्ता भवति । अन्योन्यपरित्यागादियम-

शुद्धिः सूतिकायां जातके चोत्पद्य सम्बन्धसूत्रेण यावत्सम्बन्धिनि संक्रमते। तदिदमशौचमेतत्प्रकरणार्थः ॥ ४ ॥+॥

४३—तदित्थं जन्माशौचं चेतनाधिष्ठानभूतस्य धातुपञ्चकस्य चेतनाधातुतः पृथग्भावोपपादात्संजातो दोषविशेष एवाशौचमित्युच्यते । एतेनैव मरणाशौचमपि व्याख्यातम् । तत्रापि चेतनाधातोः पृथग्भावादधिष्ठानभूते पाञ्चभौतिकेऽस्मिन्, शवशरीरे दोषोत्पत्तेस्तुल्यत्वात् । एतदप्यशौचं निष्प्राणाङ्गे शवे सम्भूय सम्बन्धसूत्रेण यावत्सम्बन्धिनि संक्रमते, कालेन चापनोद्यते । तदिदमशौचमेतत्प्रकरणार्थः ॥ ५ ॥+॥

४४—एतेनैवोत्तरक्रियानिमित्तमप्याशौचं व्याख्यातम् । शवनिष्ठामेध्यतायाः स्पर्शादिसम्बन्धेनान्यत्र संक्रमणात् ॥ ६ ॥+॥

४४—अथ चेतना, सत्वं, शरीरं, चेत्येतत्त्रितयं पुरुष इत्युच्यते । तत्रायं चेतनाधातुः पर आत्मा निर्विकारः सर्वभूतानां निर्विशेषश्च । सत्वशरीरयोस्तु विशेषाद्विशेषोपलब्धिः । सत्वादारभ्य प्रवृत्तायां सन्ततिपरम्परायां शततमं सहस्रतमं लक्षतमं वा ततोऽप्यूर्ध्वतमं यावदुपलम्भं वा पुरुषमभिव्याप्यायं गोत्रव्यवहारः शक्यःकर्तुम् । किन्तु न तेषु सर्वेष्वविशेषेणेदमाशौचमभिसम्बध्यते । मूलपुरुषादेकविंशं पुरुषं यावदेव यथाकथञ्चिदाशौचाभिसम्बन्धस्य नियतत्वात् । तत्रापि नाविशेषेण सर्वत्र समानोऽभिसम्बन्धः । किन्तु यथा यथा मूलपुरुषाद्विप्रकर्षो घटते तथा तथा तद्द्वारकेऽशौचादिधर्माभिसम्बन्धेऽपि तारतम्यमुपपद्यते । तादृशतारतम्यानुरोधेनैवेदं गोत्रं सप्तसंख्यं कृत्वा विभज्यते । तथाहि—

१ त्रिपुरुषं यावत्— सन्निहितसपिण्डः स संनिकृष्टतमः । ३
२ सप्तपुरुषं यावत्— सपिण्डः स संनिकृष्टतरः । ४
३ दशपुरुषं यावत्— सकुल्यः स संनिकृष्टः । ३
४ चतुर्दशपुरुषं यावत्— सोदकः स मध्यमः । ४
५ सप्तदशपुरुषं यावत्— सन्निहितसगोत्रः स विप्रकृष्टः । ३
६ एकविंशपुरुषं यावत्—सगोत्रः स विप्रकृष्टतरः । ४
७ चतुर्विंशं यावत् तदूर्ध्वं च यथेच्छं ज्ञातिः स विप्रकृष्टतमः । ३

च द्वौ दोषौ—रजस्तमश्च । तौ सत्वं दूषयतः । तया च विशुद्धं सत्वं प्रसादः । सत्सम्बन्धाच्च विशुद्धा चेतनोपलभ्यते स प्रसादः । अथ तमः प्राधान्ये सति सत्वमविशुद्धं विदूषितं भवति । तदिदं दूषणमात्मनः शरीरस्य चोपघाताय प्रभवतीत्यतस्तस्य बन्धसो सलत्वमिष्यते ॥ तन्नि बन्धनममेध्यत्वमेव दोषाशौचम् । तद्धि दोषिसत्वशरीरस्थं तत्संसर्गिणि-च प्रवर्तते । तदिदमप्येतत्प्रकरणार्थः ॥७॥×॥

४६—तदित्थं निवृत्तचेतना भूतविकाराश्चेतनापकर्षकधर्मत्वानर्थश्चाशौचप्रभव इति सिद्धम् । प्रादुर्भावस्थानं प्रभवशब्देनाख्यायते । इति प्रभवविचारः ।

(२) सम्बन्धसूत्रम् ।

४७—व्यक्तिविशेषे कथंचिदुत्पद्यमानमशौचं तत्र व्यक्तौ निभृतमवस्थाय व्यक्त्यन्तरेऽपि संक्रमते । तच्च नाविशेषेण सर्वासु मनुष्यव्यक्तिषु यथेच्छं संक्रमते । किन्तु नियतं किञ्चित् संक्रमणद्वारमपेक्षते । तच्च द्वारं चतुर्विधः सम्बन्धः—योनिकृतः, विद्याकृतः, यज्ञकृतः, संसर्गकृतश्चेति । एषामन्यतमोऽपि सम्बन्धो यत्र नोपपद्यते तत्र व्यक्तौ नेदमघं समासज्जते । एतेषामेव चतुर्णां सम्बन्धानामघसंक्रामकत्वनियमात् । एतेषामेव च सम्बन्धानां तारतम्येनाशौचसंक्रमणेऽपि तारतम्यं घटते । अशौचस्यैतन्मूलकत्वात् । तस्मादवस्थितिज्ञानार्थं सम्बन्धसूत्रं यथातथ्येन विजानीयात् । इति सम्बन्धसूत्रविचारः ।

(३) योनिसम्बन्धाः ।

४८—क्वचिदेकस्मात् पुरुषादारभ्य प्रवृत्ता संततिपरम्परा गोत्रम् । एकस्मिन् गोत्रे परिदृष्टानामेकशाखानां भिन्नशाखानां वा तत्सम्बन्धिनां या पुरुषाणां परस्परं यः सम्बन्धः स योनिकृतः । यस्मात् पुरुषाद् गणनामारभ्य यद्गोत्रं निरूपयितुमिष्यते तत्र गोत्रे स बीजी पुरुषो मूलपुरुषः कूटस्थ इति चोच्यते ॥ तस्मान्मूलपुरुषादारभ्य प्रवृत्तायां संततिपरम्परायां शततमं, सहस्रतमं, लक्षतमं वा ततोऽप्यूर्ध्वतमं यावदुपलम्भं वा पुरुषमभिव्याप्यायं गोत्रव्यवहारः शक्यंकर्तुम् । किन्तु न तेषु सर्वेष्वविशेषेणेदमाशौचमभिसंबध्यते । मूलपुरुषादेकविंशं पुरुषं यावदेव यथाकथंचिदाशौचाभिसंबन्धस्य नियतत्वात् । तत्राऽपि नाविशेषेण सर्वत्र समानोऽभिसंबन्धः । किन्तु यथा यथा मूलपुरुषाद् विप्रकर्षो घटते

तथा तथा तद्द्वारकेऽशौचादिधर्माभिसंबन्धेऽपि तारतम्यमुपपद्यते । तादृशतारतम्यानुरोधेनैवेदंगोत्रं सप्तसंस्थं कृत्वाविभज्यते तथा हि—

१ त्रिपुरुषं यावत् सन्निहितसपिण्डः स संनिकृष्टतमः । ३ ।
२ सप्तपुरुषं यावत् सपिण्डः स संनिकृष्टतरः । ४ ।
३ दशपुरुषं यावत् सकुल्यः स संनिकृष्टः । ३ ।
४ चतुर्दशपुरुषं यावत् सोदकः स मध्यमः । ४ ।
५ सप्तदशपुरुषं यावत् सन्निहितसगोत्रः स विप्रकृष्टः । ३ ।
६ एकविंशंपुरुषं यावत् सगोत्रः स विप्रकृष्टतरः । ४ ।
७ चतुर्विंशं यावत्तदूर्द्ध्वं च यथेच्छं ज्ञातिः स विप्रकृष्टतमः । ३ ।

इह हि सन्निहितसपिण्डदूरसपिण्डयोः सन्निहितसगोत्रदूरसगोत्रयोश्चाशौचे विशेषो न स्मर्यते । सकुल्यसोदकयोरपि नातितरां विशेषः । तथाप्यन्यत्र धर्म्मप्रकरणे दृश्यते विशेष इतीहापि ज्ञप्तिपत्त्यर्थमित्यमुपदिष्टाः सप्तसंस्थाः ॥

सप्तास्वेताः संस्था मूलपुरुषादेवारभ्यन्ते । यथा हि मूलपुरुषात् त्रिपुरुषं सपिण्डास्तथा मूलपुरुषादेवैकविंशं यावत् सगोत्राः, न तु चतुर्दशादूर्द्धमेव सगोत्रत्वमार्त्तीयते । तथाप्याशौचाभिसम्बन्धतारतम्यानुरोधेन व्यवहारसौकर्य्यार्थमेषामुत्तरोत्तरं भेदेन व्यवहारः । तेन सप्तपुरुषादूर्द्ध्वं सकुल्यः । दशपुरुषादूर्द्ध्वं सोदकः । तदूर्द्ध्वं सगोत्र इत्येवं मेयम् । जन्मनाम्नोः स्मरणास्मरणाभ्यामाशौचादिधर्मे विशेषो घटते इत्यतस्तदनुरोधेन जन्मनामस्मृतिपर्यन्तं सोदकत्वव्यवहारस्तदस्मरणे त्वस्मत्कुलजोऽयमित्येतावन्मात्रज्ञानसत्त्वे सगोत्रत्वव्यवहारः. इति मन्वादयः स्मरन्ति ॥

यथाह बृहन्मनुः—सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु निवर्त्तता चतुर्दशात् ॥
जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते ॥१॥ इति

सप्तपुरुषं यावत् सपिण्डाः । चतुर्दशं यावत् सोदकाः । एकविंशं यावत् सगोत्राः ।

इत्येतेत्रयो विभागा एवाशौचधर्म्मे विशेषाधायकाः विशिष्यास्थेयाः । तत्र सपिण्डः सनाभिरित्यनर्थान्तरम् । सोदकः समानोदक इत्यनर्थान्तरम् । स गोत्रो गोत्रज इत्यनर्थान्तरम् । तेषामेषां सगोत्र-सोदक-सपिण्डानां यस्य येन यथा सम्बन्धस्तद्विज्ञानार्थं गोत्रमेरुः प्रदर्श्यते ।

गोत्रमेरुः सगोत्रमेरुश्च ।

इत्थं त्र्यस्रो गोत्रमेरुः, तत्रैकाङ्कोपलक्षितेष्टकाश्रेणिस्त्रिकोणस्य भुज इष्यते । एक द्वित्र्याद्येकविंशत्यवसानाङ्कोपलक्षितेष्टकामयो दामः स्तम्भः कोटिः । कोटिगताङ्कारब्धो भुजगतैकाङ्कावसानो दक्षिणः स्तम्भः कर्णः । स इह पिण्डिकाशब्देन व्यपदिश्यते । द्व्यङ्कारब्धकर्णस्तम्भः, दक्षिणपार्श्वे त्र्यङ्कारब्धकर्णस्तम्भ इत्येवमुत्तरोत्तरमेकैकाङ्कवर्द्धितैः कर्णस्तम्भैः सन्निवेशितैरत्र विंशतिस्त्र्यस्रा अन्तर्भवन्ति । तेषां त्र्यस्राणामुपरितने कोटिकर्णकोणे यः परमोऽङ्कः स मूलपुरुषः । इत्थं कोटिस्तम्भगता य एकविंशतिरङ्कास्ते प्रत्येकत्र्यस्राणां कूटस्थस्य भुजकोटिकोणस्थैकाङ्कोपलक्षितस्य मूलपुरुषाः स्युः । तदारब्धाः कर्णस्तम्भगताङ्कोपलक्षिताः पुरुषाः साध्याः । यत्प्रतियोगिकः सापिण्ड्यादिसम्बन्धो निरूप्यः स कूटस्थः । यदनुयोगिकः स सम्बन्धः स साध्यः । यथा—

सपिण्डमेरुः । सापिण्ड्यमेरुर्वा ॥

अस्मिन् सपिण्डपर्यवसाने गोत्रमेरौ ककारः कूटस्थः, स प्रथमः पुरुषः। स ह्ह स्वशब्देनोच्यते, तस्य खकारः पिता स द्वितीयः पुरुषः, तदारब्धकर्णस्तम्भगतो गकारो द्वितीयपिण्डिकायां स्वस्य भ्राता । १ । एवं घकारः स्वस्य पितामहस्तृतीयः पुरुषः । तदारब्धकर्णस्तम्भे चकारः स्वस्य पितृभ्राता, छकारस्तु तृतीयपिण्डिकायां स्वभ्राता । २ । एवं जकारश्चतुर्थपुरुषःस्वस्य प्रपितामहः । तदारब्धकर्णस्तम्भे झकारः स्वस्य पितामहभ्राता। टकारः पितृभ्राता । ठकारस्तु चतुर्थपिण्डिकायां स्वभ्राता । ३ । एवं डकारः पञ्चमपुरुषः स्वस्य वृद्धप्रपितामहः । तदारब्धकर्णस्तम्भे ढकारः पञ्चमपिण्डिकायां स्वभ्राता । ४ । णकारः षष्ठपुरुषः स्वस्यातिवृद्धप्रपितामहः । तदारब्धकर्णस्तम्भे तकारः षष्ठ्यां पिण्डिकायां स्वभ्राता । ५ । एवं सप्तमपुरुषो थकारो वृद्धातिवृद्धप्रपितामहः, स बीजी पुरुषो मूलपुरुषः कूटस्थो नाभिरिति चोच्यते । तदारब्धकर्णस्तम्भे दकारः सप्तम्यां पिण्डिकायां स्वभ्राता । ६ । एतावदिदं सासपौरुषं सापिण्ड्यम् । एवमेवोत्तरोत्तरं सोदकपर्यन्तं सगोत्रपर्यन्तं च व्यवसेयम् । परे तु एकः प्रथमः पिण्डदः पुरुषः, तदूर्द्ध्वं त्रयः पिण्डभागिनः पुरुषाः, तदूर्द्ध्वं त्रयः पिण्डलेपभागिनः पुरुषाः, इतीत्थं सासपौरुषं सापिण्ड्यं निरूप्य पिण्डदापेक्षया उपरितनैः षड्भिः पुरुषैरारब्धास्वेव षट्सु पिण्डिकासु प्रथमादिशब्दानुपचरन्ति । तन्मते पितुः पुत्रः, प्रथमपिण्डिकायां स्वभ्राता । १ । पितामहपौत्रो द्वितीयपिण्डिकायां स्वभ्राता । २ । प्रपितामहप्रपौत्रस्तृतीयस्यां भ्राता । ३ । वृद्धप्रपितामहस्य वृद्धप्रपौत्रश्चतुर्थ्यां भ्राता । ४ । अतिवृद्धप्रपितामहस्यातिवृद्धप्रपौत्रः पञ्चम्यां भ्राता । ५ । एवं वृद्धातिवृद्धप्रपितामहस्य वृद्धातिवृद्धप्रपौत्रः षष्ठ्यां भ्राता । ६ । तदित्थं षट्स्वेव पिण्डिकासु पिण्डदस्य सम्बन्धोऽनुवर्तते । सप्तम्यां तु पिण्डकायां निवृत्तोऽस्य सापिण्ड्यसम्बन्ध इति सिद्धम् ॥ तत्रायं शब्दव्यवहारमात्रे विशेषो न वस्तुतस्त्वे—इत्युपेक्ष्यम् ॥+॥ इति योनिसम्बन्धविचारः ॥

(४) योनिसम्बन्धप्रभेदाः ।

४९—योनिसम्बन्धस्त्रधा—मुख्य आरोपितस्तृतीयश्चेति। ये खलु कस्मिँश्चिद्गोत्रे समुत्पद्य यावज्जीवनं तस्मिन्नेव गोत्रेऽवतिष्ठन्ते न तु गोत्रान्तरे नीयन्ते तेषां स्वगोत्रजातैः सह परस्परं यः सम्बन्धः स मुख्यः । तत्र सो-

दरयोर्भ्रात्रोर्भगिन्योश्चैकशरीरावयवानुगमात्परस्परं यः साक्षात्सम्बन्धो, यो वा पुत्रपौत्रप्रपौत्रादिषूत्तरोत्तरक्रमेण परम्परया सम्बन्धः, सोऽयमुभयविधोऽपि मुख्यः ॥ अथारोपितः पुनस्त्रेधा-सगोत्रीकरणो, विगोत्रीकरणो, विगोत्रसापिण्ड्यं चेति। परगोत्रे समुत्पन्ना अपि संस्कारद्वारा तद्गोत्रात्प्रच्याव्य ये स्वगोत्रे सम्पाद्यन्ते तेषां स्वेन सगोत्रतां नीतानां स्वगोत्रे यः सम्बन्धः स सगोत्रीकरणः । यथा परकुलादानीतानां पत्नीनां श्वशुरकुलजैः, यथा वा दत्तकपुत्रादीनां प्रतिग्रहीतृकुलजैश्च सम्बन्ध इति। एवं स्वगोत्रे समुत्पन्ना अपि संस्कारद्वारा यत्र स्वगोत्रात् प्रच्याव्य परगोत्रे नीयन्ते तेषां स्वेन विगोत्रतां नीतानां जनयितृगोत्रजातैः सह यः सम्बन्धः स विगोत्रीकरणः । यथा विवाहितानां दुहितृणां दत्तकपुत्रादीनां च जनयितृकुलजैः सम्बन्ध इति॥ अथ ये भिन्नगोत्राः सपिण्डा आत्मबन्धुमातृबन्धुपितृबन्धुत्वादयस्तैः सह यः सम्बन्धः स विगोत्रसापिण्ड्याख्यः । केचित्तु पितृमातुलपुत्रादीनां सापिण्ड्यं नेच्छन्ति। तदेतल्लोकव्यवहारसापेक्षं बोध्यम् । लोके तेषु सापिण्ड्यव्यवहारस्य लुप्तप्रायत्वात्। वस्तुतत्त्वावमर्षे तु तेष्वपि सापिण्ड्यमप्रतिषिद्धम् ॥ अथ तृतीयोऽनेकधा-मुख्यसम्बन्धेन सम्बन्धिनां ये मुख्यसम्बन्धेन सम्बन्धिनो, ये वा तेषामारोपितसम्बन्धेन सम्बन्धिनः , अथवारोपितसम्बन्धेन सम्बन्धिनां ये मुख्यसंम्बन्धेन सम्बन्धिनो, ये वा तेषा मारोपितसम्बन्धेन सम्बन्धिनः, तैरेतैश्चतुर्विधैः सह यः सम्बन्धः स तृतीयः । यथा भ्रातृपुत्रैः, भ्रातृपत्नीभिः, यथा वा जामातृश्वशुरादिभिस्तद्भ्रात्रादिभिश्चेति ॥ एवमेतेष्वपि त्रिविधेषु योनिसम्बन्धेषु प्रत्येकं सन्निकर्षविप्रकर्षाभ्यां सारतम्यादनेके सम्बन्धा उपपद्यन्ते । ते यथायथमूह्याः। सम्भवमात्रेणायं विभागः कल्प्यते। अशौचसम्बन्धस्त्वेषु त्रिविधेष्वपि योनिसम्बन्धेषु भिन्ननियमो दृश्यते—क्वचिद्दशाहं क्वचिद्वा त्र्यहं तदर्धमेकाहं स्नानमात्रं चेति । तस्मादनुपयुक्तोऽयं विभागः ॥ * ॥ इति योनिसम्बन्धप्रभेदाः ॥

(५) विवाहसापिण्ड्यम् ।

५०—पूर्वं गोत्रमेरौ प्रदर्शितास्वेकविंशतिपुरुषारब्धासु पिण्डिकासु त्रि-

संस्थः सम्बन्धः सिद्धो भवति सप्तमं यावत् सापिण्ड्यम्, चतुर्दशं यावत् सोदकत्वम्, एकविंशं यावत् सगोत्रत्वमिति । तत्र सापिण्ड्यसम्बन्धं व्याख्यास्यामः । सापिण्ड्यं त्रेधा—विवाहसापिण्ड्यं, दायसापिण्ड्यम्, आशौचसापिण्ड्यं च । यद्यपि सापिण्ड्यमेकधैव न त्रेधा सम्भवति । एक पिण्डान्वयस्यैव सापिण्ड्यपदार्थतया पिण्डपदार्थान्वयकर्मणि विवाहादीनामप्रयोजकत्वात्तदनपेक्षमेवैकपिण्डान्वयवत्सु सर्वेष्वेव पुरुषेषु सापिण्ड्यव्यवहारस्यैकैनैव रूपेण प्रवर्त्तनीयत्वात् । तथापि सपिण्डानां मध्याद्यावतां विवाहे प्रतिषेध्यत्वेनापेक्षा तदनुगतं सापिण्ड्यं विवाहे निरूप्यते । यावतां तु दायक्रमे दायभागित्वेनापेक्षा तदनुगतमेव सापिण्ड्यं दाये प्रदर्श्यते । अथ यावतां सपिण्डानां परस्परमशौचभागित्वं प्रतिपद्यते तावन्मात्रानुगतं सापिण्ड्यमाशौचे निर्दिश्यते। विवाहप्रतिषेध्यत्वं दायभागित्वमशौचभागित्वं च नतरां सर्वेषु सपिण्डेषु समानम् । अतस्तदपेक्षाविशेषानुरोधेनेदं सापिण्ड्यं त्रेधा विभज्य निरूप्यते ।

५१—तत्रादौ विवाहसापिण्ड्यं व्याख्यास्यामः—सगोत्र-विगोत्र-साधारणं हीदं सापिण्ड्यम् । तत्र बीजिनमारभ्य पुत्रपक्षे सप्तपुरुषमभिव्याप्य, कन्यापक्षे तु पञ्चपुरुषमभिव्याप्य, सर्वेषां सन्तानानां सन्तानिनां च परस्परं सापिण्ड्यम् । एकस्यापि सप्ताधिक्यत्वे तेन सर्वं सप्तान्तर्गतस्यापि सापिण्ड्यं निवर्तते। संयोगवत् सापिण्ड्यस्योभयनिरूप्यत्वादिति वाचस्पतिमिश्रकेशवमिश्राम्बृतनाथाद्यः स्वीकुर्वन्ति । एतच्च सापिण्ड्यमनेकधा निरूपयन्ति विद्वांसः । तत्र दाक्षिणात्यानां निबन्धे यथेदं विवाहसापिण्ड्यमभ्युपेयते तथेह प्रदर्शयिष्यामः । तच्चावरं कूटस्थमारभ्योपरितनानां पितृतः सप्तस्थानानां द्वात्रिंशत्पितृद्वन्द्वानां प्रत्येकस्य सप्तस्थानान्येवापत्यद्वन्द्वानि त्रिषष्टिसितानि, तथा मातृतः पञ्चस्थानानां सप्तानां पितृद्वन्द्वानां प्रत्येकस्य पञ्चस्थानान्येवापत्यद्वन्द्वानि पञ्चदशसितानि-इत्येवं गणनयैकविंशत्यधिकैकविंशतिशतद्वन्द्वव्याप्यं भवति ।

तद्यथा—

अथावशिष्टानां सप्तदन्द्वानां मातृपदयाणां प्रत्येकस्य पञ्चदशमितान्यपत्यद्वन्द्वानि प्रदर्शिते सप्तकेऽपत्यद्वन्द्वपक्षेऽन्त्ययोर्द्वयोः कक्षयोः परित्यागादशेषादुपलभ्यन्ते । तेषामेषां जनकद्वन्द्वानां जन्यद्वन्द्वानां च यानि सम्बन्धक्रमाणि नामानि तान्यत ऊर्ध्वं प्रदर्श्यन्ते:—

प्रतिस्थानं द्वन्द्वसंख्या	वरसम्बन्धिनः समष्टिसंख्या	जनकद्वन्द्वानां प्रतिजनकद्वन्द्वं जन्यद्वन्द्वानां समष्टिसंख्या	जन्यद्वन्द्वसंख्या समष्टिसंख्या
प्रथमस्थाने वरः केवलः—			
द्वितीयस्थानेद्वन्द्वमेकम्			
वरस्यपितरौ	१	६३	६३
तृतीयस्थानेद्वन्द्वमेकम्,			
१ पितामहौ	२	६३	१२६
चतुर्थस्थानेद्वे द्वन्द्वे—			
१ प्रपितामहौ	३	६३	१८९
२ पितृमातामहौ	४	६३	२५२
पञ्चमस्थानेचत्वारिद्वन्द्वानि—			
१ वृद्धप्रपितामहौ	५	६३	३१५
२ पितामहमातामहौ	६	६३	३७८
३ पितृप्रमातामहौ	७	६३	४४१
४ पितामहीमातामहौ	८	६३	५०४
षष्ठस्थानेऽष्टौद्वन्द्वानि—			
१ अतिवृद्धप्रपितामहौ	९	६३	५६७
२ प्रपितामहमातामहौ	१०	६३	६३०
३ पितामहप्रमातामहौ	११	६३	६९३
४ प्रपितामही मातामहौ	१२	६३	७५६
५ पितृवृद्धप्रमातामहौ	१३	६३	८१९
६ पितृमातामहप्रमातामहौ	१४	६३	८८२
७ पितामही प्रमातामहौ	१५	६३	९४५
८ पितामहीमातृमातामहौ	१६	६३	१००८

सप्तमस्थाने षोडशद्वन्द्वानि—

१ परमातिवृद्धप्रपितामही	१७	६३	१०७१
२ वृद्धप्रपितामहमातामही	१८	६३	११३४
३ प्रपितामहप्रमातामही	१९	६३	११९७
४ वृद्धप्रपितामहीमातामही	२०	६३	१२६०
५ प्रपितामहीप्रपितामही	२१	६३	१३२३
६ प्रपितामहीपितृमातामही	२२	६३	१३८६
७ प्रपितामहीप्रमातामही	२३	६३	१४४९
८ प्रपितामहीमातृमातामही	२४	६३	१५१२
९ पितामहीवृद्धप्रपितामही	२५	६३	१५७५
१० पितृप्रमातामहमातामही	२६	६३	१६३८
११ पितृमातामहप्रमातामही	२७	६३	१९०१
१२ पितृमातामहमातृमातामही	२८	६३	१७६४
१३ पितामहीवृद्धप्रमातामही	२९	६३	१८२७
१४ पितामहीमातामहमातामही	३०	६३	१८९०
१५ पितामहीमातामहीपितामही	३१	६३	१९५३
१६ पितामहीमातामहीमातामही	३२	६३	२०१६

एवमुक्तानि पितृपदयाणि जनकद्वन्द्वानि द्वात्रिंशन्मितानि । यानि त्वेषां प्रत्येकस्य जन्यद्वन्द्वानि त्रिषष्टिमितानि तान्यत्र उद्धृत्य प्रदर्श्यन्ते—

प्रथमे स्थाने कूटस्थद्वन्द्वमेकम्—

* मातापितरौ

द्वितीयस्थाने द्वन्द्वमेकम्—

१ कूटस्थस्य, पुत्रः दुहिता च	१

तृतीयस्थाने द्वन्द्वे द्वे—

१ पौत्रः पौत्री च	२
२ दौहित्रः दौहित्री च	३

चतुर्थस्थाने द्वन्द्वानि चत्वारि—

१ प्रपौत्रः प्रपौत्री च	४
२ पौत्रीपुत्रः पौत्रीपुत्री च	५
३ दौहित्रपुत्रः दौहित्रपुत्री च	६
४ दौहित्रीपुत्रः दौहित्रीपुत्री च	७

पञ्चमस्थाने द्वन्द्वान्यष्टौ—

१ वृद्धप्रपौत्रः वृद्धप्रपौत्री च	८
२ प्रपौत्रीपुत्रः प्रपौत्रीपुत्री च	९
३ पौत्रीपौत्रः पौत्रीपौत्री च	१०
४ पौत्रीदौहित्रः पौत्रीदौहित्री च	११
५ दौहित्रपौत्रः दौहित्रपौत्री च	१२
६ दौहित्रदौहित्रः दौहित्रदौहित्री च	१३
७ दौहित्रीपौत्रः दौहित्रीपौत्री च	१४
८ दौहित्रीदौहित्रः दौहित्रीदौहित्री च	१५

षष्ठस्थाने षोडश द्वन्द्वानि—

१ अतिवृद्धप्रपौत्रः अतिवृद्धप्रपौत्री च	१६
२ प्रपौत्रदौहित्रः प्रपौत्रदौहित्री च	१७
३ प्रपौत्रीपौत्रः प्रपौत्रीपौत्री च	१८
४ प्रपौत्रीदौहित्रः प्रपौत्रीदौहित्री च	१९
५ पौत्रीप्रपौत्रः पौत्रीप्रपौत्री च	२०
६ पौत्रीपुत्रदौहित्रः पौत्रीपुत्रदौहित्री च	२१
७ पौत्रीपुत्रीपौत्रः पौत्रीपुत्रीपौत्री च	२२
८ पौत्रीपुत्रीदौहित्रः पौत्रीपुत्रीदौहित्री च	२३
९ दौहित्रप्रपौत्रः दौहित्रप्रपौत्री च	२४
१० दौहित्रपुत्रदौहित्रः दौहित्रपुत्रदौहित्री च	२५
११ दौहित्रपुत्रीपौत्रः दौहित्रपुत्रीपौत्री च	२६
१२ दौहित्रपुत्रीदौहित्रः दौहित्रपुत्रीदौहित्री च	२७
१३ दौहित्रीपुत्रपौत्रः दौहित्रीपुत्रपौत्री च	२८

१४ दौहित्रीपुत्रदौहित्राः दौहित्रीपुत्रदौहित्री च २९
१५ दौहित्रीपुत्रीपौत्राः दौहित्रीपुत्रीपौत्री च ३०
१६ दौहित्रीपुत्रीदौहित्राः दौहित्रीपुत्रीदौहित्री च ३१

समस्थाने त्वासामेव षष्ठस्थानानां द्वात्रिंशद्व्यक्तीनां पुत्रकन्यारूपाणि द्वात्रिंशद्द्वन्द्वानि । तान्येतानि सर्वाणि सङ्कलनया त्रिषष्टिमितानि द्वन्द्वानि भवन्ति । तत्रगताश्च तास्त्रिषष्टिमिताः कन्यास्तेन वरेणाविवाह्याः । तदित्थं पितृपक्षे सङ्कलनायां षोडशाधिकद्विसहस्रमिताः कन्या वर्ज्यत्वेन सिद्धाः ॥ (२०१६) ॥

अथ मातृतस्तावत् पञ्चस्थानानि जनकद्वन्द्वानि सप्त भवन्ति । तथाहि—

	जनकद्वन्द्वानां	प्रति-जनक-द्वन्द्वं	जन्यद्वन्द्वानि [संख्या	जन्यद्वन्द्वसंख्यानां समष्टिसंख्या
प्रथमस्थाने—	वरः केवलः ।			
द्वितीयस्थाने—	वरस्य माता ।			
तृतीयस्थाने—	मातामहौ ।	१	१५	१५
चतुर्थस्थाने—	प्रमातामहौ ।	२	१५	३०
	मातृमातामहौ ।	३	१५	४५
पञ्चमस्थाने—	वृद्धप्रमातामहौ ।	४	१५	६०
	मातामहमातामहौ ।	५	१५	७५
	मातृप्रमातामहौ ।	६	१५	९०
	मातामही मातामहौ	७	१५	१०५

एवमुक्तानि मातृपक्ष्याणि जनकद्वन्द्वानि सप्तमितानि । एषामपि यानि प्रत्येकस्य जन्यद्वन्द्वानि पञ्चदशमितानि तानि प्रदर्श्यन्ते—।

प्रथमस्थाने—किञ्चिदेकं मूलद्वन्द्वं मातापितरौ कूटस्थम् ।
द्वितीयस्थाने—कूटस्थस्य पुत्रो दुहिता च ।
तृतीयस्थाने—पौत्रः पौत्री च ।
दौहित्रो दौहित्री च ।

चतुर्थस्थाने—प्रपौत्रः प्रपौत्री च ।
पौत्रीपुत्रः पौत्रीपुत्री च ।
दौहित्रपुत्रः दौहित्रपुत्री च ।
दौहित्रीपुत्रः दौहित्रीपुत्री च ।

पञ्चमस्थाने—वृद्धप्रपौत्रः वृद्धप्रपौत्री च ।
प्रपौत्रीपुत्रः प्रपौत्रीपुत्री च ।
पौत्रीपौत्रः पौत्रीपौत्री च ।
पौत्रीदौहित्रः पौत्रीदौहित्री च ।
दौहित्रपौत्रः दौहित्रपौत्री च ।
दौहित्रदौहित्रः दौहित्रदौहित्री च ।
दौहित्रीपौत्रः दौहित्रीपौत्री च ।
दौहित्रीदौहित्रः दौहित्रीदौहित्री च ।

इत्थमेषां पञ्चस्थानानां पञ्चदशानां जन्यद्वन्द्वानां पूर्वोक्तेषु षट्सु जनकद्वन्द्वेषु प्रत्येकं निपाते पञ्चोत्तरशतसितानि मातृपक्षे द्वन्द्वानि लभ्यन्ते । तत्रगताश्च ताः पञ्चोत्तरशतसिताः कन्या मातृपक्षे वर्ज्यत्वेन सिद्धाः। तदित्थं—पितृकुले षोडशाऽधिकद्विसाहस्री २०१६, मातृ कुले तु पञ्चोत्तरं शतम् १०५ । अनयोः संकलनायामेकविंशत्यधिकैकविंशतिशतसंख्या २१२१ सिद्धा भवति । एतावत्यः कन्या विवाहे वर्ज्याः । एतावद्व्याप्यमेव च विवाहसापिण्ड्यम्—इत्याहुर्दाक्षिणात्यानां केचित् ॥ गौडास्तु नैतं प्रकारं साधीयोऽनुमन्यन्ते । इत्थं सापिण्ड्यस्य भ्रमपूर्णत्वात् । यत्तु खलु गौड-मैथिलाद्यनुगृहीतं विशुद्धं विवाहसापिण्ड्यं तत्तद्ग्रन्थे दृश्यते तदन्यत्र समीक्षायां विवाहसंस्कारनिरूपणप्रसङ्गे वैशद्येन प्रदर्शयिष्यामः ॥

इतिविवाहसापिण्ड्यम् ॥

(६) दायसापिण्ड्यम् ।

५२—निरूपितं विवाहसापिण्ड्यम् । अथ प्रसङ्गाद्दायसापिण्ड्यं निरूप्यते । दायविभागे तावत्—स्वं, पिता, पितामहः, प्रपितामहः—इत्येते चत्वारः; तथतेषां चतुर्णां प्रत्येकस्य पुत्रपौत्रप्रपौत्राश्च—इत्येवमेते षोडश पुरुषा मिथः सपिण्डाः । तत्र स्वं, तस्य पुत्रपौत्रप्रपौत्राश्चेति चतुष्कं स्ववर्गः

एवं पितृवर्गः । एवं पितामहवर्गः । एवं प्रपितामहवर्गः । इत्थं वर्गभेदाच्चतुःपौरुषं सापिण्ड्यम् । वंशक्रमे तु प्रपितामहेन प्रथमपुरुषानुगमः । पितामहेन प्रपितामहपुत्रैश्च द्वितीयपुरुषानुगमः । पित्रा पितामहपुत्रैः प्रपितामहपौत्रैश्च तृतीयपुरुषानुगमः । स्वेन पितृपुत्रैः पितामहपौत्रैः प्रपितामहप्रपौत्रैश्च चतुर्थपुरुषानुगमः । स्वपुत्रैः पितृपौत्रैः पितामहप्रपौत्रैश्च पञ्चमपुरुषानुगमः । स्वपौत्रैः पितृपौत्रैश्चषष्ठपुरुषानुगमः स्वप्रपौत्रैस्तु सप्तमपुरुषानुगमः । तदित्थं—पिता, पितामहः, प्रपितामहश्चेति त्रयः पुरुषाः कूटस्थादुपरितनाः; पुत्रः पौत्रः, प्रपौत्रश्चेति त्रयः कूटस्थादधस्तनाः; कूटस्थश्चैको मध्यमः पुरुष इत्येवं कक्षाभेदात् सप्तपौरुषं सापिण्ड्यं सिद्धम् । यथा—

तत्र प्रथमं स्ववर्ग्याः पुत्रादयः क्रमेण दायं भजन्ते । स्ववर्ग्याभावे पितृवर्ग्याः । तदभावे पितामहवर्ग्याः । तदभावे प्रपितावहवर्ग्याः—इति दायग्रहणक्रमः । प्रत्यासत्तिरेवात्र मूलम् । प्रपितामहवर्ग्यापेक्षया पितामहव-

र्य्याणां तदपेक्षया च पितृवर्य्याणां ततोऽपि स्ववर्य्याणां यप्रत्यासन्नत्वात् । प्रतिवर्गमपि प्रपौत्रापेक्षया पौत्रस्य ततः पुत्रस्य ततोऽपि वर्गारम्भकस्य पित्रादेः प्रत्यासन्नत्वात् ॥ तदुक्तम्-"यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत्" इति तथा चात्र दायभागे पिता, पितामहः प्रपितामह इत्येते त्रयः पूर्वे; पुत्रः, पौत्रः, प्रपौत्र इत्येते त्रयः परे; मध्यमश्चैकः कूटस्थ—इति सामपौरुषं दायसापिण्ड्यं व्याख्यातम् । इति दायसापिण्ड्यम् ।

(७) आशौचसापिण्ड्यम् ।

५३—अथाशौच-सापिण्ड्यं चतुर्धा—अवयवसापिण्ड्यम्, पुत्रे निवाप्य सापिण्ड्यम्, पितृषु निवाप्य सापिण्ड्यम्, उत्तरसापिण्ड्यं चेति, तथाहि—पुत्रे, पौत्रे, प्रपौत्रे, वृद्धप्रपौत्रे, अतिवृद्धप्रपौत्रे, परमाति-वृद्धप्रपौत्रे, च जनकैकशरीरावयवा अनुवर्तन्ते नातऊर्ध्वम् । तथा च षडपत्यानि, एकः कूटस्थो जनक—इति सामपौरुषमवयवसापिण्ड्यं भवति । तदुक्तम्—"सपिण्डता तु पुरुषे सप्तमे विनिवर्तते" इति ॥ तत्रा-ष्टाविंशतिकलस्तावत् पितृरूपैकशरीरस्थस्तदेकशरीरावयवोमूलसपिण्डः । तस्योत्तरोत्तरमनुवर्तमानानामेकशरीरावयवानां पिण्डभागानामित्थं मात्रा-विभागा भवन्ति । सप्तकलः स्वस्मिन्, षट्कलः पुत्रे, पञ्चकलः पौत्रे, चतु-ष्कलः प्रपौत्रे, त्रिकलो वृद्धप्रपौत्रे, द्विकलोऽतिवृद्धप्रपौत्रे, एककलस्तु परमातिवृद्धप्रपौत्रे, इति—तदित्थं सप्तस्थानेषु विभक्ता एते निवाप्याः पिण्डभागा एवैतेषां सप्तानां परस्परं सम्बन्धसूत्रम् । एष चैकपितृप्रति-योगिकः षडपत्यानुयोगिकः सम्बन्धः—इत्यवयवसापिण्ड्यम् ॥ १ ॥

५४—यत्तु एकस्मिन् कूटस्थेऽपत्ये पूर्वेषां षण्णां पितृणां भिन्नभिन्ना अवयवा ऐक्यभावाय समुच्चीयन्ते तदिदं पुत्रे निवाप्यसापिण्ड्यं भवति । तत्र चतुरशीतिकलस्तावत् पुत्ररूपैकशरीरस्थः सप्तशरीरावयवो मूलपिण्डः । तस्यैकत्र शरीरे समुच्चीयमानस्यारम्भकाणां सप्तशरीरावयवानां पिण्डभागानामित्थं मात्राविभागा भवन्ति—एककलः परमातिवृद्धप्रपितामहस्य । त्रिकलोऽतिवृद्धप्रपितामहस्य । षट्कलो वृद्ध प्रपितामहस्य । दशकलः प्रपितामहस्य । पञ्चदशकलः पितामहस्य । एकविंशतिकलः पितुः । अष्टाविंशतिकलस्तु स्वस्येति । तदित्थं सप्तस्थानेभ्यो लब्धा एते निवाप्याः

पिण्डभागा एवैतेषां सप्तानां परस्परं सम्बन्धसूत्रम्। स एष षट्पितृप्रतियोगिक एकापत्यानुयोगिकः सम्बन्धः। इति पुत्रे निवाप्य सापिण्डयम्२॥

५५—एतत्सम्बन्धद्वयमेवोपजीव्येदमेकैकमपत्यमपि पूर्वेषु षट्सु पितृषु पिण्डान्निवाप्य विभागेन लाभाप्याययति। तत्रेदमपत्यं तावदेकं पिण्डदं कूटस्थम्। तत उर्ध्वास्त्रयः पिण्डभागिनः। ततोऽप्यूर्ध्वास्त्रयः पिण्डलेपभागिनः—इत्येवं साप्तपौरुषं पितृषु निवाप्यसापिण्डयम्। सदुक्तम्-

५६—" लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ॥
पिण्डदः सप्तमस्तेषां सापिण्डयं साप्तपौरुषम्' ॥१॥इति

कथं चैतेऽपत्येन न्युप्ताः पिण्डा उर्ध्वं पितृषु षट्स्वाप्यायका भवन्तीत्येतन्निवापतत्त्वं श्राद्धतत्त्वसमीक्षायामन्यत्रोपपादयिष्यामः ॥ इति पितृषु निवाप्यसापिण्डयम् ॥ ३ ॥

अथोत्तर सापिण्ड्यं, प्रेतसापिण्डयं, प्रत्यर्घ्यसापिण्डयमित्येकार्थाः। इहहि मरणोत्तरं यदस्य सपिण्डीकरणं क्रियते तन्निबन्धनो निवापक्रमः प्रदर्श्यते। सन्तानोत्पादनादूर्ध्वं तदुत्पादकशरीरे सप्तकोशावयवा अष्टाविंशतिकला अवशिष्यन्ते। स प्रेत्य पितृलोकं गत्वा ततः स्वीयाभिः सप्तकलाभिः पृथगिवात्मानं धारयमाणः षट्कलाभिः पितृदत्ताभिः पित्रा, षड्भिकलाभिः पितामहदत्ताभिः पितामहेन, चतुः कलाभिः प्रपितामहदत्ताभिः प्रपितामहेन, त्रिकलाभिर्वृद्धप्रपितामहदत्ताभि स्तेन, द्वाभ्यामतिवृद्धप्रपितामहदत्ताभ्यां तेन, तथैकया कलया परमातिवृद्धप्रपितामहदत्तया तेन सह संधत्ते। स इत्थं सपिण्डनात् पूर्वैः षड्भिः पुरुषैः सहैकभाव्यं गमितश्चन्द्रलोके कञ्चित्कालमवतिष्ठते तदेतदप्यन्यत्रोपपादयिष्यामः॥*॥ इत्युत्तरसापिण्ड्यम् ॥ ४ ॥

(८) पिण्ड-रहस्यम्

५७—अथैतेषां चतुर्विधानामप्याशौचसापिण्ड्यानामुपपत्तिज्ञानार्थं सापिण्ड्यगतपिण्डपदार्थः पूर्वं प्रदर्शितोपीदानीं वैशद्येन पुन निरूप्यते। एकपिण्डान्वयः सापिण्ड्यम्। पिण्डस्तु मूलपुरुषो वा तच्छरीरावयवो वा निवापो वा अन्नपाको वा सोमाग्निमयं शुक्रशोणितद्रव्यं वेत्यनेकधा

पश्यन्ति । शुक्रनिपातो बीजपिण्डः । शोणितनिवापस्तु क्षेत्रपिण्डः ॥ तत्र तावत् सोमसयशुक्रनिवापं व्याख्यास्यामः । चेतनाधातुषष्ठाः पञ्चभूत-विकाराः शुक्रम् । प्रकारान्तरेण चेतनाधिष्ठितं तेजोऽन्नमयं शुक्रम् । तत्र यावती पृथिवी यावानग्निस्तदन्नम् । यावज्जलं यावान् वायुस्ता आपः यावानाकाशस्तत्तेजः, स सोमः । स हि शुक्रगतः सप्तकोशो निवाप्यः सोमः । तत्र तावत् प्रथमकोशोऽष्टाविंशतिकलः । २८ । द्वितीय एकविंशतिकलः । २१ । तृतीयः पञ्चदशकलः । १५ । चतुर्थो दशकलः । १० । पञ्चमः षट्कलः । ६ । षष्ठस्त्रिकलः । ३ । सप्तम एककलः । १ । इत्थं चतुरशीतिकलोऽयं निवाप्यः सोमः । स कूटस्थस्य शरीरावयवो भवति । तदिदं सोमद्रव्यम् । तत्रैकस्तृतीयांशः स्वो भागः । द्वौ तृतीयांशौ तु पूर्वेषां षण्णां पितृणां भाग इत्यवसेयम् । अथात्र प्रथमादष्टाविंशतिकलात् कोशाच्चतुर्थांशात्मिकाः सप्तकला अतिरिच्यैकविंशतिकलाभिरन्यः कोश उत्पद्यते । द्वितीयादेकविंशतिकलात् सार्द्धतृतीयांशात्मिकाः षट्कला अतिरिच्य पञ्चदश कलाभिरन्यः । तृतीयात्पञ्चदशकलात् तृतीयांशात्मिकाः पञ्चकला अतिरिच्य दशकलाभिरन्यः । चतुर्थाद्दशकलात् सार्द्धद्वितीयांशात्मिकाश्चतुःकला अतिरिच्य षट्कलाभिरन्यः । पञ्चमात् षट्कलाद्द्वितीयांशात्मिकास्तिस्रः कला अतिरिच्य त्रिकलाभिरन्यः । षष्ठात् त्रिकलात् सार्द्धैकांशात्मिके द्वेकले अतिरिच्यैकया कलया चान्यः । सप्तमात्त्वेकं कलादेकांशात्मिकामेकां कलामतिरिच्य शून्यकलया चान्यः । तत्र शून्यकलस्य सप्तमस्यासत्व-प्रायत्वात् षट्कोशो निवापः पृथिवीस्थानादन्तरिक्षे संतानिवोऽङ्कुरो-द्गम इव पितृशरीरान्मातरिसंतानितः षाट्कौशिकशरीरात्मना परिण-मते । सोयमित्थं षट्पंचाशत्कलः षट्कोशो निवापः पिण्डापरपर्यायः सुतशरीरस्योपादानं सम्पद्यते । तेन चतुरशीतिकलादात्मनो निवाप्य सोमद्रव्यान्मूलराशिरूपादिदानीं षट्पञ्चाशत्कलाभिर्निवापरूपाभिः पत्नी-शरीरे सुत्वा स्वयमष्टाविंशतिकलः पिता अवशिष्यते । सुतस्तु षट्-पञ्चाशत्कल एवादौ भूत्वा स्वशरीरे संचरता चन्द्रेण षोडशिना षोडशभिः संवत्सरैः सम्पादितेनान्येनाष्टाविंशतिकलेन कोशेन संभूय चतुरशीति-कलः पूर्णः पुरुषो भवति । यथा—

२८
२१ २८
१५ २१ २८
१० १५ २१ २८
६ १० १५ २१ २८
३ ६ १० १५ २१ २८
१ ३ ६ १० १५ २१ २८
१ ३ ६ १० १५ २१ २८
१ ३ ६ १० १५ २१ २८
१ ३ ६ १० १५ २१ २८
१ ३ ६ १० १५ २१ २८
१ ३ ६ १० १५ २१ २८
१ ३ ६ १० १५ २१ २८

सचायमेकः शरीरी स्वीयाभिरष्टाविंशतिकलाभिः समन्वितः पितुरेकविंशतिकलाभिः, पितामहस्य पञ्चदशकलाभिः, प्रपितामहस्य दशकलाभिः, वृद्धप्रपितामहस्य षट्कलाभिः, अतिवृद्धप्रपितामहस्य चतसृभिः कलाभिः, परमातिवृद्धप्रपितामहस्यैककलया च संबद्धं सप्तकोशं चतुरशीतिकलं शरीरं लब्ध्वा पित्रादीनांमृणी भवति । स पुनः स्वभागादेकविंशतिकलाः, पितुर्भागात् पञ्चदशकलाः, पितामहभागाद्दशकलाः, प्रपितामहभागात् षट् कलाः, वृद्ध प्रपितामहभागात् त्रिकलाः, अतिवृद्धप्रपितामहभागादेककलां च पुत्रे; ततो भूयस्तदनन्तरास्तास्ताः पञ्चदशादिकाः कलाः पौत्रे; ततो दशादिकाः कलाः प्रपौत्रे; पुनः षडादिकाः कला वृद्धप्रपौत्रे; पुनस्त्र्यादिकाः कला अतिवृद्धप्रपौत्रे; पुनरेकां कलां परमातिवृद्धप्रपौत्रे न्युप्य पितृलब्धभागानां पुत्रादिष्वन्वयात् स्वयमनृणो भवति । स स्वीयाभ्योष्टाविंशतिकलाभ्यः सप्तकलामात्रमपरित्यज्य तदतिरिक्ता स्वेकविंशतिकलास्तु षट्कलाः पुत्रे, पञ्च कलाः पौत्रे, चतस्रःकलाः प्रपौत्रे, तिस्रःकला वृद्धप्रपौत्रे, द्वे कले अतिवृद्धप्रपौत्रे, एकां कलां परमातिवृद्धप्रपौत्रे—न्युप्य तेन पितृभ्यः स्वधाकारप्रत्यर्पणार्थमस्यां पृथिव्यां द्वारान्तरमुत्पाद्य स्वयमृणात् पित्र्यात् प्रमुच्यते ।अथवाऽयं

पुरुषोयमष्टाविंशतिकलं सोम कोशं स्वतो लभते । ततः सप्त कलमात्मन्याधायैक विंशति कला अपत्येषु क्रमेण स्रवति । ताः स्रुता यदि पुनः कलान्तरेणात्मनि लभते तदा पुनः संपद्यते । तत्र पौत्रकर्तृके सपिण्डने पुत्रगताः षट्कला लभते । एवं प्रपौत्रकृते सपिण्डने पौत्रगताः पञ्च कलाः । वृद्धप्रपौत्रकृते चतस्रःकलाः । अति वृद्ध प्रपौत्रकृते तिस्रः कलाः । परमातिवृद्ध प्रपौत्र कृते द्वे कले । अष्टमापत्यकृते तु सपिण्डीकरणेऽन्त्यामेकां कलामप्युपलभ्याष्टाविंशतिकलस्य पूर्णस्यात्मीय-सोम-पिण्डस्यात्मन्येव समर्पणात्पूर्णो भूत्वा पृथिव्या त्यक्तसम्बन्धसूत्रो बन्धनाद्विमुच्यते ॥ स इत्थं विशुद्धो मुक्तबन्धनः स्वां गतिं प्रतिपद्यते । चन्द्रलोका दुत्थायादित्यलोकं गच्छतीत्याहुः स्मृतिविदः ॥ तथा चात्र प्रतिशरीरं चतुरशीति कलं सोमद्रव्यं सिद्धं भवति । तत्राष्टाविंशतिकला यावज्जीवन मात्मन्येव निहिता देहत्यागोत्तरं तेष्वेव पितृषु पुनः प्रत्यर्प्यन्ते । यथा परमाति वृद्धे प्रपितामहे एका कला, अति वृद्धे प्रपितामहे द्वे कले, वृद्धे प्रपितामहे तिस्रः कलाः, प्रपितामहे चतस्रः कलाः, पितामहे पञ्चकलाः, पितरि षट्कलाः—प्रत्यर्प्यन्ते । अवशिष्टाभिस्तु सप्तकलाभिरात्मानं पृथगिव धत्ते । तदित्थमेत. ाविंशतिकला यावज्जीवनमात्मन्येव निधेयाः, न तु पुत्रेषु निवाप्या इत्युक्तम् । परास्तु षट् पञ्चाशत् कलाः सूयन्ते । स निवापः स पिण्ड इतिसिद्धम् । यथा—

सप्तकोशचक्रम्

	मूलकलाः		आत्मनिधेयकलाः		निवाप्यकलाः
परमाति वृद्ध प्रपितामह कलाः	१	—	१	=	०
अतिवृद्धप्रपितामह कलाः	३	—	२	=	१
वृद्ध प्रपितामहाल्लब्धाः कलाः	६	—	३	=	३
प्रपितामहाल्लब्धाः कलाः	१०	—	४	=	६
पितामहाल्लब्धाः कलाः	१५	—	५	=	१०
पितुर्लब्धाः कलाः	२१	—	६	=	१५
स्वतो लब्धाः कलाः	२८	—	७	=	२१
सप्तकोशकलायोगः—	८४	—	२८	—	५६

सप्तपदीचक्रम्

परमातिवृद्ध प्रपितामहे	अतिवृद्ध प्रपितामहे	वृद्ध प्रपितामहे	प्रपिता महे	पितामहे	पितरि	स्वस्मिन्	
१	२	३	४	५	६	७	पितृषु निवापः
१	३	६	१०	१५	२१	२८	कूटस्थ मूलराशिः
०	१	३	६	१०	१५	२१	अपत्येषु निवापः
...	परमातिवृद्ध प्रपौत्रे	अति वृद्ध-प्रपौत्रे	वृद्ध प्रपौत्रे	प्रपौत्रे	पौत्रे	पुत्रे	

एव मयं चतुरशीति कलात् सोमद्रव्यान्मूलराशेरनिवाप्य आग्नेष्टा-विशतिकलेऽतिरेचितेऽवशिष्टः षडपञ्चाशत्कलो निवापः पितृभागः । अ-ष्टाविंशतिकलो वृद्धिराशिः स्वभागः । ताभ्यामन्ववेताभ्यां पुनरन्य श्चनुरशीतिकलः सोमद्रव्यः सप्तकोशः संपद्यते । स उत्तरत्र निवापाय मूल राशि भवति । इत्थमावंशविच्छेदमुत्तरोत्तरक्रमो नेयः । यथा—

पितृलब्ध राशिः मूलराशिः	पितृनिवाप्यराशिः अनिवाप्य राशिः—	सवनीयराशिः पुत्रनिवाप्य— राशिः	
८४	— २८	= ५६	पितृभागः
		२८	स्वभागः
		८४—२८ = ५६	पितृभागः
		२८	स्वभागः
		८४-२८-५६	पि० भा०
		२८	स्व भा
		८४	

तथा चैत्थमस्य सन्तानक्रम निष्कर्षः ॥ प्रति शरीरं सप्तकोशश्चतुरशीति कलः स्वोमद्रव्यम् । तत्राष्टाविंशतिकलः सप्तमः कोशः स्वधनम् । तस्य सप्त कलाः स्वस्मिन् । षट् पुत्रे । पञ्च पौत्रे । चतस्रः प्रपौत्रे। तिस्रो वृद्धप्रपौत्रे । द्वे अतिवृद्धप्रपौत्रे । एका तु परमातिवृद्धप्रपौत्रे । इत्थं सप्त पुरुषविभागेन सर्वाः कलाः सन्तानिताः सत्यः परत्र निरवशेषा भवन्ति । * १* । यस्त्वेकविंशति कलः षष्ठः कोशः पितृधनम् । तस्य षट् कलाः स्वस्मिन् । पञ्च पुत्रे । चतस्रः पौत्रे । तिस्रः प्रपौत्रे । द्वे वृद्ध प्रपौत्रे । एका त्वतिवृद्ध प्रपौत्रे । इत्थं षट्पुरुषविभागेन संता-नितास्सर्वाः कला निरवशेषा भवन्ति * २ * यस्तत्र पञ्चदशकलः पञ्चमः कोशः पितामहधनम् । तस्य पञ्चकलाः स्वस्मिन् । चतस्रः पुत्रे । तिस्रः पौत्रे । द्वे प्रपौत्र । एका तु वृद्ध प्रपौत्र । इत्थं पञ्चपुरुषेषु संता नितां निरवशेषा भवन्ति * । ३ ॥ * ॥ एवं यो दशकलश्चतुर्थः कोशः प्र-पितामहधनम् । तस्य चतस्रः स्वस्मिन् । तिस्रः पुत्रे । द्वे पौत्रे । एका तु प्रपौत्रे । इत्थं चतुर्षु पुरुषेषु संतानिता निरवशेषा भवन्ति * । ४ ॥ * ॥ अथ यः षट्कलस्तृतीयः कोशो वृद्धप्रपितामहधनम् । तस्य तिस्रः स्वस्मिन् । द्वे पुत्रे । एका तु पौत्रे । इत्थं त्रिषु सन्तानिता निरव-शेषा भवन्ति । ५ ॥ * ॥ तथा यस्त्रिकलो द्वितीयः कोशोऽतिवृद्ध प्रपितामहधनम् । तस्य द्वे स्वस्मिन् । एका तु पुत्रे—इत्थं द्वयोः सन्ताना न्निरवशेषम् । ६ ॥ * ॥ यस्तु पुनरेक कलः प्रथमः कोशः परमातिवृद्ध प्रपितामहधनम् । तस्य सा कला स्वस्मिन्नेव परिसमाप्नोति न सा परत्र संतानिता भवति ॥७॥ तदित्थं सर्वे समष्टया सप्तकोशधनस्याष्टाविंशतिं कलाः स्वस्मिन् । एकविंशतिः पुत्रे। पञ्चदश पौत्रे । दश प्रपौत्रे । षट् वृद्धप्रपौत्रे । तिस्रोऽतिवृद्ध प्रपौत्रे । एका तु परमातिवृद्धप्रपौत्रे संतानिता निरवशेषा भवन्ति ।यथा—

पिण्ड-सन्तान-क्रम-चक्रम् ।

		स्वस्मिन्	पुत्रे	पौत्रे	प्रपौत्रे	वृ०प्रपौत्रे	अतिवृद्ध प्रपौत्रे	परमाति वृद्ध प्रपौत्रे	
	८४	२८	२१	१५	१०	६	३	१	०
स्वस्य	२८	७	६	५	४	३	२	१	०
पितुः	२१	६	५	४	३	२	१	०	
पितामहस्य	१५	५	४	३	२	१	०		
प्रपितामहस्य	१०	४	३	२	१	०			
वृद्ध प्रपिता महस्य	६	३	२	१	०				
अति वृद्ध प्रपिता महस्य	३	२	१	०					
परमाति वृद्ध प्रपितामह	१	१	०						
	०	०							

५८—वस्तुतस्तु अष्टाविंशतिकलः सोमकोशः प्रतिशरीर मष्टाविंशत्य हर्गणभोग्याच्चन्द्रचारादुपपद्यते स मूलराशिः । तस्य संतानोत्पत्तिकाले राशिद्वयं भवति । एक विंशतिकलः संतानराशिः । स हि तच्छरीरात् संतानितः पुत्रशरीरेऽवतिष्ठते । अथावशिष्टः सप्तकलः स्वभुक्तराशिः। स हि स्वीय शरीर स्थित्युपयुक्तः शरीरत्यागोत्तरमपि स्वस्मिन्नेव समाप्यते न परत्र संतन्यते । तस्मात् स सप्त कलः संतानशेषराशिः । १ । ततः पुत्र-शरीरात् पुनः संतानोत्पत्तिकाले तस्यैकविंशतिकलस्य राशिद्वयं भवति ।

पञ्चदशकलः संतानराशिः । षट्कलः संतानशेष राशिः । सहि पुत्र शरीर त्यागोत्तरं स्वस्मिन् पुनः समासज्यते । २ । षडचदशकलस्यापि पूर्ववत् राशिद्वयं भवति । दशकलः संतानराशिः । पञ्चकलःशेष राशिः। सहि पौत्र शरीरत्यागोत्तरं सपिण्डनात् स्वस्मिन् पुनः समासज्यते । ३ । दशकलस्या-पि राशिद्वयं भवति । षट् कलः संतानराशिः । चतुः कलः शेषराशिः । ४। षट् कलस्यापि राशिद्वयं भवति । त्रिकलः संतानः, त्रिकलः शेषः । ५ । त्रिकलस्यापि द्वौराशी—एककलः सन्तानो द्विकलः शेषः। ६। अथैक कलस्य संतानाभावात् संतानशेष एवासौ भवति । ७ । तथा च संतानोत्पत्तेः प्राक् पूर्वक्रमागतराशिभिः सहितेन स्वराशिना प्रतिशरीरं चतुरशीतिकलः सोम कोषः संपद्यते । संतानोत्पत्तेः पश्चात् तु पूर्वक्रमागतराशिभिः सहितेन स्वरा-शिना अष्टाविंशति कलोवतिष्ठते । यथा—

संतान राशि चक्रम्

सप्तम पुरुषः	षष्ठपु०	पंचमपु०	चतुर्थपु०	तृ०पु०	द्वि०पु०	प्रथमपु०
२८	२१	१५	१०	६	३	१ ०
	२८	२१	१५	१०	६	३ १ ०
		२८	२१	१५	१०	६ ३ १ ०
			२८	२१	१५	१० ६ ३ १ ०
				२८	२१	१५ १० ६ ३ १ ०
					२८	२१ १५ १० ६ ३ १ ०
						२८ २१ १५ १० ६ ३ १ ०

तदित्थं प्रतिशरीरोत्पन्नाष्टा विंशति कलकोशस्योत्तरोत्तरं सप्तसु स्था-नेषु संतानात् प्रतिशरीरं चतुरशीतिकलं सप्तकोशं संपद्यते । यथा—

५६ षट् पञ्चशत्कलाः पित्र्योंशः ॥ २८ स्वांशः

१ ३ ६ १० १५ २१ २८ एतयोर्योगः = ८४

अथ शेष राशि चक्रम् ।

सप्तमपुरुषः	षष्ठपु.	पञ्चमपु.	चतुर्थपु.	तृतीयपु.	द्वितीयपु.	प्रथमपु.
७	६	५	४	३	२	१ ०
	७	६	५	४	३	२ १ ०
		७	६	५	४	३ २ १ ०
			७	६	५	४ ३ २ १ ०
				७	६	५ ४ ३ २ १ ०
					७	६ ५ ४ ३ २ १ ०

तदित्थं प्रतिशरीरोत्पन्नाष्टाविंशतिकलकोशस्योत्तरोत्तरं सप्तसु स्थानेषु संतानात् प्रतिशरीरमष्टाविंशतिकलं सप्तकोशवतिष्ठते । यथा—

२१ एकविंशतिः कलाः	पित्र्यांशः ॥	७ स्वांशः	एतयोर्योगः
१	२ ३ ४ ५ ६	७	= २८

अत्र विप्रतिपद्यन्ते । ज्येष्ठ एवायं निवापः सूयते उत कनिष्ठेष्वपि न्युप्यते । नाद्यः । ज्येष्ठे कृते वंशविच्छेदापत्तेः, कनिष्ठकृतश्राद्धादि स्वधाकारस्य द्वाराभावेन पितृष्व प्रसक्त्या नैरर्थक्यापत्तेश्च । नाप्यन्त्यः । पितृ द्रव्याणां षट्पञ्चाशत्कलानां ज्येष्ठे न्युप्ततया कनिष्ठे निवापाय सामग्र्यभावादिति । तत्र कनिष्ठेष्वपि निवापः सूयते इत्येव सिद्धान्तः ग्राह्य स्तत्र समीक्षायां वैशद्येन निरूप पिष्यते इतिदिक् ॥ इदमन्यदप्यत्रबोध्यम्- यः खलु प्रतिशरीरमष्टाविंशतिकलः सोमकोशो व्याख्यातः स श्रुतौ श्रद्धा शब्देनाऽऽख्यायते । तस्य तरलपदार्थत्वादापोमयत्वं द्रष्टव्यम् । "श्रद्धा वा आप"—इतिभूयसाश्रवणात् । पञ्चम्याम्माहुतावापः पुरुषवचसो भवन्तीति पञ्चाहुतिश्रुतावपि तस्या एव श्रद्धाया आहुतयः क्रमेणोपपाद्यन्ते । श्रद्धाया एव संतानः प्रजा । सप्तसु प्रजासु प्रागुक्तदिशा सन्तानिता सा श्रद्धा तूल तन्तुवच्छ्रद्धामयस्तन्तुर्भवति । तेन प्रजानां तन्तुसंज्ञा । तथा च बह्वृचश्रुतौ श्रूयते- "यो यज्ञस्यप्रसाधनस्तन्तुर्देवेष्वाततः । तमाहुतं नशीमहीति । प्रजा वैतन्तुः । प्रजामेषास्मा एतत् संतनोतीति" । एवमेताभिः सप्तभिः प्रजाभिः

संधार्यमाणत्वादियं श्रद्धा न पतति नोत्सीदतीत्यतस्तान्यपत्यान्युच्यन्ते। श्रद्धापतनमेव, पितृपतनं नाम । तेन श्रद्धाया संधारणात् पितरोन पतन्तीत्यतोऽपि तान्यपत्या नि । सप्तैते पुरुषा अष्टाविंशतिकलैनैकेन श्रद्धामयेन सन्तुना संबद्धा न पतन्तीत्यतः स तन्तुरेवापत्यमिष्यते । तन्तुरेव हि ताः प्रजा इत्यतस्ताः प्रजा अपत्यानि । अष्टविंशतिकलानामेकः पिण्डः सप्तस्वपत्य पुरुषेषु व्यासक्तोऽवतिष्ठते तेनैते सप्त पुरुषाः सपिण्डाः । एकपिण्डयोग एवैतेषां सापिण्ड्यम् ॥ इति सापिण्ड्यविचारः ॥

विद्यार्त्विज्यसम्बन्धौ ।

५९—अथ स्वाध्यायसम्बन्धेनाचार्य–ब्रह्मचारि– परम्परासंप्रविष्टानां पुरुषाणां यः संबंधः स विद्याकृतः ॥ एवमार्त्विज्यसम्बधेन याज्ययाजक परम्परा संप्रविष्टानां पुरुषाणां परस्परं यः संबन्धः स यज्ञकृतः ॥ तत्र चोपनीय साङ्ग–सकल्प–सरहस्य-सोपनिषत्क वेदाध्यापके कुलयाजके चाधिकः संबन्धः । ततोहीन हीनतर गुणेष्वनित्ययाजकेषु च तारतम्येन व्यवस्था ॥

प्रेत संसर्गः ।

६०—रोदनं स्पर्शन मलंकरण मनुगमनं वहनं दहन मुदकदानं पिंड दानं चेत्यष्टौ प्रेतसंसर्गा भवन्ति । एभिः कृतैः शवगताशुद्धिः संसर्गिणि संक्रमते इति स्थितिः ।

खनन दाहौ

६१—नामकरणात्प्राक् शिशुमरणे खननमेव कार्यं न तु दाहः । नामकरणोत्तरं तु वर्षत्रयपर्यन्त मकृतचौलस्य दाहखननयोर्विकल्पः । कृतचौलस्य तु वर्षत्रयमध्येऽपि दाह एव कार्यो न तु खननम् । वर्षत्रयोत्तरं त्वकृत चौलस्यापि दाहएव कार्यो न तु खननम् । वर्षत्रयोत्तरं कृतवाग्दानाया अकृतवाग्दानाया वा कन्याया दाह एव कार्यो न तु खननम् ।

६२—तत्र खनने सति विशेषाशौचानुपदेशे सद्यः शौचं कार्यम् । दाहे तु त्र्यहाशौच मिति सामान्य नियमः । यस्यापि वा खननमेव विधिसिद्धं न तु दाहस्तस्यापि यदि वालिश्याद्दाहंकरोति तदा त्र्यहाशौचमेवानुरोद्धव्यं न्तु सद्यः शौचम् । दाहस्य त्र्यहाशौचे निमित्तत्वादितिदिक् । इति खनन दाहाशौच व्यवस्था ॥

उदकदानम्

६३—पत्र खननं तत्रोदक दानादिकं न कार्यम्। दाहेतु कृते तत्साहित्य नियत मुदकदानाद्यप्यनुवर्तते । उपनयनात्प्राग् बालकस्य, तथा विवाहात्प्राक् कन्याया दाहोदकदानादिकं तूष्णीमेवकार्यम्। न तु मन्त्रेण। उपनयना द्विवाहाच्चोर्द्धं तु सर्वं समन्त्रकं कुर्यात् । ० ॥ इति उदकदानाधिकारः ॥

निमित्ति संसर्गः ।

६४—संसर्गो नवधा—एक शय्याशयन मेकासनोपवेशन मेकपङ्क्ति भोजन मशौचिभाण्डपक्वान्न भोजनमशौचिसंस्पृष्टान्न भोजनमेकपात्र भोजन मार्त्विज्यमध्यापनमशौचिस्त्रीगमनमिति ॥ उक्तं च देवलेन—

आलापस्पर्शनिश्वासात् सहयानासनाशनात् ।
याजनाद्ध्यापनाद्यौनात् पापं संक्रमते नृणाम् ॥ १ ॥ इति

तत्रैकशय्याशयनादि पंचविध संसर्गैरेकैक कृतैः स्वल्पकालापनेय-माशौचं संसज्यते । एकपात्रभोजनादिभिस्तु चतुर्विधसंसर्गैरधिककालाप-नेयमाशौचं प्राप्नोतीतिदिक् ॥ ० ॥ इति निमित्ति संसर्गः ॥

आशौचतादात्म्यम ।

६५—इहहि मातृतः पितृतः आत्मतः सारम्यतो रसतः सत्वतश्चेयं पुरुषव्यक्तिः षड्भ्यो योनिभ्यः संभूताभ्यः संभवति । तत्र यावदियं मातृतः पितृतो रसतश्च संभवतः संभवति तद्वच्छेदेन जन्मनो मरणाद्वा निमित्ता त्कस्यांचित् व्यक्ता वुत्पद्यमान माशौचं योनि संबन्धात् विद्या संबन्धात् यज्ञसंबन्धात् संसर्गसंबन्धाद्वा परत्र संक्रमते । तच्च संक्रममाणं संबन्ध मात्रां पात्रायोग्यतां चापद्यते । अत्यल्पमात्रो तस्मिन् सम्बन्धसूत्रो सत्यल्पमात्रया संक्रममाणं परव्यक्तौ स्वल्पेनैव कालेनापैति । अथ सम्बन्धसूत्राधिक्ये सत्यधिकमात्रया संक्रममाणं तदशौचं विलम्बे नापैति। तदित्थमिदमाशौचं सम्बन्धसूत्रतारतम्यनिबन्धनेन निवृत्तिकालतारत-म्येन तात्कालिकैकाहपक्षिणीत्र्यहदशाहादिभेदादनेकधा भिद्यते । एवं पात्रायोग्यतातारतम्यादप्याशौचसंक्रमणे तारतम्यमुपजायते । साङ्गसकल्पसरहस्य सोपनिषत्क सर्वशाख वेदविदि, अग्निमति, विशिष्ट कर्मवति च पुरुषे संक्रममाणमप्याशौचं विलक्षण संस्कार विशिष्टे तदा-

स्मनि न समासज्जते । पुष्करपलाशे जलविन्दुवदित्याहुः । ततोन्यूनयोग्यतावत्सु च वेदाग्निकर्मनिवन्धनयोग्यतातारतम्यानुरोधेनैव मात्रातारतम्येन संक्रमणात् तात्कालिकैकाहपक्षिणीन्यहदशाहादिभेदादनेकधा भिद्यते । तदित्थं यत्राधिकमात्रत्वादधिककालव्याप्यमाशौचं संक्रमते तत्रास्य भूतात्मा च सत्वात्मा चानेनाऽऽशौचेन संसृज्यते । तस्य सत्वात्मस्थमिदमाशौचं यावता कालेन निवर्तते तत्तृतीयभागकालेन तस्य वाह्याद्वरसात्मनस्तदशौचमपैति । तदिदं वाह्यभूतात्मस्थमघं स्पर्शाशौचशब्देन सत्वात्मस्थं तु तदघं कर्म्माशौचशब्देन व्यपदिश्यते । परे त्वाहुः—प्रतिपुरुषमात्मत्रयं भवति—भूतात्मा च, क्षेत्रज्ञात्मा च, जीवात्मा चेति । तदुक्तम् मनुना—

योस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते ॥
यः करोति तु कर्माणि स भूतात्मोच्यते बुधैः ॥ १ ॥
जीवसंज्ञोऽन्तरात्मान्यः सहजः सर्वदेहिनाम् ।
येन वेदयते सर्वं सुखं दुःखं च जन्मसु ॥ २ ॥ इति

तत्रायं रयिरूपस्य भूतभौतिकपिंडस्याधिष्ठाता प्राणो भूतात्मेत्युच्यते। तत्र भूतभौतिकपिण्डावच्छेदेन समासक्तमघं स्पर्शाशौचशब्देन तदवच्छिन्नप्राणावच्छेदेन समासक्तमघं तु कर्म्माशौचशब्देन व्यपदिश्यते । तदेतदुभयं वस्तुतो न भिद्यते । केवलमत्र मात्रातारतम्यादधिष्ठानभेदो याप्यकालभेदश्चाशौचभेदप्रतिपत्तौ निमित्तं द्रष्टव्यम् । यथा जातीपुष्पेऽधिष्ठितो गन्धः केनचित्प्रक्रमेण गन्धतैलेऽधिष्ठितो भवति । स पुनर्गन्धतैलस्पर्शवत्सु वायुवस्त्रादिद्रव्यजातेष्वपि संसज्यते । स हि गन्धो जातीपुष्पे चिराय तिष्ठन् ततोऽल्पेन कालेन गन्धतैलेऽवतिष्ठते। ततोप्यल्पेन कालेन स तत्स्पर्शवत्सु वस्त्रादिषु संसक्तो निवर्तते । तदित्थं पुष्पे तैले वस्त्रे च गन्धोत्पत्तेर्भिद्यते निमित्तम्, भिद्यते चाश्रयो, भिद्यते चावस्थानकालो, भिद्यते चोपक्रमकालः । तत्र तैलादौ तावत् गन्धस्य पुष्पावयवोऽन्य एवाश्रयो मुख्यः । तैलावयवस्त्वन्य आश्रयो गौणः ॥ पुष्पेऽप्यनयोर्यो गन्धाश्रयः स निर्गन्धे पुष्पावयवेऽपि समासक्त एवानुभूयते सोऽन्यस्तस्याश्रयः । गन्धाश्रितभागातिरिक्तोऽपि कश्चन भागः पुष्पस्य

जीर्णावस्थायां मुकुलावस्थायां च प्रत्यक्षमगन्धोऽनुभूयते । तरुणावस्थायां तूद्भूतो गन्धः सर्वत्राविशेषमुपलभ्यते । तत्र वायुवस्त्रादौ गन्धावयवा एव संक्रमन्ते न परे पुष्पभागाः । पुष्पमर्दनादिकर्मणि तु परे पुष्पभागा एव संक्रमन्ते न गन्धावयवा इत्युपक्रमभेदः स्पष्टमुपलभ्यते । स यथा एक एव गन्धोऽन्यत्राधिष्ठितोऽप्यन्यत्रोपसंक्रमणो दृश्यते एवमिदं जातक-मृतकशरीरस्थमघं परशरीरे भूतात्मनि यथायथं तारतम्येन संक्रमते । तच्च तत्रतत्रान्यथान्यथा संपद्यमानमपि वस्तुतो नातिरिच्यते । अघव-स्तुनि भेदाभावात् । तस्माज्जन्माशौचं मरणाशौचं वा, दोषाशौचं क्रियाशौचं वा, स्पर्शाशौचं कर्माशौचं वा, सर्वमिदमभिन्नमनर्थान्तरमेव। स्पष्टप्रतिपत्त्यर्थन्तु भेदेनात्र व्यवहाराः प्रवर्तन्ते इति दिक् ॥ इति आशौच-तादात्म्याधिकारः ॥

६६—पौत्रः प्राणपतेस्तु हीरकसुतो यो देवनाथः सुधीः ।
पौत्रस्तस्य हि वैद्यनाथतनयो राजीवनन्देन च ॥
तातज्येष्ठसहोदरेण गुरुणा यः पुत्रवत् पालितः ।
सोऽयं श्रीमधुसूदनो व्यतनुताशौचे सभीक्षामिमाम् ॥१॥

इत्याशौचसूत्राध्यायो द्वितीयः ॥

अथ जन्माध्यायः ।

६७—जन्माशौचं जननाशौचं वृद्ध्याशौचं शुभाशौचं सूतकमित्येकार्थाः।

६८—अस्मिन् जन्माध्याये सूतिकायाः १ सूतिकापितृकुलस्य २ सूतिकाभर्तुः ३ सूतिकाभर्तृकुलस्य ४ तत्संसर्गिणश्चेति ५ पञ्चाधिकाराः प्रदर्श्यन्ते ।

सूतिकाधिकारः ।

६९—प्रथमादिषु चतुर्षु मासेषु नष्टस्य गर्भस्य योनितो बहिर्भावो गर्भस्राव इत्युच्यते । पञ्चमादिषु चतुर्षु मासेषु नष्टस्य गर्भस्य योनितो बहिर्भावो गर्भपात इत्युच्यते । षष्ठमादिषु चतुर्षु मासेषु पुष्टस्य गर्भस्य योनितो बहिर्भावो गर्भप्रसव इत्युच्यते । तदित्थं षष्ठमाष्टमयोर्मासयो र्द्वैधं भवति । नष्टगर्भोद्भवे गर्भपातसंज्ञा गर्भच्युतिसंज्ञा च जीवद्गर्भोद्भवे तु प्रसवसंज्ञेति विशेषः आदित्यपुराणवचनादिषु क्वचित्पञ्चषष्ठमा-नयोरपि गर्भस्रावशब्दः प्रयुक्तो दृश्यते तदैकदेशिकम् ॥ १ ॥

तत्र ब्राह्मण्याः सूतिकायाः प्रथमगासे गर्भस्रावे द्व्यहमाशौचम् । द्वितीयमासे तृतीयमासे वा गर्भस्रावे त्र्यहम् । प्रथमद्वितीयतृतीयमस्मि त्र्यहमिति दाक्षिणात्यानां । चतुर्थमासे चतुरहम् । पञ्चममासे गर्भपाते पञ्चाहम् । षष्ठेमासे गर्भपाते षडहम् । तदिदं स्पर्शाशौचं च कर्माशौचं च । तदूर्ध्वं वैदिककर्माधिकारः प्रवर्तते ॥२॥

३१—क्षत्रियायाः सूतिकायाः प्रथमगासे गर्भस्रावे त्र्यहम् । द्वितीये चतुरहम् । तृतीये पञ्चाहम् । प्रथमद्वितीयतृतीयमासे चतुरहमिति दाक्षिणात्यानां केचित् । चतुर्थे षडहम् । पञ्चमे तु गर्भपाते सप्ताहम् । षष्ठे मासे त्वष्टाहमाशौचम् ॥३॥

३२—वैश्यायास्तु प्रथमे मासे गर्भस्रावे चतुरहम् । द्वितीये पञ्चाहम् । तृतीये षडहम् । प्रथमद्वितीयतृतीयमासेषु पञ्चाहमिति दाक्षिणात्यानां केचित् । चतुर्थे सप्ताहम् । पञ्चमे तु गर्भपाते अष्टाहम् । षष्ठे मासे नवाहमाशौचम् ॥४॥

३३—शूद्रायास्तु प्रथमे मासे स्रावे सप्ताहम् । द्वितीयेऽष्टाहम् । तृतीये नवाहम् । प्रथमद्वितीयतृतीयमासेषु अष्टाहमितिदाक्षिणात्यानां केचित् । चतुर्थे दशाहम् । पञ्चमे तु पाते एकादशाहम् । षष्ठे मासे द्वादशाहमाशौचम् ॥५॥

३४—सप्तमेऽष्टमे वा मासे दोषवशादजीवद्गर्भपातेपि मातुः संपूर्णाशौचं वक्ष्यमाणवन्नेयम् ॥६॥

वर्णभेदेन प्रसूत्याः स्रावपातयोराशौचदिनानि						
मासे	१	२	३	४	५	६
ब्राह्मण्याः	२	३	३	४	५	६
क्षत्रियायाः	३	४	५	६	७	८
वैश्यायाः	४	५	६	७	८	९
शूद्रायाः	७	८	९	१०	११	१२

सप्तमेऽष्टमे नवमे दशमे वा मासे गर्भप्रसवे तु ब्राह्मण्याः क्षत्रियाया वैश्यायाश्च सूतिकायाः दशरात्रं स्पर्शाशौचम् । कर्माशौचं तु पुत्रोत्पत्तौ मासं, कन्योत्पत्तौ चत्वारिंशद्दिनानीति दाक्षिणात्याः । पुत्रोत्पत्तौ विंशतिरात्रं, कन्योत्पत्तौ मासमिति पैठीनसिः प्राह । तदातिष्ठन्ते गौडाः । देशाचाराद् व्यवस्था । सच्छूद्राया अप्येवमेव सच्छूद्रत्वं च स्पृश्यशूद्राणां स्नानदानादिपवित्राचरणशीलत्वं विशिष्टगुणयोग्यताशालित्वञ्चेतिदिक् ॥७॥

७६—निकृष्टशूद्रायाः कन्यापुत्रजनने त्रयोदशरात्रं स्पर्शाशौचम्, 'कर्माशौचं तु मासमेवेत्याहुः । सच्छूद्राया अप्येवमेवेति दाक्षिणात्यानां केचित् ।

	स्पर्शाशौच-दिनानि	कर्माशौचदिनानि	
प्रसूतीनाम्		पुत्रे	कन्यायाम्
गौडस्त्रीणाम्	१०	२०	३०
दाक्षिणात्य स्त्रीणाम्	१०	३०	४०
प्रत्यन्तस्त्रीणाम्	१२	३०	३०

इति सूतिकाधिकारः ।

सूतिका पितृकुलाधिकारः ।

७७—ऊढाया औरसकन्याया दत्तकन्याया वा पितृगृहे सत्या मासचतुष्टयपर्य्यन्तं गर्भस्रावे शयनाशनादिसंसर्गवतां पित्रादिसपिण्डानां यावत्संसर्गमशौचानुवर्तनात् प्रसूतीसमकालमेवाशौचम् । संसर्गशून्यत्वे तु मातापित्रोरेकाहः । अन्येषां त्वशौचं नास्ति ॥ १ ॥

७८—तस्या एव पञ्चमषष्ठमासयोर्गर्भपाते पूर्वोक्तसंसर्गवतां पित्रादिसपिण्डानां संसर्गानुरोधात् प्रसूतीसमकालमाशौचम् । संसर्गशून्यत्वे तु मातापित्रोरेकरात्रम् । सोदरभ्रातुरेकाहः । अन्येषां त्वशौचं नास्ति ॥२॥

७९—तस्या एव सप्तमाष्टमनवमदशमेषु मासेषु प्रसवे शयनाशनादि-संसर्गवतां सर्वेषां पित्रादिसपिण्डानां पूर्णाशौचम् । संसर्गशून्यत्वे तु मातापित्रोरहिरात्रम् । भात्रादिबन्धुवर्गस्यैकरात्रम् । पितृव्यादीनामेकाहः पित्रोरप्येकाह इतिदाधिगात्यानां केचित् गौड़ानां च केचित् । कर्माशौचमेवेदं, स्पर्शाशौचं तु प्रसवे सूतिकातिरिक्तानां नास्ति ॥ ३ ॥

प्रसूत्याः	असंसर्गिणाम्			संसर्गिणाम्		
	मातापितृ-	भ्रातृ-	सपिण्डा नाम्	मातापितृ-	भ्रातृ-	सपिण्डा नाम्
स्रावे	॥	०	०	२।३।४	२।३।४	२।३।४
पाते	१	॥	०	५।६	५।६	५।६
प्रसवे	३	१	॥	१०	१०	१०

८०—पितृवेश्मन्यसंस्कृतैव या नारी रजः पश्यति तस्याः प्रसवे पितुरशौचं यावज्जीवनं नोपशाम्यति ॥ ४ ॥

८१—पतिगृहे तु सत्या गर्भस्रावे गर्भपाते प्रसवे वा पित्रादीनामशौचं नास्ति ॥ ५ ॥

इति सूतिकापितृकुलाधिकारः ।

सूतिका भर्तुराधिकारः ।

८२—मासचतुष्टयपर्यन्तं गर्भस्रावे पत्युर्लोमनखवापनपूर्वकात् सचैलस्नानाच्छुद्धिः लोमनखवापनमिच्छन्त्येके नेच्छन्त्येके ॥ १ ॥

८३—पञ्चमषष्ठमासयोर्गर्भपाते पत्युः सचैलस्नानात् प्राक्स्पर्शाशौचम् । कर्माशौचं तु त्रिरात्रं निर्गुणस्य । सगुणस्य तु सूतीभर्तुरेकरात्रं यमः प्राह । अशौचान्ते लोमनखवापनमिच्छन्त्येके । नेच्छन्त्येके ॥ २ ॥

८४—सप्तमादिमासचतुष्टये तु भार्याप्रसवे सति श्रवणोत्तरं पत्युः सचैलस्नानम् । पुत्रमुखदर्शनात्परं पुनः सचैलस्नानम् । तत्र प्रथमसचैलस्नानात् प्रागेव स्पर्शाशौचं भवति । कर्माशौचं तु पूर्णं दशाहम् । संसर्गे तु सति स्पर्शाशौचमपि दशाहमिति वदयते ॥ ३ ॥

८५—अत्र स्त्रीजन्मनि स्नानानुपदेशात् विनैव स्नानं पितुरपि शुद्धिरित्याहुः । तेन कन्याजनने पितुःस्पर्शाशौचं नास्तीति सिद्धम् । कन्याजन्मन्यपि पितुः स्नानमिति दाक्षिणात्यानां केचित् कर्माशौचं तु दशाहं भवत्येव ॥ ४ ॥

८६—परपूर्वायाःप्रसवे सर्ववर्णानां त्रिरात्रम् । असन्निधौ त्वेकरात्रमिति केचित् । परपूर्वा, पुनर्भूः, अन्यपूर्वावरुढा, अन्यगतास्त्येकार्थाः ॥ ५ ॥

८६—यदि द्विजातेर्गृहाधिकारिणी हीनवर्णा नारी स्यात् सा च तेन भुक्ता प्रसवं गच्छति । तदास्य द्विजातेर्भस्मान्तं सूतकं भवति । यावज्जीवनं तन्नोपशाम्यति ॥ ६ ॥

८७—पतिं त्यक्त्वा सजातीयोत्कृष्टजातीयपरपुरुषेण संयुक्तायाः पुनर्भूः प्रसवे तस्य स्वसंग्राहकत्व जारपुरुषस्य पूर्वकालिकस्य च पत्युस्त्रिरात्रम् । हीनवर्णागमिन्यास्तु भार्यायाः प्रसवे पत्युः पूर्वस्याशौचं नास्ति ॥ ७ ॥

८८—क्षेत्रजादिषु पुत्रेषु जातेषु मातापित्रोस्त्रिरात्रमित्याहुः असन्निधौ त्वेकरात्रमिति केचित् ॥ ८ ॥

प्रसूतिकाभर्तुः		
निमित्ते	स्पर्शाशौचम्	कर्माशौचम्
गर्भस्रावे	सचैलस्नानम्	०
गर्भपाते	सचैलस्नानम्	३
पुत्रप्रसवे	सचैलस्नानम्	१०
कन्याप्रसवे	,,	१०
क्षेत्रजादिप्रसवे	,,	३
परपूर्वायाःप्रसवे	,,	३
परंगतायाःप्रसवे	,,	३
नीचंगतायाःप्रसवे	,,	०

इति सूतिकाभर्त्रधिकारः

सपिण्डासकुल्यादिशौचविचारः ।

९०—सप्तमपुरुषपर्यन्तं गर्भस्रावे पुनरुप नयनस्य सपिण्डानां च स्नानाच्छुद्धिः । 'सोमसद्यापनपूर्वकं स्नानमिति' मैथिलाः ॥ १ ॥

९१—पञ्चमे षष्ठे वा मासे गर्भपाते मातृव्याः सपिण्डानां च स्नानात् प्राक् स्पर्शाशौचम् । कर्माशौचं तु त्रिरात्रम् । सगुणासपिण्डानां सद्यः शौचम् । निर्गुणसपिण्डानामहोरात्रम् । यत्रेष्टाधरत्वशीलानां सपिण्डानां त्रिरात्रम् । अथवा सगुणानामहोरात्रं निर्गुणानां त्रिरात्रमिति केचित् ॥२॥

९२—सप्तमेऽष्टमे नवमे दशमे वा मासे गर्भस्रावे सपिण्डानां शुद्धिव्यवस्था वर्णभेदेन भिद्यते । ब्राह्मणानां दशाहं, क्षत्रियाणां द्वादशाहं, वैश्यानां सच्छूद्राणां च पञ्चदशाहं, निष्कृष्टशूद्राणां मासमाशौचम् । सपिण्डाः सप्तमपुरुषपार्श्वयः स्वबन्ध्याः ॥ ३ ॥

९३—सप्तमपुरुषादूर्ध्वं दशम, पुरुषं यावत् सकुल्याः । सकुल्यानां त्रिरात्रम् ॥ ४ ॥

९४—सप्तमादूर्ध्वं चतुर्दशपुरुषं यावत्सोदकाः । सोदकानां तु त्रिरात्रं पक्षिणी वा । तत्र जन्मनाम्नोर्ज्ञायमानत्वे चतुर्दशपुरुषं यावत् त्रिरात्रमिति दाक्षिणात्याः । दशमपुरुषादूर्ध्वं जन्मनाम्नोर्ज्ञायमानत्वे पक्षिणीति गौडाः ॥ ५ ॥

९५—चतुर्दशपुरुषादूर्ध्वमेकविंशतिपुरुषं यावत् सगोत्राः । सगोत्राणां तु जन्मनाम्नोः स्मरणे सत्येकाहम् । पक्षिणीति गौडानां केचित् । स्नानमात्रमिति दाक्षिणात्यानां केचित् । जन्मनाम्नोरविज्ञाने तु अस्मत्कुलजोऽयमित्येतावन्मात्रज्ञानसत्वे स्नानमात्रेण शुद्धिः । यथाकथंचिज् ज्ञानसत्वादत्र स्नानात्प्रागाशौचम् । सर्वथा ज्ञानाभावे तु नाशौचम् । एकविंशतिपुरुषपर्यन्तमेवाशौचप्रवृत्तिर्न तदूर्ध्वमिति बहवः ॥ ६ ॥

९६—सर्वं चैतत्प्रकरणे कर्माशौचमेव विधीयते । स्पर्शाशौचं तु नास्ति सपिण्डानां सकुल्यानां सोदकानां सगोत्राणां च ॥ ७ ॥

९७—दत्तकस्यासपिण्डकुलाद्गृहीतस्य पुत्रपौत्रादिजननें दत्तकजनयितृसपिण्डानां प्रतिग्रहीतृसपिण्डानाञ्चैकाहः । एवं प्रतिग्रहीतृसपिण्डानां दत्तकजनयितृसपिण्डानां च पुत्रपौत्रादिजनने दत्तकस्यासपिण्डकुलाद्गृहीतस्यैकाहः । इत्याद्यूह्यम् । एकमातृकयोर्भिन्नपितृकयोर्भ्रात्रोरेकस्यजनने ऽपरस्य स्वमातृजात्युक्तं पूर्णाशौचम् । एकाहमेवाशौचमिति दाक्षिणात्यानां केचित् । पितुस्तयोः प्रसवे त्रिरात्रम् । सपिण्डानां तु तयोर्जननाद्-शौचाभावः ॥ ८ ॥

सूतिकासंसर्गाधिकारः ।

९८—संसर्गशौचे सत्यस्पृश्यत्वमात्रं भवति न तु कर्मानधिकारः ॥१॥

९९—जननाशौचिनां सूतिकातिरिक्तानां स्पर्शो न प्रतिषिध्यते । प्रसूतीस्पर्शे तु कृते सपत्न्या वा सपिण्डानां वा तदन्येषां वा सर्वेषां स्नानाच्छुद्धिः । स्नानमात्रापनेयस्याद्यस्य तेषु स्पर्शतः संक्रान्तत्वात् ॥ २ ॥

१००—यदि तु जनकः पिता प्रसूत्याः पत्न्याः संस्पर्शे सूतके करोति तदा तस्यापि प्रसूतीसूतकं यावदस्पृश्यत्वम् । तत्र संस्पर्शो मैथुनसंसर्ग इति केचित् । संसर्गान्तरेष्वपीति बहवः ॥ ३ ॥

१०१—अशौचिनासन्नभोजनैकशय्यासनादिसहवासभूयस्त्वपरिशीलने यावत्तेषां निमित्तानामशौचं तावदेवैषां संसर्गिणामप्यशौचमनुवर्तते ॥ ४ ॥

१०२—अशौचिगृह्याणामशौचिस्वामिकानां वा द्रव्याणामशौचिस्पर्शशून्यानां संसर्गे तु नाशौचसम्बन्धः अशौचिस्पर्शे तु द्रव्यशुद्धिप्रकरणोक्ता व्यवस्था द्रष्टव्या ॥ ५ ॥

वर्षे वैक्रमकेऽग्निहग्ग्रहमहीमाने (१९२३) हि यस्योद्भवः
श्रावण्याः परतोऽष्टमीतिथिनिशायामे द्वितीयेऽभवत् ॥
अस्मिन् वैक्रमवत्सरे शशिरसाङ्कोर्वी (१९६१) मिते फाल्गुने
सोऽयं श्रीमधुसूदनो व्यतनुताशौचे समोद्वानिमाम् ॥ १ ॥

इति जन्माध्यायस्तृतीयः ।

—:※※※:—

अथ मरणाध्यायः ।

१०३-मरणाशौचं शावाशौचं मृताशौचं मृतकं प्रेताशौचमित्येकार्थाः ।

१०४-अस्मिन् मरणाध्याये पुरुषाणां स्त्रीणां विगोत्राणां संसर्गिणां चेति चत्वारोऽधिकाराः प्रदर्श्यन्ते ।

पुरुषाधिकाराः ।

आ दन्तजननात् सद्य, आ चूडान्नैशिकी स्मृता ।
त्रिरात्रमाव्रतादेशाद्, दशरात्रमतः परम्-इत्याहुः ॥

सप्तमो मासो दन्तजननकालः । तृतीयं वर्षं चूड़ाकालः । मासत्रयाधिकषड्वर्षोर्ध्वं व्रतबन्धकालः । तेन मरणाशौचविषये सामान्यतश्चत्वारो विभागा उपपद्यन्ते-जन्मारभ्य सद्यः शौचम् । दन्तजननमारभ्यैकरात्रम् । चौलसंस्कारमारभ्य त्रिरात्रम् व्रतबन्धसंस्कारमारभ्य दशरात्रम्-इति कर्मप्राधान्यवादिनां पक्षः । प्रथममासमारभ्य सद्यःशौचम् । सप्तममासमारभ्यैकरात्रम् । पञ्चविंशमासमारभ्य त्रिरात्रम् । षट्सप्ततितममासमारभ्य दशरात्रमिति कालप्राधान्यवादिनां पक्षः । एषां विभागानां सन्धिस्थानेषु त्रिषु पक्षद्वैविध्यादाशौचद्वैविध्यमापततीत्युत्तरत्र प्रदर्शयिष्यते । अत्र प्रथमद्वितीयतृतीयविभागपर्यन्तं यावदाशौचमित्युच्यते । चतुर्थविभागाशौचन्तु प्रौढाशौचम् । किञ्च अत्र प्रथमविभागे सर्ववर्णसाधारणनियमाः प्रतिज्ञायन्ते । द्वितीयतृतीयचतुर्थेषु तु वर्णभेदेन । तत्रैतदेकरात्रं त्रिरात्रं दशरात्रमित्युपलक्षणं स्वस्वव्रवर्णाशौचकालानाम् । तथा च वर्णभेदेन भिन्ना आशौचकालाः प्रतिविभागं प्रदर्श्यन्ते—

१—ब्राह्मणानां जन्मतः षष्ठमासं यावन्मरणे भूमिनिखननम् । तत्र सम्बन्धिनां सद्यः शौचम् । केशनखच्छेदनपूर्वकस्नानाच्छुद्धिरिति गौड़ाः । अथ सप्तममासं दन्तजननं वारभ्य चतुर्विंशमासपर्यन्तं चौलसंस्कारपर्यन्तं चैकरात्रम् । भूमिनिखननं श्मश्रुकर्म च प्राग्वदिति गौड़ाः । खननं दहनं वा विशरणेनेति दाक्षिणात्याः । अथ पञ्चविंशमासं चौलसंस्कारं वारभ्य षञ्चसप्ततितममासपर्यन्तं व्रतबन्धपर्यन्तं वा त्रिरात्रम् । तत्र दाहं कृत्वा पिण्डदानं, द्वितीयदिने त्वस्थिसंचयनं कुर्यादित्येकः पक्षः । अथवा तृतीय-

दिने पिण्डदानमस्थिसंचयनं नखकेशच्छेदनं च कृत्वा चतुर्थदिने ब्राह्मण-भोजनं कुर्यादित्यन्यः पक्षः । अथ षट्सप्ततितममासं ,व्रतबन्धं वारम्य दशरात्रादेशः ॥ १ ॥

२—क्षत्रियाणां षष्ठमासपर्यन्तं दन्तजननान्तं ,वा सद्यः शौचम् । चतुर्विंशमासपर्यन्तं तदीयचौलकालान्तं चौलसंस्कारान्तं वा द्व्यहम् । पञ्च-सप्ततितममासपर्यन्तं तदीयव्रतबन्धकालपर्यन्तं वा व्रतबन्धान्तं वा षड्-हम् । तदूर्ध्वं द्वादशाहम् ॥ २ ॥

३—वैश्यानां षष्ठमासपर्यन्तं दन्तजननान्तं वा सद्यः शौचम् । चतुर्विंशमासमर्यन्तं तदीयचौलकालान्तं चौलान्तं वा त्र्यहम् । पञ्चस-प्ततितममासपर्यन्तं तदीयव्रतबन्धकालपर्यन्तं व्रतबन्धान्तम् । तदूर्ध्वं पञ्चदशाहम् ॥ ३ ॥

४—निकृष्टशूद्राणां षष्ठमासपर्यन्तं दन्तजननान्तं वा सद्यः शौचम् । चतुर्विंशमासपर्यन्तं पञ्चाहम् । पञ्चसप्ततितममासपर्यन्तं द्वादशाहम् । तदूर्ध्वं मासमाशौचम् ॥ ४ ॥

निमित्तमासाः		१—६	७—२४	२५—७५	७६
वर्णभेदेन मरणा-शौचदिनानि ।	ब्राह्मणानाम्	सद्यः	१	३	१०
	क्षत्रियाणाम्	,,	२	६	१२
	वैश्यानाम्	,,	३	९	१५
	शूद्राणाम्	,,	५	१२	३०

एष च सामान्यादुक्तो नियमः । किन्तु प्रतिविभागमत्र निमित्तान्त-रानुरोधेन सम्बन्धिविशेषानुरोधेन चाशौचे तारतम्यमुपजायते न त्वविशेषेण सर्वत्र सद्यः शौचादिकं यथोक्तमेवानुवर्तते । तस्मात् प्रतिविभागं तत्तदनुरोधेन यथायथाशौचे विशेषा जायन्ते तेऽत ऊर्ध्वमादितः प्रदर्श्यन्ते त एवानुरोद्धव्याः ॥ ॥ इति चतुर्विंभागाधिकरणम् ॥

बालाशौचम् ।

१०५-जन्मतः प्रागेव शिशुमरणे मृतजातस्य तस्य सम्बन्धेनाशौचं द्वेधा सम्भाव्यते-मृताशौचं जाताशौचं च । तत्र मृताशौचं कस्यापि नास्तीति नियम्यते । जाताशौचं तु मातुर्दशाहं प्रागुक्तं भवत्येव । अन्येषां तु जनाशौचमपि नास्ति ॥

१०६- नालच्छेदात् प्राक् शिशुमरणे जातमृतस्य तस्य सम्बन्धेनाप्यशौचं द्वेधा सम्भाव्यते-जाताशौचं मृताशौचं च । तत्र तावन्मृताशौचं नास्ति । जननाशौचं तु मातुर्दशाहम् । सापत्न्यमातुः पित्रादिसपिण्डानाञ्च त्रिरात्रं भवत्येव ॥ अथवा पितुरेव त्रिरात्रम् । सोदरस्यैकरात्रम् । अन्येषां तु सपिण्डानां जननाशौचमपि नास्तीति गौड़ानां केचित् ॥

१०७- नालच्छेदादूर्ध्वं दशाहात्प्राक् शिशुमरणेऽपि मातुः पितुः सपिण्डानां च मृताशौचं नास्ति । जननाशौचं तु कर्मप्रतिपेधलक्षणं स्पर्शप्रतिपेधलक्षणं च जन्माध्यायोक्तं यथायथं भवत्येव ॥ मातापित्रोर्दशाहं सोदरस्य त्रिरात्रम् । अन्येषांतु सपिण्डानां जननाशौचमपि नास्तीति गौड़ानां केचित् ॥

१०८- दशाहादूर्ध्वं नामकरणात् प्राक् पुत्रमरणे मातापित्रोरेकरात्रं मृताशौचम् । त्रिरात्रमिति केचित् ॥ सपिण्डानां तु सद्यःशौचम् । सद्यःशौचे सर्वत्र स्नानमात्रेण शुद्धिः । नामकरणं तु दशम्युत्तरकालमेकादशाहे द्वादशाहे वा विहितमतो नामकरणपदं द्वादशरात्रोपलक्षणम् । तेन यद्यपि मासोत्तरं नाम कुर्यात् तथापि द्वादशाहादेव प्रागिदमाशौचं बोध्यम् । अथाहुः-नामकरणं न कालोपलक्षणम् तेन द्वादशरात्रे वा मासोत्तरं वायदैव नाम कुर्यात् तदैव तस्मान्नामकरणात्प्रागिदमाशौचमनुरोध्यमिति दाक्षिणात्यानां केचित् ॥

१०९- नामकरणादूर्ध्वं षण्मासात् प्रागजातदन्तमरणे मातापित्रोरेकरात्रं जातदन्तमरणे तु त्रिरात्रमिति दाक्षिणात्यानां केचित् ॥ सपिण्डानां तु सद्यःशौचम् ॥

११०- षण्मासादूर्ध्वं दन्तोत्पत्तेः प्राक् पुत्रमरणे दाहे खनने वा मातापित्रोस्त्रिरात्रम् । सपिण्डानां तु दाहे सत्येकाहः । खनने तु सद्यःशौचम् ।

सप्तमे-मासे मनुष्याणां दन्तजननं प्रकृत्या सिद्धम् । किन्तु दोषवशात्क-चित् प्रागपि दन्ता जायन्ते पश्चाद्वा । तत्रैतस्मिन् वैकारिकेऽपि दन्तज-नने तदनुरोधेन प्राग्वन्नियमा भवन्तीति बोध्यम् ।

शिशुमरणेऽशौचदिनानि

	मातुः ।	पित्रादीनाम्	सपिण्डानाम्
१ जननात् प्राक्	०	०	०
२ नालच्छेदात् प्राक्	०	०	०
३ दशाहात् प्राक्	०	०	०
४ द्वादशाहात् प्राक्	१	१	सद्यः
५ षण्मासात् प्राक्	१	१	सद्यः
६ दन्तजननात् प्राक्	३	३	सद्यः

इति प्रथमविभागाधिकरणम् ।

१११-षष्ठमासादूर्ध्वं चतुर्विंशमासपूर्तेः प्राग् बालकमरणे खननमि-च्छन्ति गौड़ाः । खननदहनयोर्विकल्पमिच्छन्ति दाक्षिणात्याः । तत्र खनने सत्येकरात्रं ब्राह्मणकुले, द्विरात्रं क्षत्रियकुले, त्रिरात्रं वैश्यकुले, पंच-रात्रं शूद्रकुलेऽशौचदिनान्यनुरोध्यानि । वेदाग्निमत्त्वे तु सर्वेषां ब्राह्मण-वदेकरात्रम् ॥ अग्निमतामनग्निमतां च सर्वेषां ब्राह्मणवद्दशाहाशौचमनु-भवतामिहापि सर्वं ब्राह्मणवदिति परे ।

११२-षष्ठमासादूर्ध्वं चतुर्विंशमासपूर्तेः प्राङ्मृतस्य दहने कृते त्र्यहं ब्राह्मणकुले, षडहं क्षत्रियकुले, नवाहं वैश्यकुले, द्वादशाहं शूद्रकुलेऽशौचं भवति । सत्यग्निदाहे पित्रोरेव त्रिरात्रम् , सपिण्डानां तु एकाहमेवेति केचित् वेदाग्निमत्त्वे तु सर्वेषां ब्राह्मणवत् त्रिरात्रम् । दशाहाशौचं व्यवह-रतां तु सर्वेषामिहापि सर्वं ब्राह्मणवत् ॥

११३-यत्तु केचिदत्र दाहकल्पे ब्राह्मणानां त्रिरात्रम्, क्षत्रियाणामेकादशरात्रम्, वैश्यानां द्वादशरात्रम्, शूद्राणां विंशतिरात्रमशौचमाहुस्तदनादेयम् । क्षत्रियादिप्रत्यक्षस्मिकस्येत्थमाशौचाधिक्यस्यानौचित्यात् ।

षष्ठमासादा चतुर्विंशमास्संमरणेऽशौचदिनानि ।

	खनने	दहने
ब्राह्मणानाम्	१	३
क्षत्रियाणाम्	२	६
वैश्यानाम्	३	९
शूद्राणाम्	५	१२

इति द्वितीयविभागाधिकरणम् ।

११४-तृतीयं वर्षं चूडाकालः । किन्तु कुलाचारवशादगर्भत्वाद् वा तृतीयं वर्षमारभ्य व्रतबन्धकालपर्यन्तं कालविकल्पेन यथेच्छं चौलकर्माचरन्ति । तत्रैतस्माच्चौलविधानादाशौचे नियमा विशिष्यन्ते । तथाहि-तृतीयवर्षे तावदस्माच्चौलात् प्राङ्मरणे मातापित्रोस्त्रिरात्रं षड्रात्रं नवरात्रं द्वादशरात्रं वा वर्णभेदेनाशौचमादिशेत् । इतरेषां तु सपिण्डानामेकरात्रं द्विरात्रं त्रिरात्रं पञ्चरात्रं वा वर्णभेदेन स्यात् । तृतीयवर्षे कृतचूडस्य मरणे तु त्र्यहं षडहं नवाहं द्वादशाहं वा वर्णभेदेन सर्वेषां पित्रादिसपिण्डानामाशौचमनुवर्तते । दशाहिनां तु सर्वेषां ब्राह्मणवत् ।

११५-अथ तृतीयवर्षादूर्ध्वं व्रतबन्धात् प्राक् कृतचूडस्याकृतचूडस्य वा मरणे तु पित्रादिसपिण्डानां सर्वेषां त्र्यहाशौचं ब्राह्मणकुले, षडहाशौचं क्षत्रियकुले, नवाहाशौचं वैश्यकुले, द्वादशाहाशौचं शूद्रकुले नेयम् । दशाहिनां तु सर्वेषां ब्राह्मणवत् ।

तृतीयवर्षेऽशौचदिनानि			
—	अकृतचूड़मरणे		कृतचूड़मरणे
	मातापित्रोः	सपिण्डानाम्	सर्वेषाम्
ब्राह्मणानाम्	३	१	३
क्षत्रियाणाम्	६	२	६
वैश्यानाम्	९	३	९
शूद्राणाम्	१२	५	१२

तृतीयवर्षादूर्ध्वं पञ्चसप्ततिमासात् प्राक् कृतचूड़स्याकृत-चूड़स्य वा मरणेऽशौचदिनानि	
ब्राह्मणानाम्	३
क्षत्रियाणाम्	६
वैश्यानाम्	९
शूद्राणाम्	१२

११६- अथ मासत्रयाधिकषड्वर्षाद्यात्मकात्स्वस्वव्रतबन्धकालादूर्ध्वमनुपनीतस्य मरणे द्वैमत्यं भवति । ये तावत्कर्मप्राधान्यमिच्छन्ति तेषां गौड़दाक्षिणात्यानां त्र्यहं षड़हं नवाहं द्वादशाहं वा वर्णभेदेन प्राग्वदाशौचं विधीयते । अथ ये कालप्राधान्यमिच्छन्ति तेषां गौड़ानां दाक्षिणात्यानां च सम्पूर्णाशौचं प्रवर्तते । दशाहं ब्राह्मणकुले, द्वादशाहं क्षत्रियकुले, पञ्चदशाहं वैश्यकुले, मासं शूद्रकुले इति । तत्रेत्थं मतभेदे कुलाम्नो-

यात् पारम्पर्याचारतः शिष्टादेशतश्च व्यवस्था । दशाहिनां तु सर्वेषामिहापि ब्राह्मणवत् ॥

पञ्चमप्तनिमासादूर्ध्वमनुपनीतमरणे ।

	कर्मप्रधानानाम्	कालप्रधानानाम्
ब्राह्मणानाम्	३	१०
क्षत्रियाणाम्	६	१२
वैश्यानाम्	९	१५
शूद्राणाम्	१२	३०

इति तृतीयविभागाधिकरणम् ।

(बालाशौचं वृत्तम्)

प्रौढाशौचम् ।

११७-उपनयनं व्रतादेशविधिः । तत्र ब्राह्मणस्य ब्रह्मग्रहः, क्षत्रियस्य धनुर्ग्रहो, वैश्यस्य प्रतोदग्रहः, शूद्रस्य तु वस्त्रयुग्मग्रहो व्रतादेशे मूलम् ।

११८-उपनयनादूर्ध्वं मरणे सर्वेषां सपिण्डानां स्ववर्णोचितं सम्पूर्णाशौचम् । तच्च ब्राह्मणानां दशाहम्, क्षत्रियाणां द्वादशाहम्, वैश्यानां सच्छूद्राणाञ्च पञ्चदशाहम् । निकृष्टशूद्राणां वर्णसंकराणां च मासमाशौचम् । सर्वेषां वा दशाहमेवाशौचम् । प्रतिलोमजाता इह वर्णसंकरशब्देनोच्यन्ते । अनुलोमजातानां तु स्वमातृजात्युक्तं द्वादशाहादिरूपमाशौचम् ।

११९- 'सर्वे वा स्युर्दशाहिनः' इति नियमननुरुन्धनानां येषां क्षत्रियाणां कुले दशाहाशौचमेव कुलाचारसिद्धं तेषां ब्राह्मणवदेवाशौचं जननमरणयोर्ज्ञेयम् ॥ अथ षट्त्रियपदाभिधानेन क्षत्रियत्वाभिमानिनां वैश्यानां, तथा राजपुत्रपदाभिधानेन प्रसिद्धानां क्षत्रियबन्धूनां, तथा देशविशेषे

केषांचिच्छूद्राणां च कुले द्वादशाहमेवाशौचं पारम्पर्येण व्यवहारसिद्धं दृश्यते तेषां क्षत्रियजात्युक्ताशौचमेवसुधीभिरुपदेष्टव्यम् । पारम्पर्यसिद्धस्यापि व्यवहारस्यानुरोध्यत्वात्-इति गोकुलनाथामृतनाथादयो मैथिलाः॥

१२०-अथ सोदकानां तु सर्ववर्णानां त्रिरात्रम् । सगोत्राणां तु सर्वेषां सद्यःशौचम् । सद्यःशौचे स्नानमात्रेण शुद्धिः । इति दाक्षिणात्याः । सगोत्राणामेकरात्रमिति केचित् ॥

१२१-कूटस्थमारभ्य सप्तमपुरुषपर्यन्तं सपिंडाः । ततश्चतुर्दशपुरुषपर्यन्तं सोदकाः समानोदकाः सकुल्या वोच्यन्ते । तत एकविंशपुरुषपर्यन्तं सगोत्रा गोत्रजा वा इत्येकेषां दाक्षिणात्यानाम् ।

१२२-सप्तमपुरुषादूर्ध्वं दशमपुरुषपर्यन्तं सकुल्याः । तदूर्ध्वं जन्मनामस्मृतिपर्यन्तं सोदकाः । तदूर्ध्वं गोत्रजाः । तत्र सकुल्यानां त्रिरात्रम् । सोदकानां पक्षिणी । गोत्रजानां स्नानमात्रमिति गौड़ाः ॥

	सपिण्डानाम्	सकुल्यानाम्	सोदकानाम्	सगोत्राणाम्
ब्राह्मणानाम्	१०	३	१॥	सद्यः
क्षत्रियाणाम्	१२	,,	,,	,,
वैश्यानाम्	१५	,,	,,	,,
शूद्राणाम्	३०	,,	,,	,,

इति चतुर्थविभागाधिकरणम् ।

अथ शूद्रबालकानां पृथगादेशः ।

१२३—"गायत्र्यं ब्राह्मणं निरवर्तयत, त्रिष्टभा राजन्यं जगत्या वैश्यं, न केनचिच्छन्दसा शूद्रं निरवर्तयत्" इति श्रुतेर्वेलक्षण्यछन्दोविभागानुसारेण विभज्य येषां धर्मा व्यवस्थाप्यन्ते तेषु वर्णशब्दः प्रवर्तते । द्विविधश्च स धर्मो भवति—श्रौतः स्मार्तश्च । तत्र ब्राह्मणक्षत्रियवैश्यानां द्विविधा अप्येते धर्मा भवन्ति । तस्मात्रो वर्णा उच्यन्ते । शूद्राणां तु स्मार्त एव धर्मो विधीयते न श्रौतः। तस्मादेषामापेक्षिकनिष्यत्ते वर्णत्वं नावर्णत्वं च । स यस्मादयं चतुर्थोवर्णोऽवरवर्णाख्यायते ब्राह्मादिवर्णप्रसङ्गेन केचिदाशौचनियमाः प्रागुक्तप्रतिज्ञास्वाख्याताः ॥ अथ यस्मादयमवर्णः केषां चिदिष्टस्तदनुरोधेनैषां शूद्रबालकानामशौचसम्बन्धेन कञ्चिद् विशेषमप्याहुः स एष उत्तरप्रतिज्ञानुसारेण द्रष्टव्यः ॥

१२४—शूद्रा द्विविधाः—सच्छूद्रा निकृष्टशूद्राश्च । तत्र अद्भुया द्विजशुश्रूषवः पञ्चयज्ञादिविहितक्रियानिष्ठाः साध्वाचाराः पर्यवदातगुणा विशिष्टयोग्यताशालिनः शूद्राः सच्छूद्राः । ते हि द्विजमण्डलीसंस्रवमुक्ताः पात्रदानिरवांसिताः स्पृश्याश्च ज्ञप्यन्ते । ये तु प्रतिलोमजन्मादिविगिष्टसांकर्यदोषदूषिता ये वान्त्यजात्यावसायिदस्युम्लेच्छमेदश्चतुर्धा विभक्ता यथेच्छाहारविहारा उन्मर्यादा दृश्यन्ते ते निकृष्टा अस्पृश्याश्च ॥

१२५—सच्छूद्राणामविवाहितमृतानां षष्ठमासपर्यन्तमशौचाभावः । ततः पञ्चमवर्षपर्यन्तं त्रिरात्रम् । ततः षोडशवर्षपर्यन्तं द्वादशरात्रम् । तदूर्ध्वं पञ्चदशरात्रम् ॥

१२६—विवाहितमृतानां तु सच्छूद्राणां षष्ठमासपर्यन्तमशौचाभावः । ततः पञ्चमवर्षं यावत् त्रिरात्रम् । ततः षष्ठवर्षं यावद् द्वादशाहम् । तदूर्ध्वं तु पञ्चदशाहम् ।

१२७—अथ निकृष्टशूद्राणामविवाहितमृतानां षष्ठमासपर्यन्तमशौचाभावः । ततो द्वितीयवर्षपर्यन्तं पञ्चाहः । ततः षोडशवर्षपर्यन्तं द्वादशाहः तदूर्ध्वं मासमाशौचम् ॥ अथवा षष्ठमासान्तमाशौचाभावः । ततस्तृतीयवर्षपर्यन्तं पञ्चाहः । ततः षष्ठवर्षपर्यन्तं द्वादशाहः । तदूर्ध्वं मासमाशौच-

मिति केचित् ॥ एतां व्यवस्थां नानुमोदन्ते दाक्षिणात्या गौडाश्च केचित् ॥

१२८—विवाहितानां तु निकृष्टशूद्राणां षष्ठमासपर्यन्तं सद्यः शौचम् । ततो द्विवर्षपूर्तेः प्राक् खनने पञ्चाहम् । दहने द्वादशाहम् । तृतीयेतुवर्षे मातापित्रोर्द्वादशाहम् । सपिंडानां पञ्चाहम् । ततः षष्ठवर्षपर्यन्तं सर्वेषां द्वादशाहम् । ततः षोडशवर्षपर्यन्तं द्वादशाहं वा मासं वेति विकल्पः । षोडशवर्षोर्ध्वं तु मासमेवेति सिद्धान्तः । एवमेव सर्वेषां शूद्राणामविशेणाशौचव्यवस्था बोध्येत्याहुर्बहव इदि दिक् ॥

	सच्छूद्राणाम्		निकृष्टशूद्राणाम् ।	
	अविवाहितानाम्	विवाहितानाम्	अविवाहितानाम्	विवाहितानाम् ।
१ षष्ठमासान्तम्	०	०	०	सद्यः
२ द्विवर्षान्तम्	३	३	५	५ खन० १२ दह०
३ त्रिवर्षान्तम्	३	३	१२	५ सपि० १२ मातापित्रो
४ पञ्चवर्षान्तम्	३	३	१२	१२
५ षष्ठवर्षान्तम्	१२	१२	१२	१२
६ षोडशवर्षान्तम्	१२	१५	१२	१२ वा० ३० वा०
७ यावज्जीवनम्	१५	१५	३०	३०

इति शूद्राधिकरणम् ।

इति पुरुषाशौचाधिकारः प्रथमः ।

स्त्र्यशौचाधिकारः ।

१२९—माता पित्रोर्मरणे दशाहमध्ये मरणश्रवणे सत्यूढाया कन्याया-स्त्रिरात्रम् दशाहोर्ध्वंवत्सरान्ते कालान्तरेवा मरणश्रवणे पक्षिणी । अतिक्रान्ताशौचमत्रैवानुवर्त्तते ब्राह्मणवचनान्नान्यत्रेति दक्षिणात्याः । इति कन्यानुयोगिकाधिकरणम् ॥१॥

१३० कन्यायास्तु जन्मावधि दन्तोत्पत्तिपर्यन्तं मरणे दाहे खनने वा मातापित्रोरेकाहः । त्रिपुरुषसपिण्डानां सोदरभ्रातुश्च सद्यः शौचम् । अन्येषां त्वशौचं नास्ति ॥२॥

१३१—दन्तोत्पत्तेरूर्ध्वं वर्षत्रयपर्यन्तं कन्यामरणे मातापित्रोस्त्रिदिनम् । त्रिपुरुषसपिण्डानां तु सद्यः शौचम् । अन्येषां त्वशौचं नास्ति ॥२॥

१३२—वर्षत्रयादूर्ध्वं वाग्दानात् प्राक् कन्याया मरणे मातापित्रो-रेकाहाशौचम् । त्रिपुरुषसपिण्डानां त्वेकाहः । अन्येषां त्वशौचं नास्ति ॥३॥

१३३—वाग्दानोत्तरं विवाहात् प्राक् कन्याया मरणे पितृकुले भर्तृकुले च पित्रादीनां सर्वेषामासप्तमपुरुषं सपिण्डानामेकाहः इति दाक्षिणात्या । त्रिरात्रमिति केचित् ।

१३४—गौडास्त्वाहुः—कन्याया जन्मावधि द्विवर्षाभ्यन्तरेण मरणे सर्ववर्णानां पित्रादिसपिण्डानां सद्यः शौचम् । द्विवर्षोपरि वाग्दानात् प्राक् एकाहः । वाग्दानोत्तरं विवाहात् प्राक् कन्यामरणे भर्तृकुले पितृ-कुले च त्रिरात्रम् । यत्र तु वाग्दानं न जातं तत्र द्विवर्षानन्तरं विवाहपर्य-न्तमेकाहोरात्रम् । दाहकर्तुस्त्वत्रापि त्र्यहाशौचमेवेत्याहु । अयमेव पक्षः सम्मतो मैथिलानाम् । तत्र देशाचाराद् व्यवस्था ।

१३५—विवाहोत्तरं तु पतिगृहे सनाभिगृहे वा मरणे मातापित्रोः सापत्नमातुः सोदरभ्रातुश्च त्रिरात्रम् । भ्रातुः पक्षिणीति केचित् । एका-श्रमवासिनां वमात्रेयभ्रातृपितृव्यतत्पुत्रादीनां त्वेकाहः । पितुर्भिन्नाश्रम-वासिनां तु भ्रात्रादीनामाशौचं नास्ति । पित्रादीनामप्यशौचं नास्तीति केचित् भर्तृकुले तु स्ववर्णोचितं सम्पूर्णाशौचम् ।

१३६—दत्तकन्यायाः पितृगृहे मरणे प्रसवेच पित्रोः संसर्गशून्ययोस्त्रिरात्रम् सापत्नमातुः सापत्नभ्रातुः सोदरभ्रातुश्च त्रिरात्रम् । इतरेषां तु । संसर्गशून्यानां बन्धुवर्गाणामेकरात्रम् । संसर्गिणां तु सर्वेषां पूर्णाशौचम् । एतत् सर्वं सवर्णसाधारणम् । बन्धुवर्गास्तु एकक्रियापन्ना एकान्नमस्था भ्रातृवैमात्रेयपितृव्यतत्पुत्रादयो भवन्ति । इति कन्याप्रतियोगिकाधिकरणम् ।

१३७—भार्यामरणे पत्युर्दशाहः । परपूर्वायास्तु भार्यायाः मरणे सर्वेषां सवर्णानां त्रिरात्रम् । समानजातीयोत्कृष्टजातीयपुरुषान्तरसंगृहीतस्वभार्यावरणे सर्वेषां त्रिरात्रम् । हीनवर्णोपभुक्तायास्तु मरणे नाशौचम् ।

१३८—विवाहिता स्त्री स्वतन्त्रा भूत्वा यदि पाणिग्राहकादन्यं पुरुषमाश्रयति तदा यं यमाश्रयति तस्य तस्य पुरुषस्य तस्यां मृतायां त्रिरात्रमाशौचं भवति । किन्त्वस्य स्वयंग्राहकपुरुषस्य ये कुलजाताः सपिण्डादयस्तेषामाशौचं तत्र नास्ति । यदि च पाणिग्राहकेण तस्याः संगमः कृतस्तदा तस्याः परपुरुषाश्रयणेऽपि पाणिग्राहकगोत्रमेव तिष्ठति न स्वयं ग्राहकगोत्रमनुवर्तते । किन्तु यदि तस्यास्तेन सङ्गमो न कृतस्तदा येनान्येन प्रथमं सङ्गता स्यात् तत्सगोत्रा सा संपद्यते । एवमपि तस्य स्वयंग्राहस्य त्र्यहमेव तत्राशौचं न तु सगोत्रत्वादशौचवृद्धिः ।

१३९—अथ पाणिग्रहणे वृत्ते सप्तपदीसमारोहणे त्वसमाप्ते यदि बलदपहृता स्यात् तदा यावदेषा न प्रसूते तावत् पितृगोत्रावतिष्ठते । प्रसवानन्तरन्तु सा पौर्विकन्याग्निस्थाने पाणिग्राहकस्य स्वामिनः सगोत्रा भवति न तु बलात्कारेण हर्तुर्गोत्रं सा गृह्णाति । तेन तस्या मरणेऽपहर्तुस्त्रिरात्रमेवाशौचं स्यात् । इति भार्याधिकरणम् ।

इति स्त्र्यशौचाधिकारः ।

विगोत्राधिकारः

१४०—पुरुषस्त्र्यधिकारयोः सपिण्डसकुल्यसोदकसगोत्राणां सगोत्रत्वमेवापेक्ष्याशौचविधयः प्रतिज्ञाताः । अथोत्तरयोर्विगोत्रत्वमपेक्ष्य वक्तव्याः । तत्र विगोत्राः सप्तभिर्निमित्तैराशौचभाजो भवन्ति योनिसम्बन्धात्, विद्यासम्बन्धात्, प्रीतिसम्बन्धात् । सादेश्यसम्बन्धात्,

कर्मसम्बन्धात्, धर्मसम्बन्धात् स्पर्शसम्बन्धाच्च तत्र । योनिसम्बन्धाद्विधासम्बन्धाच्चासन्नविगोत्राः सम्बन्धिनो बन्धवश्चोच्यन्ते । तदितरे तु संसर्गिणः । तस्मादधिकारद्वैविध्येन विभज्य ते निरूप्यन्ते ।

१४१—भ्रातृभगिन्योः १ मातुलभागिनेययोः २ मातामहदौहित्रयोः ३ जामातृश्वशुरयोः ४ भागिनेयश्यालकयोः । ५ पितृष्वसृभ्रातृव्ययोः । ६ मातृष्वसृभागिनेययोः ७ । पुंबन्धूनां ८ । स्त्रीबन्धूनाम् ९ । दत्तकप्रतिग्रहीत्रोः१० गुरुशिष्ययोः ११ । सहाध्यायिनोश्च १२ । परस्परमशौचाधिकरणानि द्वादश ।

१४२—भ्रातृभगिन्योः परस्परगृहमरणे परस्परस्य त्रिरात्रम् । गृहान्तरमृतौ तु परस्परस्य पक्षिणी । सर्वत्र भगिन्यां मृतायां पक्षिणीत्येके ।

१४३—मातुलमरणे भगिन्यपत्यस्य पक्षिणी । उपकारादिसम्बन्धविशेषे स्वगृहस्थे वा मृते त्रिरात्रम् । पितृष्वस्रीयगृहे मातुलपुत्रस्य मातुलपुत्रस्य मरणे पैतृष्वस्रीयस्य त्रिरात्रम् । अन्यथा त्वेकाहः । मातृवैमात्रेयस्य मरणे भागिनेयस्याहोरात्रम् । मातुलान्यामरणे भर्तृभगिन्यपत्यस्य पक्षिणी । उपनीतभागिनेयमरणे मातुलस्य मातुलभगिन्याश्च त्रिरात्रम् । अनुपनीतभागिनेय मरणे तु मातुलस्य मातुलभगिन्याश्चपक्षिणी । सर्वत्रभागिनेयमरणे पक्षिणीत्येके ।

१४४—मातामहमरणे दुहित्रपत्यस्य त्रिरात्रम् । मातामहीमरणेदुहित्रपत्यस्य पक्षिणी । उपनीतदौहित्रमरणे मातामहस्य मातामह्याश्च त्रिरात्रम् । अनुपनीतदौहित्रमरणे तु पक्षिणी । सर्वत्रदौहित्रमरणे पक्षिणीत्येके ।

१४५—श्वशुरयोर्मरणे सन्निधौसति जामातुस्त्रिरात्रम् । एक रात्रमित्येके सन्निधिस्त्वेकगृहस्थितिः । असन्निधौ त्वेकग्रामस्थत्वे पक्षिणी । ग्रामान्तरस्थयोस्तु तयोर्मरणे रात्रिमात्रमहोरात्रं वा । श्वशुरयोर्मरणेनिर्गणजामातुः पक्षिणीत्यन्ये । जामातृमरणे तु श्वशुरयोरेकाहः, सद्यः शौचं वा ।

१४६—श्यालकमरणे भगिनीभर्तुरेकदिनमात्रम् । अहोरात्रमित्येके । श्यालकसुतमरणे तु स्नानमात्रम् ।

१४७—पितृष्वस्रुर्मरणे भ्रात्रपत्यस्य पक्षिणी । भ्रातृपुत्रगृहे तु पितृष्वस्रुर्मरणे भ्रातृपुत्रस्य त्रिरात्रम् ।

१४८—मातृष्वस्रुर्मरणे स्वस्रपत्यस्य पक्षिणी । भगिनीपुत्रगृहे तु मातृष्वस्रुर्मरणे भगिनीपुत्रस्य त्रिरात्रम् ।

१४९—पितृष्वस्रीय-मातृष्वस्रीय-मातुलपुत्रा बान्धवाः । ते चैतेषां आत्मबान्धवाः, पितृबान्धवाः मातृबान्धवाश्चेति । तथा च पितृष्वसुः पुत्रौ, मातुश्वसुः पुत्रो, मातुलपुत्रश्चेत्यात्मबान्धवाः । पितामहभगिनीपुत्रः, पितामहीभगिनीपुत्रः, पितामहीभ्रातृपुत्रश्चेत्येते पितृबान्धवाः ॥ मातामहभगिनीपुत्रो, मातामहीभ्रातृपुत्रश्चेत्येते मातृबान्धवाः ॥ तत्रात्मबन्धुत्रयमरणे पितृबन्धुत्रयमरणे च सर्ववर्णानां पक्षिणी । मातुलपुत्रेमृते एकरात्रमित्येके । मातृबन्धुत्रयमरणे तु सर्ववर्णानां पक्षिणी वाऽहोरात्रं वेति विकल्पः ।

१५०—पितृष्वस्रादिकन्यानां विवाहितानां मरणे सत्येकाहः ।

१५१—दत्तकपुत्रमरणे पूर्वापरपित्रोस्त्रिरात्रम् । सपिण्डानां त्वेकाहः । पूर्वापरपित्रोर्मरणे दत्तकस्य दशाहम् । देशान्तरस्थे तु त्रिरात्रम् । दत्तकपुत्रस्यासपिण्डकुलागृहीतस्य पुत्रपौत्रादीनां मरणे सपिण्डानामेकाहः । सपिण्डे तु पुत्रीकृते सपिण्डानां दशाह एव ।

१५२—क्षेत्रजादिष्वेकादशविधेषु पुत्रेषु मृतेषु मातापित्रो स्त्रिरात्रम् । क्षेत्रजादीनामपि मातापितृमरणे त्रिरात्रम् ।

१५३—एकमातृकयो र्भिन्नपितृकयोर्भ्रात्रोरेकस्य मरणे परस्य स्वमातृजात्युक्तं पूर्णाशौचम् । पितुस्तु तयोर्मरणे त्रिरात्रम् । तत्सपिण्डानां तयोर्मरणे एकरात्रमाशौचम् ।

१५४—प्रथममन्येनोढ़ा तेनैव जनितपुत्रा च सा पुत्रसहितैवान्यमाश्रिता पश्चादपीनापि जनितपुत्राभूत् । तत्र तयोः पुत्रयोर्यथासम्भवं मरणे द्वितीयपुत्रस्य यः पिता तस्य त्रिरात्रम् । तत्सपिण्डानामेकरात्रम् । द्वितीयपुत्रस्य यः पितामहस्य मरणे तु तथाविधपुत्रयोरपि त्रिरात्रम् । तथाविधपुत्रयोस्तु परस्परं मरणे प्रसवेऽपि वा मातृजात्युक्ताशौचम् ॥ इत्थं योनिसम्बन्धिनो विगोत्रा व्याख्याताः ॥१॥

१५५—आचार्यमरणे तत्संस्कारकर्तुः शिष्यस्य दशरात्रम् । यस्तु संस्कारं न करोति तथाविधस्य शिष्यस्य त्रिरात्रम् । आचार्यपत्नीमरणे, आचार्यपुत्रमरणे च गुरुकुलस्थितस्य शिष्यस्य त्रिरात्रम् । समाप्तेनोक्तरं स्वगृहस्थस्य शिष्यस्य तयोराचार्यपुत्रपत्न्योर्मरणे एकाहः । गुर्वङ्गनामरणे पक्षिणीत्यप्याहुः ।

१५६—उपनीय किञ्चिद्वेदाध्यापके, अनुपनीय सम्पूर्णवेदाध्यापके च गुरौ मृते पक्षिणी । तथाविधगुरुपत्न्याश्च मृतायां पक्षिणी ।

१५७—यत्किञ्चिद्ध्यापकोपाध्यायमरणे शिष्यस्यैकरात्रम् । तादृशोपाध्यायपत्न्याश्च मृतायामेकरात्रम् । तदुपाध्यायपुत्रे च मृते एकं दिनमात्रं रात्रिमात्रं वा ।

उपनीयाध्यापक आचार्यः, वेदैकदेशाध्यापक उपाध्यायः ।

१५८—आचार्यगृहस्थितशिष्यमरणे आचार्यस्य त्रिरात्रम् । उपनीय वेदैकदेशमध्यापितस्य, अनुपनीय सम्पूर्णशाखामध्यापितस्य शिष्यस्य मरणे उपाध्यायस्यैकाहोरात्रम् ।

१५९—वेदे सहाध्यायिनोर्मरणे पक्षिणी । यत्किञ्चित्पाठे सहाध्यायिनोर्मरणे एकाहः । समानब्रह्मचर्ये एकस्माद्गुरोरधीयाने मृते इतरस्यैकरात्रम् । समानब्रह्मचर्ये भिन्नाद्गुरोरधीयाने अपरस्यैकदिनमात्रं रात्रिमात्रं वा । इत्थं विद्यासम्बन्धिनो विगोत्रा व्याख्याताः । ॥२॥

इत्यासन्नविगोत्राः ।

१६० सन्निधिवासि मित्रं यद्गृहे म्रियते तद्गृहस्थस्य त्रिरात्रम् । अन्याहृतं मित्रं यद्गृहे म्रियते तस्य पक्षिणी । स्वमित्रस्य स्वगृहादन्यत्र मरणे एकरात्रम् ॥ इत्थं प्रीतिसम्बन्धिनो विगोत्रा व्याख्याताः । (३)

१६१ श्रोत्रियो यद्गृहे म्रियते तस्य गृहस्थस्य त्रिरात्रम् । अश्रोत्रिये स्वगृहे मृते एकरात्रम् । "भगवानङ्गिरास्त्वाह—

गृहे यस्य मृतः कश्चिदसपिण्डः कथंचन
तस्याप्यशौचं विज्ञेयं त्रिरात्रमिति निश्चयः ॥

विकल्पे त्वाचारः प्रमाणमाप्तवचनं च ॥ अथ एकग्रामे श्रोत्रियमरणे ग्रामवासिनामेकरात्रम् ॥ इत्थं सादेश्यसम्बन्धिनो विगोत्रा व्याख्याताः॥४

१६२ यद्गृहे ऋत्विङ्म्रियते तस्य यजमानस्य त्रिरात्रम् । अन्यत्रमृते त्वेकरात्रम् । सदायाज्ये यजमाने मृते याजकस्य त्रिरात्रम् ॥ इत्थं कर्मसम्बन्धिनो विगोत्रा व्याख्याताः ॥ (४)

१६३—स्वतन्त्रस्य महाराजस्य स्वकर्मस्थस्य मरणे प्रजानामेकाहोरात्रम् अस्वकर्मस्थे राजनि मृते एकं दिनमात्रं रात्रिमात्रं वा ॥ इति धर्मसम्बन्धिनो विगोत्रा व्याख्याताः ॥ (६)

१६४—अशौचिनामन्नभोजनैकशय्यासनादिसहवासभूयस्त्वपरिशीलने यात्तेषां निमित्तिनामशौचं तावदेवैषां संसर्गिणामप्यशौचमनुवर्तते । अशौचिगृह्याणामशौचिस्वामिकानां वा द्रव्याणां संसर्गे तु नाशौचसम्बन्धः ॥ इत्थमङ्गस्पर्शतः सम्बन्धिनो विगोत्रा व्याख्याताः ॥ (७) इति संसर्गिविगोत्राः ।

सप्तानामप्येषां विगोत्रत्वाविशेषेऽपि योनिसम्बन्धिनां विद्यासम्बनाच्चासन्नविगोत्रत्वम्, इतरेषां तु संसर्गित्वम् इत्येवं द्वैधाधिकारो विज्यते इति बोध्यम् । इति संसर्गाशौचाधिकारः ।

१६५—आद्या दक्षिणकालिका भगवती श्यामा कुले देवता
स्वाम्नायोऽपि च दक्षिणः शिवपथः स्मार्तोऽस्ति यस्यान्वये ॥
दीक्षा यस्य शिवागमे शिवतसे धर्म्मे च निष्ठाऽधिका
सोऽयं श्रीमधुसूदनो व्यतनुताशौचे समीक्षामिमाम् ॥१॥

इति मरणाध्यायश्चतुर्थः ॥४॥

अथोत्तरक्रियाध्यायः ।

१६६ तत्र रोदनं स्पर्शनमलङ्करणमनुगमनं वहनं दहनमुदकदानं पिण्डदानं चेत्यष्टावुत्तरकर्माणि भवन्ति । अत्रापि दहनं द्वेधा-शवदहनं प्रतिकृतिदहनञ्च । तदित्थं नवकर्माणि । तेषामेकैकं कुर्वतो वैलक्षण्येनाशौचमनुवर्तते इत्यतस्तद्विविच्यते ।

रोदनाधिकारः ।

१६७ शूद्रे मृतेऽस्थिसञ्चयनकालाभ्यन्तरे तद्गृहे गत्वाऽश्रुनिपातं कुर्वतो द्विजस्य त्रिरात्रम् । स्थानान्तरे त्वश्रुनिपातं कुर्वतोऽहोरात्रम् । शूद्रस्य तु सर्वत्र रोदने नक्तेन शुद्धिः ।

१६८ शूद्रे मृतेऽस्थिसञ्चयनकालादूर्ध्वं मासाभ्यन्तरे तद्गृहेऽश्रुपातने द्विजस्याहोरात्रमशौचं सचैलस्नानं च । शूद्रस्य तु सर्वत्र रोदने नक्तेन शुद्धिः ।

१६९ मृतशूद्रबान्धवैः सह रोदनरहितविलापमात्रे ब्राह्मणस्याऽहोरात्रम् ।

१७० अस्थिसञ्चयनकालस्तु पूर्णाशौचे ब्राह्मणस्य चतुर्थाहः । क्षत्रियस्य षष्ठाहः । वैश्यस्याष्टमाहः । शूद्रस्य दशमाहः । त्र्यहाशौचे तु सर्वेषां द्वितीयाहः । अस्थिसञ्चयनदिनेष्वेव तेषां तेषामस्पृश्यता निवर्तते । असति विशेषाभिधाने कर्माशौचत्रिभागकालेनास्पृश्यतानिवृत्तेः सिद्धान्तात् ।

१७१ अथ वैश्यक्षत्रिययोर्गृहे रोदने द्विजस्य द्वयहेन शुद्धिः । शूद्रस्य नक्तेनैव शुद्धिः ।

१७२ विप्रगृहेऽस्थिसञ्चयनात् पूर्वं रोदने द्विजस्यैकाहेन शुद्धिः । शूद्रस्य तु नक्तेन ।

इति रोदनाधिकारः ।

१—एतदधिकारोक्ताः सिद्धान्ताः शुद्धितत्वे प्रतिज्ञाताः ।

स्पर्शनाधिकारः ।

१७३ दिवा शवस्पर्शे नक्षत्रदर्शनाच्छुद्धिः । रात्रौ शवस्पर्शे सूर्यदर्शनाच्छुद्धिः ।

इति स्पर्शनाधिकारः ।

अलङ्करणाधिकारः ।

१७४ असजातीयशवस्पर्शे शवजात्युक्ताशौचमनुवर्तते ।

१७५ स्नानादिविधानं सिन्दूराद्यर्पणं रथिसम्पादनं चेत्येतत् सर्वमलङ्करणविभागे गण्यते ।

१७६ असपिण्डालङ्करणे ज्ञानतः पादकृच्छ्रम् । अज्ञानादुपवासः । अशक्तौ स्नानमात्रम् ।

इत्यलङ्करणाधिकारः ।

अनुगमनाधिकारः ।

१७७ सपिण्डशवानुगमने दोषो नास्ति । असपिण्डेऽप्यनाथक्रियायां दोषो नास्ति ।

१७८ तुल्यवर्णस्योत्कृष्टवर्णस्य वा शवस्यानुगमने सचैलं स्नात्वाऽग्निं स्पृष्ट्वा घृतं प्राश्य पुनः स्नात्वा प्राणायामशतं कुर्यात् । हीनवर्णशवानुगमने तु क्षत्रिये एकाहः । वैश्ये पक्षिणीति दाक्षिणात्याः । द्व्यहमिति-गौड़ाः । शूद्रे त्रिरात्रम् । स्नानादिकं च प्राग्वत् । प्रमादाच्छूद्रशवानुगमने ब्राह्मणस्य सचैलस्नानाग्निस्पर्शघृतप्राशनैः शुद्धिः ।

इत्यनुगमनाधिकारः ।

वहनदहनाधिकारौ ।

१७९ यदि वहनमात्रं कुर्यात् न दहनं; यदि वा दहनमात्रं कुर्यान्न वहनं; यदि वोभयं कुर्याद्वहनं दहनं च-त्रेधाऽप्येवं तुल्यमेवाशौचं प्रवर्तते ।

१८० मातुलमातृष्वसृपितृष्वसृप्रभृतीनां यदि वहनं दहनमुभयं वा करोति तच्च स्नेहेन वा करोति तदा सर्ववर्णानां त्रिरात्रमेवाशौचं, न तु पक्षिणी, अहोरात्रम्, एकरात्रं वा ।

१८१ मातुलादिसम्बन्धिभिन्नानां तु सवर्णानां स्नेहेन निर्हारं कुर्वाणानां संस्रवविशेषाभावे तद्गृहवासाभावे तदन्नभोजनाभावे च सति निर्हरणमात्रेणैकाहमाशौचम् । तद्गृहवासाभावे तदन्नभोजनाभावेऽपि संस्रवविशेषसत्वे त्रिरात्रम् । संस्रवविशेषाभावे तदन्नभोजनाभावेऽपि तद्गृहवाससत्वे त्रिरात्रम् । विविक्ततद्गृहवाससत्वे त्वहोरात्रम् । अशौचि-

कुलान्नभोजने तु तद्गृहवासेऽप्यतद्गृहवासेऽपि तत्तुल्याशौचं दशाहादि भवति । भृतिग्रहणलोभं विना स्कन्धदानं स्नेहेन निर्हारः ।

१८२ भृतिग्रहणलोभात् सवर्णनिर्हारं कुर्वाणस्य तु मृतकजात्यशौचं दशाहादिकमनुवर्तते ।

१८३ स्नेहेन विजातीयनिर्हारं कुर्वाणस्य मृतकजात्यशौचं दशाहादिकं स्यात् । भृतिग्रहणेन लोभाद्विजातीयनिर्हारं कुर्वाणस्य तु मृतकजात्यशौचाद्द्विगुणमाशौचं प्रवर्तते ।

१८४ अनाथस्य तु सवर्णस्य धर्मबुद्धया निर्हारेसद्यः शौचम् । तत्र सचैलस्नानाग्निस्पर्शघृतप्राशनैः प्राणायामशतोत्तरैः शुद्धिः । धर्मार्थमनाथसवर्णनिर्हरणादावपि मातुलादिसम्बन्धे सति त्रिरात्रमेवाशौचम् । न तु सद्यः शौचं स्यात् । असम्बन्ध एव वोढुः सद्यः शौचम् । सम्बन्धे तु सति वोढुस्त्रिरात्रमिति पैठीनसिना नियमितत्वात् ।

१८५—दहनं कुर्वाणस्याप्येतत्सर्वं यथावन्नेयम् । चितायां करीषेन्धनदानं दहनम् । यस्तु चिताधूमं सेवते तस्य स्नानाच्छुद्धिः ।

इति वाहदाहाधिकारः ।

प्रतिदहनाधिकारः ।

१८६—दशाहमध्ये आहिताग्नेरस्थिदाहे प्रतिकृतिदाहे वा सर्वसपिण्डानां शेषदिवसैरेव शुद्धिः । दशाहादूर्ध्वं तु आहिताग्नेरस्थिदाहे प्रतिकृतिदाहे वा सर्वसपिण्डानां दशाहाद्याशौचं स्यात् ।

१८७—अनाहिताग्नेस्तु—अस्थिदाहे पर्णाशरदाहे च पत्नीपुत्रयोः पूर्वमगृहीताशौचयोर्दशाहादिकं पूर्णाशौचम् । गृहीताशौचयोस्तु पत्नीपुत्रयोः संस्कारकालेऽपि त्रिरात्रम् । पत्नीसंस्कारे पत्युरप्येवम् । सपत्नीसंस्कारे सपत्न्या अप्येवम् ।

१८८—अन्यसपिण्डानां तु पूर्वमगृहीताशौचानामनाहिताग्निसंस्कारकाले त्रिरात्रम् । पूर्वगृहीताशौचानां तु सपिण्डानामनाहिताग्निसंस्कारकाले स्नानमात्रम् ।

इति प्रतिदहनाधिकारः ।

उदकदान-पिण्डदानाधिकारौ ।

१८९—उदकदानं पिण्डदानं चेत्यौर्ध्वदेहिकं कर्म । असम्बन्धे सत्यौर्ध्वदेहिकक्रियाकरणे द्विविधं कल्मषं संसज्जते—अघंच, एनश्चेति । तत्राद्यस्याशौचकालेन शुद्धिर्भवति । एनस्तु दुरितदुष्कृतादिपर्यायस्य विशिष्टव्रतादिपुण्यकर्मकरणादपनोदनं भवति । अतस्तत्रोभयमादिश्यते—अशौचशुद्धिश्च प्रायश्चित्तं चेति । तत्र प्रायश्चित्तं यथा—स्वस्मादुत्कृष्टानां सर्ववर्णानामौर्ध्वदेहिकक्रियाकरणे मृतकजातीयमाशौचं प्रवर्तते । तदशौचनिवृत्तौ च कृच्छ्रत्रयं कुर्यात् ।

१९०—स्वस्मान्निकृष्टानां सर्ववर्णानामौर्ध्वदेहिकक्रियाकरणे मृतकजातीयमाशौचं भवति । तन्निवृत्तौ च कृच्छ्रत्रयं द्विगुणं चतुर्गुणं वा वर्णनिकृष्टतारतम्येन कुर्यात् ।

१९१—आशौचशुद्धिप्रकरणे प्रसङ्गादियमत्र पातकशुद्धिरप्याख्यातेति दिक् । इत्युदक पिण्डदानाधिकारौ ॥

१९२—शाण्डिल्यासितदेवलप्रवरकः शाण्डिल्यगोत्रः सुधी
श्छन्दोगः पथि कौथुमे चरति यो वेदस्य सामात्मनः ॥
कृत्यं गोभिलसूत्रतो हि कुरुते योऽनाहिताग्निर्द्विजः
सोऽयं श्रीमधुसूदनो व्यतनुताशौचे समीक्षामिमाम् ॥१॥

इत्युत्तरक्रियाध्यायः पञ्चमः ॥ ५ ॥

अथ दोषाशौचाध्यायः—

१९३—अत्राध्याये संसर्गदोषाधिकारः । आत्मीयदोषाधिकारः । कालदोषाधिकारः । रजोदोषाधिकार—इति चत्वारोऽधिकाराः प्रदर्श्यन्ते ॥

१९४—अन्यपूर्वागृहे यस्य भार्या स्यात्तस्य नित्यशः ।
आशौचं सर्वकार्येषु गृहे भवति सर्वदा ॥ १ ॥
व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा ।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ॥ २ ॥
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः ।
श्रद्धात्यागविहीनस्य भस्मान्तं सूतकं भवेत् ॥ ३ ॥

संसर्गदोषान्नित्याशौचम्

१९५—परपूर्वा पाणिगृहीता यस्य द्विजातेर्गृहाधिकारिणी भवति तस्य होमदान प्रतिग्रहादिफलसिद्धिप्रतिबन्धकं सार्वकालिकमशौचं वाच्यम् ।

इति संसर्गदोषान्नित्याशौचम् ।

आत्मीयदोषान्नित्याशौचम् ।

१९६ यः कर्मकरणादावसामर्थ्यप्रयोजकदीर्घरोगेण सर्वदा ग्रस्तः स्यात् । योऽर्थसंग्रहप्रवणो लोभादात्मानं पुत्रदारान् धर्मकृत्यं च परिपीडयन्नर्थान् प्रचिनोति । यः सर्वदा ऋणग्रस्ततया नित्यं धनिकासेधितः स्यात् । य उपनयनादिसंस्कारहीनः स्यात् । यो गायत्रीरहितः स्यात् । यो भार्यावशंवदतया गुरुनिर्भर्त्सकः स्यात् । योऽकार्यगतचित्ततया नित्यकर्माद्युपेक्षकः स्यात् । यः परायत्ततया निजावश्यकधर्मकर्मसु नित्यमलब्धावसरः स्यात् । यो वा श्रद्धाविहीनः स्यात् । यो नित्यं दानपराङ्मुखः स्यात् । ईदृशानां स्वविधेयधर्माचरणे मनो-योगाभावात्तत्कृतं कर्म नास्तीत्यशुचि-साधर्म्यमर्थसिद्धं बोध्यम् । इदमाशौचं जननमरणादिनिमित्तकाशौचाद्भिन्नमेव प्रतिपद्यते । तच्च भस्मान्तं मरणान्तं वाऽशौचमित्युच्यते ॥

इत्यात्मीयदोषान्नित्याशौचम् ।

कालदोषाद्याप्याशौचम् ।

१९७ चन्द्रसूर्योपरागादावपि पूर्वविलक्षणमशौचं दोषवशादुत्पद्यते । तच्च यावन्निमित्तकालमवस्थाय निमित्तापायेन सह निवर्तते । इतिदिक् ।

इति कालदोषाद्याप्याशौचम् ।

रजोदोषाद्याप्याशौचम् ।

१९८ रजस्वलायाः सप्तदशदिनात् प्राक् पुनोरजोदर्शने सद्यः शौचम् । तत्र स्नानमात्राच्छुद्धिः । अष्टादशे दिने रजोदर्शने सत्येकरात्रम् । एकोनविंशदिने रजोदर्शने सति दिनद्वयम् । विंशतेरूर्ध्वं तु रजोदर्शने दिनत्रयमाशौचम् ॥ १ ॥

१९९ यस्यास्तु विंशतिदिनादर्वागेव प्रायेण रजोदर्शनं भवति तस्या दशमदिनात् प्राक् पुना रजोदर्शने स्नानमात्रम् । एकादशे दिने सत्येकरात्रम् । द्वादशे द्विरात्रम् । त्रयोदशदिनादारभ्य त्रिरात्रम् ॥ २ ॥

इति रजोदोषाशौचाधिकारः ।

२०० राजद्वारमुपागतो जयपुरे वर्षे चतुर्विंशके
यः संमानमवाप्य राजभवने मत्स्यप्रदेशप्रभोः ॥
श्रीमन्माधवसिंहभूपतिमणौ धर्मोपदेष्टाऽभवत्
सोऽयं श्रीमधुसूदनो व्यतनुताशौचे समीक्षामिमाम् ॥ १ ॥

इति दोषा शौचाध्यायः षष्ठः ॥ ६ ॥

अथ पाताध्यायः ७ ।

२०१ पातः । अघसङ्करः । अशौचसङ्करः । अशौचसम्पातः । अपरपातः । उपनिपातः संपाताशौचम् । संकीर्णाशौचम् इत्येकार्थाः अघवृद्धिमदाशौचं त्वस्यैकदेशः ॥

२०२ अत्राध्याये गौडसंप्रदायो द्राविडसम्प्रदायः फक्किका चेतित्रयोऽधिकाराः प्रदर्श्यन्ते ।

गौडसम्प्रदायाधिकारः ।

पूर्वानुक्रान्ताशौचस्य कालविभागेनाशौचान्तरपाते तद्विभागानुसारेण सङ्कीर्णाशौचं प्रवर्तते । तत्र कालविभागः पञ्चधा—पूर्वाशौचस्य प्रथमन्दिनमेको भागः । १ । द्वितीयादिपञ्चमान्तं दिनचतुष्कं द्वितीयो भागः । २ । षष्ठादिनवमान्तं दिनचतुष्कं तृतीयो भागः । ३ । दशमन्दिनं चतुर्थो भागः । ४ । दशम्या रात्रेरन्तिमः प्राचीप्रकाशात्मको ऽरुणोदयकालः पञ्चमोभागः । ५ । एवं पञ्चभिर्भागैर्भिन्नाऽशौचव्यवस्था पञ्चधा भवति । (केचित्तु प्रथमादिनवमान्तानां द्वितीयादिदशमान्तानां वा दिवसानां भागत्रयेण विभज्य प्रथमभागद्वये ऽन्यां द्वितीये चान्यां व्यवस्थामिच्छन्ति तदेतन्मतं बहुसंमतं नास्तीत्युपेक्ष्यते) ॥

२०३ आशौचद्वयसाम्पातिकस्वरूपं षोडशधा मृतके मृतकम् ।१। मृतके सूतकम् । २ । सूतके मृतकम् । ३ । सूतके सूतकम् । ४ । इति जाति-

कृताश्चत्वारो भेदाःप्रत्येकं चतुर्द्धा-पूर्णंपूर्णम् ।१। पूर्णंखण्डम् ।२। खण्डेपूर्णम् ।३। खण्डेखण्डम् ।४। इत्यवस्थाभेदात् ॥ भोग्यकालोऽवस्था ॥ तेन षोडशैतानि सङ्कीर्णाशौचस्थानानि । तेषां च पूर्वोक्तकालविभागपाञ्चवि-ध्यादशीतिः प्रकाराः ॥

२०४-तत्र मृतके मृतकं सूतके सूतकं च सजातीयं भवति । यत्तु मृतके सूतकं सूतके मृतकं वा तद्विजातीयम् । दशाह-द्वादशाह-पञ्चदशाह-मा-सात्मकमाशौचं पूर्णमित्युच्यते । सद्यः शौचै-काह-पक्षिणी-द्व्यह-त्र्यह-पञ्चाहाद्यात्मकं त्वपूर्णाशौचं खण्डमित्युच्यते । पूर्णे पूर्णं खण्डे खण्डमि-तिवासमकालं पूर्णे खण्डं खण्डे पूर्णमितिवा विषमकालम् । एषां भे-देनाशौचव्यवस्था भिद्यते ।

२०५-पूर्वाशौचप्रथमदिनेऽशौचान्तरोपनिपाते तन्त्रेणोभयोरेक एव शुद्धिकालः । तेनैकस्मिन्दिने जनने जननान्तरस्य, मरणे मरणान्तरस्य वा सन्निपाते दशरात्रादिकमेकमेवाशौचं यथायथमवतिष्ठते । न तु निमित्त-द्वयनिबन्धनाऽशौचवृद्धिः ।

तत्रादौ सजातीयाधिकरणम् ।

२०६-दशाहाशौचे द्वितीयं दिनमारभ्य पञ्चमरात्रिपर्यन्तं यदि सजा-तीयं द्वितीयं दशाहाशौचमापतति तदा पूर्वाशौचव्यपगमेन शुद्धिः ।

२०७-षष्ठदिनादि नवमरात्रिपर्यन्तं द्वितीयाशौचप्राप्तौ द्वितीयाशौच-व्यपगमेन शुद्धिः ।

२०८-दशमेऽहोरात्रे पूर्णाशौचान्तरपाते सति तद्दिनानन्तरं दिन-द्वयेनाधिकेन शुद्धिः ।

२०९-दशम्या रात्रेः शेषेऽरुणोदयवेलायां पूर्णाशौचान्तरपाते सूर्यो-दयानन्तरं त्रिरात्रेणाधिकेन शुद्धिः॥१॥ "उदयात् प्राक् चतस्रस्तु नाडिका अरुणोदयः" इति स्कान्दे । अयमेव प्रभातकाल इति रत्नाकरः ॥२॥

२१०-वर्धिते द्व्यहाशौचे त्र्यहाशौचे वा यदि पुनः पूर्णाशौचान्तरं पतति तदा द्व्यहत्र्यहयोर्लघुत्वाद्गुरुतरस्य पश्चिमाशौचस्यापगमेन शुद्धिः इत्येवं ब्राह्मणसम्बन्धेन पूर्णे सजातीये समकालाशौचे व्यवस्था नेया ।

२११-क्षत्रियवैश्यशूद्राणान्तु स्वस्वपूर्णाशौचपूर्वार्धे समानदिनव्यापकमशौचान्तरं यदि पतति तदा पूर्वाशौचव्यपगमेन शुद्धिः। उत्तरार्धे त्वशौचान्तरपाते द्वितीयाशौचव्यपगमेन शुद्धिः ।

२१२-पूर्णाशौचान्त्यदिने पूर्णाशौचान्तरपाते सर्वेषां तद्दिनानन्तरं द्विनद्वयेन शुद्धिः ।

२१३-पूर्णाशौचान्त्यदिनस्य रात्रिशेषे प्रभातकाले पूर्णाशौचान्तरपाते सूर्योदयादारभ्याधिकेन दिनत्रयेण शुद्धिः । इति क्षत्रियादीनां पूर्णे सजातीये समकाले चाशौचे व्यवस्था ज्ञेया ।

२१४-त्र्यहादि खण्डाशौचाभ्यन्तरं त्र्यहादिसमकालाशौचपाते द्वितीयाशौचव्यपगमेन शुद्धिः । इति सजातीये पूर्णे खण्डे समकाले चाशौचे व्यवस्था ।

२१५-विषमकाल व्यापकानामशौचानां- सन्निपातेऽधिकदिनव्यापिनाऽशौचेनातीतेन शुद्धिः। इति सजातीये पूर्णे खण्डे वा विषमकाले व्यवस्था ।

अथ विजातीयाधिकरणम् ।

२१६-सूतकाभ्यन्तरे मृतकाशौचपाते तथा मृतकाभ्यन्तरे सूतकाशौचपाते वा मरणाशौचव्यपगमेनैव शुद्धिः । तेन जननाशौचमध्ये मरणनिमित्तकसद्यः शौचाद्यल्पकालिकाशौचान्तरपाते तेनैव जननाशौचं बाध्यते।

२१७-त्र्यहादि शावमध्ये दशाहादि सूतकपातेऽधिकमपि द्वितीयाशौचं नास्ति किन्तु मरणाशौचस्य बलवत्त्वात्पूर्वशेषेणैव शुद्धिः । यत्तु दाक्षिणात्याः स्वल्पाशौचमध्ये दीर्घाशौचपाते दीर्घाशौचस्य बलवत्त्वात् पूर्वेण शुद्धिं नेच्छन्ति तदुपेक्ष्यम् ।

२१८-स्त्रीणान्तु स्वप्रसवनिमित्तमाशौचं प्रातिस्विकम् । अलस्तदन्येन न बाध्यते । तस्मात्स्त्रीणां पतिमरणेऽपिपुत्रजन्मनिमित्ताशौचं विंशतिदिनानि, कन्याजन्मनिमित्ताशौचं तु मासं यावदवतिष्ठते। तदूर्ध्वं कर्माधिकारः ॥

२१९-पितृमातृभर्तृमरणे सत्याशौचान्तरपाते कंचिद्विशेषमातिष्ठन्ते दाक्षिणात्याः । तन्नादर्त्तव्यम् इति । विजतीयाशौचे पूर्णे खण्डे वा समकाले विषमकाले वा व्यवस्था ।

इति गौड़सम्प्रदायाधिकारः ॥

अथ द्राविडसंप्रदायाधिकारः ।

२२० सङ्कीर्णाशौचनिर्द्धारणार्थं पूर्वाशौचविभागश्चतुर्द्धा पूर्वाशौचस्योपक्रमदिनं प्रथमभागः ।१। द्वितीयादिनवमान्तं दिनाष्टकं मध्यमोभागः ।२। दशमी रात्रिरन्तिमो भागः ।३। दशम्या रात्रेरन्तिमः प्रहरः शेषभागः ।४। एवं चतुर्भिर्भागैः पूर्वाशौचकालं विभज्य द्वितीयाशौचपाते व्यवस्था कार्य्या ।

२२१ सङ्कीर्णाशौचस्वरूपं द्वादशधा-मृतके मृतकम्, मृतके सूतकम्, सूतके सूतकम्, सूतके मृतकम्, इति चत्वारो भेदाः । ते समन्यूनाधिकपातभेदात्प्रत्येकं त्रेधा-तदित्थमे ते सांपातिका द्वादशभावा, आशौचभेदे निमित्तानि ।

तत्र प्रथमभागे—

२२२ प्रथमदिने तावदुत्तरक्रिया शौचाध्याये रोदनस्पर्शनानुगमन वहनदहनादिभिर्निमित्तैरधोत्पत्तिर्या पृथक् पृथगाम्नाता तत्र यः सर्वं करोति तस्य तेषु निमित्तेषु यदशौचमधिककालञ्चापि स्यात् तदनुरोद्धव्यम् यथा रोदनादेकाहम्। वहनात्त्र्यहम् । दहनाच्च त्र्यहम्। अथ यो रुदित्वा वहित्वा च दाहयति तस्यापि त्र्यहमेव स्यात्। न तु प्रत्येकाशौचसङ्कलनया सप्ताहम् । समानोपक्रमेण सहैव प्रवृत्तानां तेषां स्वस्वकाले निवृत्तौ सर्वशेषे शुद्धिसिद्धेः । अयमेव न्यायः सर्वत्रानुक्ते द्रष्टव्यः ।

२२३ यद्येकस्मिन्नेव दिने समं न्यूनमधिकं वा युगपदशौचद्वयं प्रवर्तते, यदि वा प्रथमाशौचे प्रवृत्ते तस्मिन्नेव दिने पुनरपराशौचं प्रवर्तते तदा तन्त्रेणान्यसिद्धिः, द्वयोरेककालत्वात् । अतएव यत्रापि स्त्रियाभर्त्रानुगमनं तत्रापि दशाहमेवाशौचं न त्वधिकवृद्धिः । तन्त्रेणोभयसिद्धेः । इति प्रथमदिनाशौचव्यवस्था ॥

अथ द्वितीयभागे—

२२४ द्वितीयादिनवमान्तेऽष्टाहात्मके मध्यमे भागे सूतकसजातीयविजातीयसमन्यूनपाताः सूतकसजातीयसमन्यूनपाताश्च यद्यापतन्ति तदैतेषु षट्स्वपि पक्षेष्वन्तराशौचं नास्ति । पूर्वाशौचकालेनैवोभयोः शुद्धेः ।

यत्तु त्र्यहादिखण्डाशौचे संपाते उत्तरेणैव शुद्धिरिति गौडा आहुः । तत्र । पूर्णाशौचे खण्डाशौचे चोभयत्रापि पूर्वशेषेणैव शुद्धेर्युक्तत्वात् ।

२२५ अथैतस्मिन्नष्टदिनात्मके मध्यमे भागे यदि मृतके सजातीयविजातीयाधिकपाताः स्युः । सूतके वा सजातीयाधिकपातः स्यात् , यदि वा सूतके विजातीयसमन्यूनाधिकपाताः स्युः । तदैतेषु षट्स्वपि पक्षेषूत्तराशौचं समाप्य शुद्धिर्नेया । न तु पूर्वाशौचशेषसान्निध्येण तत्र शुद्धिः । यत्तु मरणोत्पत्तियोगे मरणस्य बलवत्त्वात् "शावेन शुद्ध्यते सूतिः" इति सिद्धान्ताच्च त्र्यहादिशावमध्ये यत्र दशाहादिपूर्णसूतकपातस्तत्राप्युत्तराशौचं नास्ति, किन्तु पूर्वशेषेणैव शुद्धिरिति गौडा आहुः । तत्र । उत्तरस्य कालाधिक्येन बलवत्त्वात् । "अपशुद्धिमदाशौचं पश्चिमेन समापयेत्" इति सिद्धान्ताच्च । तेन त्र्यहादिपूर्णसूतकपाते पूर्वशेषेण शुद्धिर्नास्ति किन्तूत्तरं समाप्यैव शुद्धिर्नेया ॥ उत्तरेण सूतकेन शावाशौचापवादेऽपि शावनिमित्तकमस्पृश्यत्वं नापोद्यते । एतावदेवात्र मरणाशौचस्य बलवत्त्वम् एवमेव दशाहसूतकमध्ये तदन्ते वा यत्र त्र्यहादिशावप्राप्तिस्तत्राप्यधिककालत्र्यांपिना पूर्वेणसूतकेन शावाशौचापवादेऽपि शावनिमित्तकमस्पृश्यत्वं भवत्येव ।

२२६ पूर्वानुवृत्ते सूतकाशौचे यदि मूल्यं गृहीत्वा, कश्चिच्छवदाहंपरतः कुर्यात् तदा शवदाहनिमित्तकाशौचस्य न पूर्वेण शुद्धिः । किन्तु शवदाहस्यात्यधिकाशौचप्रकर्तृकत्वात्तन्निमित्तकाशौचं समाप्यैव शुद्धिः । मातुलादिसम्बन्धेन दाहमात्रकरणे तु त्रिरात्रमेवेत्युक्तम् ।

२२७ सूतिकायास्तु प्रसवनिमित्तं स्वाशौचं प्रातिस्विकम् । अतस्तदपरेण नापोद्यते । तेन दशाहे त्र्यहे वा मरणाशौचे पश्चात प्राप्तेऽपि तस्याः प्रसवनिमित्ताशौचोत्तरमेवकर्माधिकारः ।

२२८ स्वपुत्रजननाशौचस्य पूर्वार्द्धे परार्द्धे वा भ्रातृजनने तु पूर्वाशौचकालेनैव शुद्धिः ।

२२९ भ्रातृजननाशौचस्य पूर्वार्द्धे स्वपुत्रजनने भ्रातृजननाशौचकालेन शुद्धिः । परार्द्धे चेत् स्वपुत्रजननाशौचकालेन शुद्धिः ॥

२३० पुत्रभार्यौरसपितृव्याद्यशौचेन मातापित्रोर्भर्तुराशौचापगमं मा-

ह्नन्ति । सपिण्डाशौचापेक्षया तेषामशौचस्य बलवत्त्वात् । तेन सन्नेयं वक्ष्यमाणरीत्या व्यवस्था द्रष्टव्या ।

२३१ ज्ञातिमरणाशौचस्य पूर्वार्द्धे पितृमातृभर्तृमरणे पूर्वाशौचकालेन शुद्धिः । परार्द्धे तु पराशौचकालेन ।

२३२ एवं पितृमातृभर्तृमरणाशौचस्य पूर्वार्द्धे परार्द्धे वा ज्ञातिमरणे पूर्वाशौचकालेनैव शुद्धिः ।

२३३ मातरि मृतायां तदशौचे यदि पश्चात् पिता म्रियते तदा पितुः शेषेण शुद्धिः । पितरि मृते तदशौचे यदि पश्चान्माता म्रियते तदा पित्राशौचान्ते मातुः पत्निणीमधिक्तां कुर्य्यात् । यदि त्वात्मघातादिना पितृमरणं स्यात् तदा पितुरशौचाभावात् पितृमरणोत्तरं मातृमरणेऽपि न पत्निणी-वृद्धिः । किन्तु मातुः पूर्णमाशौचम् । केचित्तु पित्राशौचीयदशमदिनात् प्रागेव मातृमरणे पत्निणीवृद्धिः । दशम्यां रात्रौ प्रभाते वा मातृमरणे तु द्व्यहत्र्यहवृद्धिसमुच्चिता पत्निणी कार्येत्याहुः । तदपरे नानुमोदन्ते मातुरन्वारोहणे तु न पत्निणीवृद्धिः । किन्तु पैतृकाशौचसमाप्त्यैव शुद्धिः सहगमने द्वयोरपि सम्पूर्णाशौचयोस्तन्त्रेण सहैव शुद्धेः । अथ यत्र पूर्वेद्युः पतिमृत्युः, परदिने तु पत्न्याः पतिशवेन सह चितारोहणं तत्रापि तन्त्रेण दशाहमेवाशौचं न तु वृद्धिः । पतिदाहानन्तरन्तु दिनान्तरे मृतायां पत्न्यां भिन्नचितादग्धायां सत्यां पित्राशौचानन्तरं पत्निणीद्वयघा युग्मस्याशौचनिवृत्तिः । न तु पूर्वाशौचनिवृत्तिमात्रेण शुद्धिः । मातृमरणस्य सहागुरुनिपातत्वात् ॥

२३४ भर्तुरशौचोत्तरं पत्न्या अन्वारोहणे तु कथं मात्राशौचमिति पृथ्वीचन्द्रः ॥ गौडाश्च ॥

२३५ भर्तुर्ब्राह्मणत्वे क्षत्रियादिभार्यायामन्वारोहणे तु पित्राशौचान्ते मातुरुग्यहमित्यपरार्कः ।

२३६ युद्धहतस्य सद्यः शौचे प्राप्ते सदन्वारोहणे पुत्रस्त्रिरात्रं मात्राशौचमनुरुन्ध्यात् । पितुरपि सत्र त्र्यहेणैव पिण्डदानं कुर्यात् । एकचितौ दाहे उभयोः सद्यःशौचमेवेति रघुनन्दनादयो गौडाः ।

२३७ गृहीताशौचानां पुत्राणां पितुः संस्कारे प्रक्रान्ते यदि माता सपिण्डो वा कश्चित् म्रियते तदा तु न पैतृकाशौचानुरोधःकार्यः । किन्तु मातृमृत्युनिमित्तं सपिण्डमृत्युनिमित्तं च पूर्णमेवाशौचं कार्यम् । अतिक्रान्तकालात् विद्यमाननिमित्तस्य बलवत्त्वात् ।

२३८ प्रोषितस्य पितुर्द्वादशवर्षोत्तरं पर्णशरदाहादिसंस्काराशौचे प्रक्रान्ते तन्मध्ये सपिण्डमरणेऽप्येवम् । सपिण्डमृत्युनिमित्तं पूर्णाशौचमे वानुरोध्यम् । न तु पित्राशौचेन तत्र सपिण्डाशौचबाधः । इत्यन्तर्दशाहे व्यवस्था । (२)

अथ तृतीयविभागे ।

२३९ भ्रातुश्च सूतकस्य वा पूर्णाशौचस्यान्त्यरात्रौ भ्रातरि सूतके वा द्वितीये पूर्णाशौचे प्राप्ते तदन्त्यरात्रेः पश्चाद्दिनद्वयेनाधिकेन शुद्धिः । यत्तु गौडाः—दशमे दिनेऽप्यशौचान्तरप्राप्तौ दिनद्वयवृद्धिमिच्छन्ति तन्नादर्तव्यम् । मनुवचनेऽन्तर्दशाहे भिन्नव्यवस्थाकरणात्, गौतमशातातपादिवचने रात्रिशेषपदोपादानाच्च दशम्या रात्रेरेव वृद्धिनिमित्तत्वात् ।

अथ तृतीय चतुर्थ विभागयोः

२४० अन्त्यान्त्यरात्रेरन्तिमे यामे द्वितीयाशौचप्राप्तौ तु तदन्त्यरात्रेः पश्चाद्दिनत्रयेणाधिकेन शुद्धिः । यत्तु गौडाः—गौतमवचने प्रभातपदं दृष्ट्वा प्राचीप्रकाशात्मकस्यारुणोदयकालस्यैव निमित्तत्वमिच्छन्ति । तन्न । शातातपवचने यामशेषपदसत्त्वात् प्रभातपदस्यापि यामशेषोपलक्षकत्वात् ॥

२४१ यदि तु रात्रिशेषे यामशेषे वा ज्ञातिजननाशौचे स्वपुत्रजननं स्यात्, यदि वा ज्ञातिमरणाशौचे पितृमातृभर्तृमरणं स्यात्, तदा तादृशजननमरणकालादारभ्य पूर्णमेव दशाहादिरूपमुत्तराशौचं प्रवर्त्तते न तु दिनद्वयमात्रं दिनत्रयमात्रं वाऽशौचवृद्धिः ।

२४२ यदि वा स्वपुत्रजननाशौचान्त्यरात्रौ यामशेषे वा ज्ञातिजननं स्यात्, अथवा पितृमातृभर्तृमरणाशौचान्त्यरात्रौ यामशेषे वा ज्ञातिमरणं स्यात्, तदापि पूर्वाशौचकालेनैव शुद्धिः । न तु दिनद्वयं दिनत्रयं वाशौचवृद्धिः ॥

२४३ अथ यदि स्वपुत्रजननाशौचान्त्यरात्रौ यामशेषे वा स्वपुत्रान्तर जननं स्यात् तदा तु द्व्यहं त्र्यहं वा वृद्धिर्भवत्येव ।

२४४ एवं मातृमरणाशौचान्त्यरात्रौ यामशेषे वा पितृमरणं स्यात्, अथवा पितृमरणाशौचान्त्यरात्रौ यामशेषे वा मातृमरणं स्यात्, उभयत्रापि द्व्यहं त्र्यहं वा वृद्धिरेव भवति न तु पूर्णाशौचम् ॥

२४५ संपूर्णाशौचान्त्यरात्रौ रात्रिशेषयामे वा त्रिरात्रादिखण्डाशौचपाते तु पूर्वशेषेणैव शुद्धिः । न तु द्विरात्रं त्रिरात्रं वा वृद्धिः । दशाहीत्यादिमते तु तत्रापीष्यते द्वित्रिदिनवृद्धिस्तदपरे नानुमोदन्ते ।

२४६ त्र्यहाद्यल्पाशौचान्त्यरात्रौ रात्रिशेषयामे वा त्र्यहादिखण्डाशौचपातेऽपि पूर्वशेषेणैव शुद्धिर्नतु द्विरात्रं त्रिरात्रं वा वृद्धिः ।

२४७ पूर्वाशौचान्त्यवर्धितद्वित्रिदिनमध्येऽधिकाशौचान्तरपाते तु वर्धितस्याल्पत्वात् तेनोत्तरस्याधिकस्य बाधानौचित्यादुत्तराशौचसमाप्त्यैव शुद्धिः । इति रात्रिशेषयामशेषयोर्व्यवस्था ॥ (३ । ४) ॥

इति द्राविडसंप्रदायाधिकारः ॥

अथ फाक्किकाधिकारः—

२४८ जननाशौचद्वयसन्निपाते पूर्वजातको यद्याशौचकालाभ्यन्तरे मृतस्तर्हि सपिण्डानां सद्यः शौचेन पूर्वाशौचनाशः । पूर्वाशौचनाशादेव तु परार्द्धजातबालकसम्बन्धिभ्यां मातापितृभ्यां भिन्नानां सपिण्डानां पूर्वार्द्धजातबालकसम्बन्धिमातापित्रादिसकलसपिण्डानां च परजननाशौचस्यापि निवृत्तिः सिद्धा भवति । जनननिमित्तकं स्पर्शाशौचं तु पूर्वजातबालकसम्बन्धिनोर्मातापित्रोः स्वस्वजात्युक्तं लिष्ठत्येव ।

२४९ जननाशौचद्वयसन्निपाते प्रथमजननाशौचपूर्वार्द्धजातबालकमरणे तन्मातापित्रोः पूर्वाशौचकालपर्यन्तं स्पर्शाशौचम् । प्रथमजननाशौचपरार्द्धजातबालकमरणे तु तज्जननकालमारभ्य तन्मातापित्रोः स्वजात्युक्तं स्पर्शाशौचम् ।

२५० वर्धिते द्वित्रिदिनमध्ये पुनरशौचान्तरपाते सति समन्यूनयोः पूर्वशेषेण शुद्धिः । अधिकस्य तु परशेषेण शुद्धिर्न तु पूर्वेण ।

२५१ तुल्यदिनप्रमाणयोर्जननमरणाशौचयोः सन्निपाते मरणाशौचका-

लेन शुद्धिः न्यूनाधिकदिनप्रमाणयोर्जननमरणाशौचयोः सन्निपाते तु दीर्घाशौचकालेन शुद्धिः ।

२५२ पूर्वोक्तसपिण्डद्वयजननवर्धिताशौचमध्ये पितृमातृभर्तृमरणे वर्धितसपिण्डद्वयजननाशौचकालेन शुद्धिः ॥

२५३ शूद्रेतरायां भार्यायाः पुत्रजननप्रयुक्तविंशतिरात्राशौचाभ्यन्तरे पत्युर्मरणेऽपि पुत्रजननाशौचकालेन शुद्धिः ।

२५४ एकस्मिन् दिने पूर्णाशौचिसपिण्डद्वयमरणे यावदनुवर्त्तते कर्माशौचं, तावदेव च सर्वसपिण्डानां स्पर्शाशौचमनुवर्त्तते ।

२५५ समानोदकमरणे कर्माशौचं त्रिरात्रं, स्पर्शाशौचं चैकरात्रम् । विद्युदादिना मरणेऽप्येवम् । अशौचमध्ये विदेशस्थासपिण्डमरणे तु कर्माशौचं त्रिरात्रम्, स्पर्शाशौचं तु स्नानात् प्रागेव । तस्मात्पूर्वोक्तत्रिरात्राशौचद्वयापेक्षयैतत् त्रिरात्रं लघुभूतं प्रतिपद्यते । तेनैषां सन्निपाते गुरुणैव शुद्धिः ।

२५६ विदेशप्रमीतसज्ञातित्रिरात्राशौचस्य लघुभूतस्य गुरुणा विदेशप्रमीतपितृमातृभर्तृत्रिरात्राशौचेन शुद्धिः ।

२५७ कन्यापुत्रयमलोत्पत्तौ सर्ववर्णाया मातुर्मासेन शुद्धिः । पित्रादिसपिण्डानां तु स्वजात्युक्ताशौचं निरूपितम् । तत्राशौचमध्ये तयारेकतरमरणे सत्याशौचे कश्चिद्विशेषो विधीयते । तथाहि—शूद्रभिन्नमातुः कन्यामरणात् सद्यः शुद्धिः, न तु पुत्रमरणात् । पित्रादिसपिण्डानां तु प्रथमजातमरणाच्छुद्धिः न तु परजातमरणात् । शूद्रायास्तु मातुर्यमलोत्पत्तौ प्रथमजातमरणाशौचेन शुद्धिः, न तु परजातमरणात् । पित्रादिसपिण्डानां तु प्रथमजातमरणाच्छुद्धिः न तु परजातमरणात् । एवमन्यदप्यूह्यम् ।

२५८ पूर्वाशौचमध्ये समुद्भूतमपि पूर्वाशौचोत्तरं यदि ज्ञातं स्यात्, तदोत्तरमप्यशौचमनुवर्त्तत एव, न तु पूर्वशेषेण शुद्धिस्तत्र भवति । पूर्वाशौचनिवृत्तेः पश्चाच्छ्रवणेनोत्तराशौचस्य प्रवर्त्तमानतया पूर्वेण तदनिवृत्तेः ।

इति पञ्जिकाधिकारः ॥

२५९ लब्ध्वा रामभजात् पुरा जयपुरे सारस्वसाद् व्याकृतिं,

यश्चाच्छैवकुमारमङ्घ्रिकमलं काश्यां समासाद्य यः ।
षट्शास्त्राणि च धर्मशास्त्रसहितान्यङ्गानि चाधीतवान्,
सोऽयं श्रीमधुसूदनो व्यतुनताशौचे समीक्षामिमाम् ॥ १ ॥

इति पाताध्यायः सप्तमः ॥ ७ ॥

—:०:—

अथ अतिक्रान्ताध्यायः ॥ ८ ॥

२६० अत्राध्याये अन्तर्दशाहाधिकारः, सूतकनिर्दशाहाधिकारः, शावापूर्णनिर्दशाहाधिकारः, स्वदेशस्थपूर्णशावातिक्रमः विदेशस्थपूर्णशावातिक्रमः देशान्तरसचयं चेति षडधिकाराः प्रदर्श्यन्ते ॥

२६१ अतिक्रान्ताशौचम्, व्यतीताशौचम्, अतिकालाशौचम्, आतिकालिकाशौचम्, प्रोषिताशौचम्, देशान्तराशौचम्, विदेशस्थाशौचम्, इत्येकार्थाः ।

२६२ पूर्णाशौचखण्डाशौचयोर्वोस्तस्मिके प्रवृत्तिकालेऽतिक्रान्ते सत्यनन्तरं जन्ममृत्युश्रवणे यदाशौचं प्रवर्तते तदतिक्रान्ताशौचं नाम । तच्च तावद्द्विधा—अन्तर्दशाहं निर्दशं चेति । आद्यमाशौचप्रवृत्तिकालातिक्रमणात् । द्वितीयं तु आशौचनिवृत्तिकालातिक्रमणात् । तत्र दशशब्दो यावदाशौचकालोपलक्षकः । तेन पूर्णाशौचे खण्डाशौचे चेदं भागद्वयमाभ्यां शब्दाभ्यां व्यवस्थियते । दशाहो, द्वादशाहः, षडधदशाहो, मास इति चत्वारि पूर्णाशौचानि । तद्वितरावयेकाहपक्षित्रीण्यहादीनि खण्डाशौचानि ।

अथ अन्तर्दशाहाधिकारः ।

२६३ सपिण्डजननस्य सपिण्डमरणस्य वा पूर्णाशौचप्रयोजकस्य खण्डाशौच प्रयोजकस्य वा पूर्वोक्ताशौचकालाभ्यन्तरं श्रवणे शेषाहाशौचम् । तेन यावदवशिष्टमाशौचकालस्य, तावदाशौचमनुरोध्यम्। एतच्च मातापित्रादीनां पुत्रादीनां त्रिपुरुषसपिण्डानां सप्तपुरुषसपिण्डानां सकुल्यानां सोदकानां सगोत्राणां विगोत्राणां च सर्वेषां समानम् ।

२६४ मातापित्रोर्मरणश्रवणे पुत्रजननश्रवणे वा श्रवणदिनादारभ्य

दशाहं कार्यमिति केचिदाहुः। तन्नादृियते शिष्टैः। अनिर्दशाहे शेषाहाशौचस्यैव सिद्धान्तात्।

२६५ पारिभाषिकदेशान्तरे मृतस्य दशाहाभ्यन्तरमपि मरणश्रवणे मातापित्रोः पुत्रस्य सपिण्डादीनां च सर्वेषां सद्यः शौचमिति केचिदाहुः। तदेतत् प्रमाणवचनानुपलम्भादुपपत्तिविरोधाच्चाश्रानोपकल्पितत्वाच्चानुपादेयम्। सद्यः शौचविधायकवचनानां निर्दशाशौचविषयत्वात्। यत्रोत्सर्गतो दशरात्रपर्यन्तं यत्रत्या वार्ता न श्रूयते तत्र तद्देशान्तरमिति परिभाषणाद्देशान्तरव्यवस्थायाश्चान्तर्दशाहनप्रसक्तेः।

२६६ मातापित्रोर्मरणे दशाहमध्ये मरणश्रवणे सत्यूढायाः कन्यायास्त्रिरात्रमाशौचं वाच्यमिति दाक्षिणात्याः। इत्यन्तर्दशाहाधिकारः॥

अथ निर्दश-सूतकाधिकारः।

२६७ दशाहादिपूर्णाशौचकाले एकाहादिखण्डाशौचकाले वा यथायथं व्यतीते यदि पश्चाद्विदेशस्थजननं श्रूयते तदा जननाशौचं नास्ति। प्रसवे अतिक्रान्ताशौचप्रत्याख्यानात्॥

२६८ पुत्रजननश्रवणे तु पित्रा सचैलस्नानं कार्य्यम्। यत्तु दशाहाशौचमनुरोध्यमिति केचिदाहुः। तन्नादृियते शिष्टैः। इति निर्दशजातकाधिकारः॥

अथ निर्दशापूर्णशावाधिकारः।

२६९ त्रिरात्रादिखण्डाशौचप्रयोजकस्य सपिण्डमरणस्य त्रिरात्राद्याशौचकालादूर्ध्वं दशाहमध्ये स्नानेऽप्याशौचं नास्ति। आचारात्तु स्नानोदकमात्रं कार्यम्।

२७० अनुपनीतमरणादिनिमित्तकत्रिरात्रादिषु भगिनीमातुलादिमरणनिमित्तकत्रिरात्रादिषु चातिक्रान्तेषु अतिक्रान्ताशौचं नास्ति। दशाहादि पूर्णाशौचातिक्रम एव विदेशस्थमरणश्रवणे त्र्यहादिरूपातिक्रान्ताशौचाभ्युपपत्तेः। महागुरुनिपाते तु खण्डाशौचेऽप्येकरात्रमशौचमनुरोध्यमिति दाक्षिणात्याः।

२७१ मातापित्रोर्मरणे दशाहोर्ध्वं वर्षान्ते कालान्तरे वा मरणश्रवणे सत्यूढायाः कान्याया पत्नियीति दाक्षिणात्याः। इति अपूर्णाशौचातिक्रमाधिकारः।

अथ विदेशस्थशावाधिकारः ।

२८२ देशान्तरस्थे प्रेते दशरात्रोत्तरं वर्षाभ्यन्तरं श्रवणे सत्येकरात्रम् । वर्षादूर्ध्वन्तु स्नानमात्रमिति वशिष्ठविष्णू प्राहतुः । (एतच्च मातापित्रोः पतिपत्न्योश्चातिक्रान्ताशौचे नेयम् । सम्बन्धाधिक्येन तत्रैव तथौचित्यात्)(२)

२८३ देशान्तरस्थे ज्ञातिमरणे दशाहोत्तरं वर्षाभ्यन्तरं श्रवणे वर्षादूर्ध्वं वा श्रवणे सद्यः शौचमिति मनुयाज्ञवल्क्यगौतमपैठीनसिपराशरा बृहत्पाराशरश्च प्राहुः (१) सपिण्डाः सोदकाः सगोत्राश्च ज्ञातयउच्यन्ते (२) ॥

२८४ मैथिलास्तु देशान्तरे मातापित्रोः पतिपत्न्योर्ज्ञातीनां च मरणे वर्षादूर्ध्वं वा वर्षाभ्यन्तरं दशाहाभ्यन्तरमपि वा श्रवणे सर्वत्र निर्विशेषं सद्यःशौचमेवोचितं पैठीनसिगौतमपराशरैस्तथोक्तत्वादित्याहुः (१) । वस्तुतस्तु--अन्तर्दशाहं मरणश्रवणे सर्वत्र शेषाहाशौचमेव सिद्धान्तः । मनुयाज्ञवल्क्याभ्यां निर्देशे ज्ञातिमरणे सद्यः शौचविधानात्तदेकवाक्यतया पैठीनसिगौतमपराशरवचनानामपि निर्दृशज्ञातिमरणविषयतयैवोपनेयत्वात् । अनिर्गते दशाहे त्वशौचशेषेण शुद्धेः स्पष्टं विष्णुबृहस्पतिभ्यामुक्तत्वात् (२) निर्दृशे सद्यः शौचविधानमपि मातापितृभिन्नविषयतयैव नेयम्,वचनान्तरसंवादादिति पश्यामः (३) ॥

२८५ दाक्षिणात्यसम्प्रदाये त्वयं विशेषः । मातापित्रोः पतिपत्न्योः सपत्न्याश्च समानदेशे देशान्तरे वा मरणे निर्विशेषं दशाहोत्तरं वर्षोत्तरं वा श्रवणे पुत्रस्य पत्न्याः पत्युः सपत्न्या वा यथायथं दशाहादिपूर्णाशौचमेवानुवर्त्तते न तु तत्राघसङ्कोचः ।

२८६ सापत्न्यसातुरौरसपुत्रस्य च समानदेशे देशान्तरे वा मरणे दशाहोत्तरं वर्षोत्तरं वा श्रवणे निर्विशेषं पुत्रस्य मातापित्रोश्च त्रिरात्रम् । न तु ततो न्यूनमित्याहुः । तत्र देशाचारद्व्यवस्था ।

अथ देशान्तरलक्षणम् ।

२८७ देशान्तरलक्षणं चतुर्धा निरूप्यते--योजनतः, गमनीयकालतः, व्यवधानतः, भाषाभेदतश्चेति । विप्रस्य विंशतियोजनान्तरं, क्षत्रियस्य चतुर्विंशतियोजनान्तरं, वैश्यसच्छूद्रयोस्त्रिंशद्योजनान्तरं, निकृष्टशूद्रस्य तु षष्टियोजनान्तरमित्येवं योजनान्तरितो देशो देशान्तरमिति दाक्षिणा-

त्याः (१)। विप्रस्य चतुर्विंशतियोजनान्तरं, क्षत्रियस्य त्रिंशत्, वैश्यस्य च्छूद्रयोश्चत्वारिंत्, निकृष्टशूद्रस्य तु षष्टिरिति परे केचित् (२) । षष्टियोजनान्तरिसमेवोत्सर्गतः सर्वेषां देशान्तरम् । गिरिनदी व्यवहिते भिन्नभाषे वा प्रदेशे तु योजनानपेक्षणाच्चत्वारिंशद्धा त्रिंशद्धा चतुर्विंशतिर्वेति , योजन संख्याविशेषानादरे सङ्ख्यवचनार्था तात्पर्यं नेयमिति, मैथिलाः । तदेतदेकं योजनकृतं देशान्तरलक्षणमुक्तम् (३)

२८८ मैथिलानां केचिदित्थमाहुः । न भाषाभेदमात्रेण न वा गिरिव्यवधानमात्रेण नापि वा नदीव्यवधानमात्रेण देशान्तरत्वं कल्प्यते । किन्तु यत्रैतत्त्रितयं समुच्चितं भवति तत्र षष्टियोजनाभ्यन्तरेऽपि देशान्तरत्वव्यवहारः कार्यः । भाषाभेद गिरिनदी व्यवधानाभावे तु षष्टियोजनान्तरदेशे देशान्तरत्वव्यवहारः कार्यः । इति । अतएव काश्यां मृतस्य तीरभुक्तिदेशस्थितं प्रति, देशान्तरत्वव्यवहारो नास्ति मिथिलातः काश्यास्त्रिंशद्योजनमात्रान्तरितत्वात् । भाषाभेदसत्वेऽपि महानदीगिरिव्यवधानाभावाच्च । सरयूगण्डक्यादीनामन्तरालस्थत्वेऽपि तासां महानदीत्वाभावात् । गङ्गायमुनाशतद्रु सविधानामेव महानदीत्वेन व्यवहारात् ।

अथ प्रयागमरणे तु तीरभुक्तौ भवत्येव देशान्तरमृतत्वव्यवहारः । षष्टियोजनाभ्यन्तरत्वेऽपि भाषाभेदसत्वाद्गिरिव्यवधानाद्गङ्गाव्यवधानाच्च । तेन प्रयागमरणे मिथिलास्थानां ज्ञातीनामन्तर्दशाहेऽपि श्रवणे सद्यःशौचमित्याहुः ॥

२८९ वयन्तु ब्रूमः । इयं हि देशान्तरपरिभाषा लोकसिद्धा न त्वत्र शास्त्रेण कश्चिदर्थः साध्यः । लोके यत्र यत्र येन येन निमित्तेन देशान्तरत्वं लौकिकाः प्रतिपद्यन्ते तत्तदनुवादेन तत्र शास्त्राभ्यनुज्ञामात्रमेतत् क्रियते । अस्ति च लोके गिरिसम्बन्धान्नदीसम्बन्धाद्भाषाभेदाद्विदूरत्वाच्च देशान्तरत्वप्रतिपत्तिः। अतो यावता लौकिकानामाचारव्यवहाराद्याम्नायभेदसाधनः प्रतिपत्तिभेदो देशान्तरत्वेनुभूतस्तावतैवाशौचसंकोचोऽप्यर्थसिद्धो भवति । दशरात्रादिपूर्णाशौचकालात्ययकालश्चाशौचसंकोचे मुख्यो हेतुः। सोऽयमशौचकालात्ययश्चतुर्वि शतियोजनैस्त्रिंशद्योजनैश्चत्वारिंशद्योजनैः, षष्टियोजनैर्वा, अन्तरितत्वेन सम्भाव्यते इति सम्भवाभि-

प्रायेण तथा प्रतिनिर्दिश्यत इत्यूह्यम् । किञ्च समानदेशे देशान्तरे च भेदेनेयमाशौचव्यवस्था मैथिलग्रन्थानुरोधेनोक्ता । आर्षवचनानि तु सदेश-विदेशाभ्यां पृथक् विभज्य नोपलभ्यन्ते । तस्मात् स विभागश्चिन्त्यः । वस्तुतस्तु दशरात्रमध्ये यत्र वार्त्तालभ्यते तत्र शेषाहाशौचमेव । दशरात्रो-त्तरं तु वार्त्तालाभे संबन्धतारतम्यादशौचतारतम्यं भवतीत्येव व्यवस्था इति देशान्तरलक्षणाधिकारः ॥

२९७ अष्टौ यस्य समाः पितुः स्वविषयेऽतीताः पुरः शिक्षया,
वेदाङ्गस्य च शिक्षया जयपुरेऽतीतास्ततोऽष्टौ समाः ।
यस्याष्टौ पुनरत्यगुः शिवचदे षट्शास्त्रशिक्षादिना,
सोऽयं श्रीमधुसूदनो व्यतनुताशौचे समीक्षामिमाम् ॥१॥

इति अतिक्रान्ताध्यायोऽष्टमः ॥८॥

अथ सदेशस्थपूर्णाशाचाधिकारः ।

२७२ अतिक्रान्ताशौचं द्वेधा प्रवर्त्तते—समानदेशेऽप्यश्रवणाद्देशान्तरस्य-त्वाच्च । पारिभाषिकदेशान्तरलक्षणाक्रान्तः प्रदेशः समानदेशः । स एव सदेशः ।

२७३ सदेशे मृतस्य तदुचिताशौचकालोत्तरं श्रवणदिनादारभ्या-शौचं वक्ष्यमाणनियमानुसारेण कार्यम् । तथा हि—

२७४ मातापित्रोर्देशाहोत्तरं वर्षाभ्यन्तरं वर्षाद् द्विवर्षोर्द्ध्वं च मर-णश्रवणे श्रवणदिनादृशाहमाशौचं पुत्रस्येति पैठीनसिऋषिः प्राह (१) एत-च्च श्रेयसि कनीयसि वा आद्धकर्त्तरि पुत्रेऽवकल्पते इतिपश्यामः (२) अहीनवर्णायाः सपत्न्या अप्येवं दशरात्रमिति केचित् (३) ॥

२७५ मातापित्रोः पतिपत्न्योश्च दशाहोत्तरं वर्षाभ्यन्तरं मरणश्रवणे त्रिरात्रम् । पुत्रस्य पत्न्याः पत्युर्वा कर्माशौचम् । स्पर्शाशौचं तु सचैलस्ना-नान्निवर्त्तते (१) अथ वर्षोत्तरं द्विवर्षात् प्राङ्मातापित्रोर्मरणश्रवणे पुत्र-स्यैकाहमाशौचम् (२) पतिमरणश्रवणे पत्न्या अप्येकाहम् (३) । द्विवर्षा-दूर्ध्वं तु सद्यः शौचमिति देवलऋषिः प्राह (४) एतच्चाविभक्ते कनीयसि कर्मकर्तृत्वाभावेऽवकल्पते इति पश्यामः (५) ॥

२७६ स्वप्रसूभिन्नायामहीनवर्णायां पितुः पत्न्यां प्रमीतायां दशाहोत्तरं वर्षाभ्यन्तरं वा वर्षाद्द्विवर्षाद्ध्वं च श्रवणे सापत्न्यपुत्रस्य त्रिरात्रमिति दक्ष ऋषिः प्राह (१) । औरसे पुत्रे प्रमीते पितुरप्येवं त्रिरात्रमिति ब्रह्मपुराणम् (२) हीनवर्णायाः सपत्न्या अप्येवं त्रिरात्रमिति केचित् (३)।

२७७ केचित्पुनरेकदेशिनो मातापित्रोः पत्युश्चाशौचातिरेकमनिच्छन्तो वक्ष्यमाणसपिण्डनियमानुसारेणैव तदशौचमभ्युपगच्छन्ति । तन्नावकल्पते - मातापित्रादीनान्नितरसपिण्डापेक्षया विशिष्ट-सम्बन्धवत्त्वादाशौचाधिक्यौचित्यात् ।

२७८ दशाहाशौचिनः सदेशे मृतस्य दशाहोत्तरं वर्षाभ्यन्तरं श्रवणे सपिण्डादेस्त्रिरात्रम् । वर्षादूर्ध्वं तु सद्यः शौचमिति मनुशङ्खौ महर्षी प्राहतुः (१) एतच्च मातापितृभ्यां पत्युः पुत्रात् सपत्नीमातुश्च भिन्नेषु दशाहाशौचिषु सामान्यतो व्यवतिष्ठते इति पश्यामः (२) । दशाहाशौचिनः पूर्णाशौचिनः, इत्येकार्थम् । तेन क्षत्रियादिष्वपि तत्तदाशौचकालातिक्रमे वर्षमध्ये सपिण्डमरणश्रवणे त्रिरात्रम् । वर्षादूर्ध्वं तु स्नानमात्रम् (३) ॥

२७९ दशाहाशौचिनः सदेशे मृतस्य दशाहोत्तरं षण्मासात् प्राङ्मरणश्रवणे त्रिरात्रम् । ततोवर्षात्प्रागेकरात्रम् । वर्षादूर्ध्वं तु स्नानमात्रमिति मैथिलरुद्रधराभिमतपाठभेदाद्देवलऋषिः प्राह (१) दशाहोत्तरं षण्मासात् प्राक् त्रिरात्रम् । ततो नवमासात् प्राक् पक्षिणी । ततो वर्षात् प्रागेकरात्रम् । तदूर्ध्वं स्नानमात्रमितिमैथिलोरुद्रधरः स्वकल्पनया प्राह । एतदेव युक्तमित्यमृतनाथादयो मैथिला आतिष्ठन्ते (२) । दशाहोत्तरं त्रिमासात् प्राक् त्रिरात्रम् । ततः षण्मासात् प्राक् पक्षिणी । ततो नवमासात् प्रागेकरात्रम् । तदूर्ध्वं स्नानमात्रमिति बृहद्वशिष्ठऋषिः प्राह । एतदेव युक्तमिति कमलाकरादयो दाक्षिणात्या आतिष्ठन्ते (३) दशाहोत्तरं त्रिपक्षात् प्राक्त्रिरात्रम् । षण्मासात् प्राक् पक्षिणी । ततो नवमासात् प्रागेकरात्रम् । तदूर्ध्वं स्नानमात्रमित्यपरो देवल ऋषिः प्राह । एतदेवयुक्तमिति माधवादयो दाक्षिणात्या आतिष्ठन्ते (४) दशाहोत्तरं त्रिपक्षात् प्राक् त्रिरात्रम् । ततो नवमासात् प्राक् दिवारात्रं निशारात्रं

या । तदूर्ध्वं स्नानमात्रमिति विष्णुऋषिः प्राह । एतदप्यन्ये दाक्षिणात्या आतिष्ठन्ते (५) । विकल्पे व्याचारः प्रमाणम् । आपदनापद्विषयत्वेन वा व्यवस्थेयम् । एवं त्वनेकधा अघसङ्कोचविधानं सत्यावश्यकत्वे तदावश्यकतानुसारेण पृथगवतिष्ठते। अथवा सति विकल्पे देशाचारादुपव्यवस्था(६)

२८० दशाहोत्तरं वर्षाभ्यन्तरे वर्षादूर्ध्वं वा मरणश्रवणे पक्षिणीति गौतमो महर्षिः प्राह (१) । एतच्च चतुः पञ्चाहाशौचिनोर्मृतयोरतिक्रान्ताशौचमिति शुद्धिकौमुदीकारो गोविन्दो व्याचष्टे (२) । अथ सद्यः शौचिनामेकाह-द्व्यह-त्र्यह-शौचिनाञ्चातिक्रान्ताशौचं नास्तीत्येके[1] प्राक् [२७७।२७१] । ये तु खण्डाशौचिनां सर्वेषामतिक्रान्ताशौचं नास्तीत्यभ्युपगच्छन्ति तेषां मते चतुः पञ्चाहाशौचिनामप्यतिक्रान्ताशौचं न स्यात् । तथा चेदं गौतमोपदिष्टं पक्षिणीविधानं पूर्वंयदघसङ्कोचपरमेवावश्यकत्वेऽवकल्पते इति पश्यामः (४) ।

२८१ यत्र तु मरणमात्रं श्रुतं, मासादिकं तु विशिष्य न ज्ञातं तत्र श्रवणादिनादारभ्य स्ववर्णोचितं दशाहाद्याशौचं पूर्णमेवानुरोध्यम् इति सदेशस्थपूर्णाशायाधिकारः ।

आशौचापवादाध्यायः ।

२९१ अथ कर्तृभेदात्, कर्मभेदात्, द्रव्यभेदात् मृतदोषात्, वयसाश्चाशौचं क्वचिदपोह्यते । त एते षड्विधिकाराः प्रदर्श्यन्ते ।

अथ कर्तृभेदाधिकारः ।

२९२ कर्तार ब्रह्माशौचग्रहीतृत्वेन विवक्षिताः । तेषां षड्विधाः स्ववैशेष्यादेव निमित्तादाशौचं नार्हन्ति । तथा हि ब्रह्मचारिणो वनस्थाः संन्यासिनश्चेति त्रिविधा भिक्षाश्रमा भिक्षाश्रमत्वादेव निमित्तादस्यामाशौचव्यवस्थायां नाधिक्रियन्ते । आशौचव्यवस्थाया गृहस्थाश्रमधर्माङ्गस्यात् । अथ मृतजीवच्छ्राद्धाः पतिताश्चेति द्विविधा धर्मच्युता गृहस्थस्वेऽपि स्वधर्मच्युतिहेतोरस्यामाशौचव्यवस्थायां नाधिक्रियन्ते । स्वधर्मस्थाधिकारेणाशौचव्यवस्थायाः प्रवृत्तत्वात् । अथान्यः षष्ठ आपन्नः । स च कष्टायामापदि स्वास्थ्यलाभादशक्तत्वादेवास्यामाशौचव्यवस्थायां नाधिक्रियते धर्मादेशस्य तदाचरणासमर्थाधिकारेण प्रवृत्तेः । तदित्थमेते षड्व्यक्तयधिकारिणो नाशौचमर्हन्तीति सिद्धम् । तेषांविभेदेन नियमा वक्ष्यन्ते ।

२९३ नैष्ठिकानामुपकुर्वाणानां च ब्रह्मचारिणामनुपनीतानां च द्विजातिबालकानां स्पर्शाशौचं कर्माशौचं वा द्विविधमपि जन्माशौचं नास्ति ।

२९४ अथ ब्रह्मचारिणामनुपनीतानां च द्विजातिबालकानां सपिण्ड मरणेऽपि नाशौचं नापि तस्मिन्नहादाद्यौर्ध्वदैहिककर्मस्वेषामधिकारः ।

२९५ अथाज्ञानान्निर्हारदाहाद्यौर्ध्वदैहिके कर्मणि कथंचित् कृते सति तु ब्रह्मचारिणःपुनरुपनयनं कृच्छ्रप्रायश्चित्तं चादिश्यते। किन्तु पित्रुमात्राचार्योपाध्यायमातामहानामन्तिमकर्मकरणेऽपि न ब्रह्मचारिणो दोषः । अतएव तत्र कृते सति दशाहं स्पर्शाशमनुवर्तते । कर्माशौचं तु नास्ति ।

२९६ अन्ये त्वाहुः । मातापित्रादीनामन्तिमकर्मकरणेऽपिएकाहमेव स्पर्शाशौचं ब्रह्मचारिणो भवति न त्वधिकम् । किन्तु मद्यमावशौचिनामन्नं भक्षयति तदैव ब्रह्मचारिणो दशाहाशौचप्राप्तिर्न त्वन्यथा । अन्त्यकर्माकरणे तु ब्रह्मचारिणः पित्रादिमरणेऽप्याशौचं नास्त्येवेति ।

२९७ पित्राद्याशौचेऽपि ब्रह्मचारी नाशौचिनामन्नं भक्षयेत् । भक्षणे तु पुनरुपनयनम् ।

२९८ समावर्तनोत्तरं तु पूर्वमृतानां मातापित्रादीनां त्रिदिनमाशौचं ब्रह्मचारिणा कार्यम् । वानप्रस्थानां संन्यासिनां च किमप्याशौचं नास्ति तेषामपि मरणे पूर्वसम्बन्धिनां मातापित्रादीनामाशौचं नास्ति । तत्रेह संन्यासिपदेनैकदण्डिहंसपरमहंसा ग्राह्याः। त्रिदण्डिप्रभृतीनां तु यतीनां पृथङ्नियमा उक्ताः ।

२९९ नैष्ठिकब्रह्मचारिणां चतुर्थाश्रमिणां च वानप्रस्थानां च ग्रामादौ भिक्षाग्रहणाय लब्धाधिकाराणां तथा अन्येषामपि सर्वप्रतिग्रहनिवृत्तानां भिक्षामात्रवृत्तीनां यतीनामाशौचिभिक्षाग्रहणे दोषो नास्ति । उपकुर्वाणब्रह्मचारिणां तु गृहस्थानामिवाशौचिगृहाद्भिक्षाग्रहणे दोषः स्यादेव । एवमन्येषामपि केषांचिद् आगृहीतनियमानां तत्तन्नियमानुरोधेनाशौचमवरुध्यते ।

३०० कृतजीवच्छ्राद्धेन किमप्याशौचं नानुरोध्यमिति हेमाद्रिः । कृतजीवच्छ्राद्धस्यापि योगाभ्यासमकुर्वतो गृहस्थवृत्तेरशौचमनुवर्तत एवेत्यन्ये। योगिनामेव तेषामशौचनिवृत्तेरौचित्यात् ।

३०१ यस्य तु घटस्फोटः कृतस्तस्यान्यस्य च तथाविधस्य जातिसंबन्धिक्रतस्य पतितस्याशौचं नास्ति ।

३०२ आतुरागां स्वदेशभ्रष्टानां क्षुत्पिपासाग्रस्तानामुपसर्गोपद्रवाद्यभिभूतानां च सद्यः शौचमाहुः । तत्रोपसर्गोऽत्यन्तमरकादिदैवभयम् । उपद्रवस्तु स्वचक्रपरचक्राट्टभङ्गादिलोकभयम् । तत्र विशेषविप्लवदशायामस्वस्थतायामशौचं नोपसर्पतीतिदिक् । इतिकर्तृभेदाधिकारः ।

अथ कर्मभेदाधिकारः ।

३०३ अथाशौचसम्बन्धप्रतिबन्धिविशेषवतामनन्यगतिकानामार्तिगृहीतानां च कर्मणां प्रारम्भे आते तत्कर्मदीक्षान्वितानां गृहीतनियमानां नाशौचमुपसर्पतीति द्वितीयाधिकारः प्रवर्त्तते ।

३०४ तीर्थे, यात्रायाम्, उत्सवे, युद्धे, व्रते, सत्रे, यज्ञे, विवाहे, श्राद्धे, प्रतिष्ठायाम्, यजने, होमे, अर्चने, जपे, दाने, संस्कारे, तत्साधर्म्ययति चान्यत्रापि नियतकालकर्त्तव्ये कर्मविशेषे समारब्धासमाप्ते सति तत्राधिकृतानां दीक्षितानाम् ऋत्विजां, सत्रिणां, व्रतिनां-तथा राज्ञां, राजवत् संभ्राम्तानां राजभृत्यानां तथैव भिषजां, कारूणां, शिल्पिनां, ग्रामसाधारणकर्मकरभृत्यानां, चाशौचसङ्कोचो भवति । विशेषकर्मानुरोधात् । तत्रैते विशिष्य नियमा द्रष्टव्याः ।

३०५ अपूर्वतीर्थविशेषे प्राप्ते सत्यां तन्निमित्तकावश्यकस्नानदानादिकर्मणि तीर्थादिविशिष्टयात्रायां पूर्वप्रक्रान्तायां रथयात्राद्युत्सवसमारम्भे युद्धे च प्रवृत्ते नाशौचं सञ्जते ।

३०६ कृच्छ्रचान्द्रायणादिव्रते, अग्नसत्रादिलघुसत्रे, दर्शपौर्णमासादियज्ञे, नगरदेवालयादिप्रतिष्ठाकर्मणि, तडागोत्सर्गकोटिहोमादियजने, होमे, अर्चने,पुरश्चरणास्तोत्रपाठादिजपकर्मणि, अविच्छेदेन संकल्पितहरिवंशपारायणादिश्रवणकर्मणि, व्रतबन्धोपनयनचूडाकर्मादिसंस्कारकर्मणि, विवाहे, श्राद्धकर्मणि, आतुरव्याधिनाशार्थकतुलापुरुषादिदानकर्मणि-चारब्धासमाप्ते यद्यन्तरा सूतकं मृतकं वा श्रूयते तदा तदारब्धकर्मणो निवृत्तिर्नास्ति। न वा तत्कर्मकर्तृभिस्तदाशौचमनुरोध्यम् ।तदितरकर्मसु तु तदाशौचानुरोधः स्यादेव । भगवान् यमस्त्वाह—आशौचवता क्रियमाणे कर्मणि यदि

किञ्चिद्वैवंमयमुत्तिष्ठते, प्रधानाङ्गं वातत्र विनाशमाप्नोति, तदात्वे तदाशौचप्रयुक्तकर्मप्रतिरोध एव कार्य्यः । आशौचनिवृत्तौ पुनः कुर्वीत अथ व्रतारम्भात् प्रागेव तु श्रवणे तदाशौधानुरोधात् करिष्यमाणानामेषां व्रतादीनामपि यावदाशौचं निवृत्तिः स्यात् । व्रताद्यारम्भसमयस्तिवत्थं स्मर्यते ।

प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः । (आपयोः)
नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया ॥
निमन्त्रणं तु वा श्राद्धे प्रारम्भः स्यादिति स्मृतिः]

इह वरणशब्देन प्रार्थनामारभ्य मधुपर्कग्रहणान्तं कर्म ज्ञेयम् । न तु प्रार्थनामात्रम् । मधुपर्कग्रहणोत्तरमेवाशौचाभावस्य सिद्धान्तात् । अत एवाधानेष्टिपशुबन्धादौ यत्र न मधुपर्कविधिस्तत्र सत्यपि प्रार्थनात्मके वरणेऽशौचं प्राप्नोत्येव एवं प्राप्ताशौचा ऋत्विजस्त्यज्यन्ते । अन्ये पुनर्नियन्ते । यत्र वा यज्ञे दीक्षाविधिस्तत्र दीक्षणीयेष्ट्यनन्तरमशौचाभाव इत्यवधेयम् । सत्राम्निस्तु यज्ञेऽवभृथस्नानम् । अन्यत्र विसर्जनादर्वो लोकप्रतिपन्नास्तत्र तत्र ते तेऽर्थाः प्रकरणाद्ग्राह्याः ।

३०७ आगमोक्तकाम्यपूजनादिनियमे तु प्रक्रान्ते यद्याशौची स्यात् तदा मानस्या प्रक्रियया ध्यानयोगात् मन्त्रस्मरणपूर्वकं सर्वमावृत्तं सम्पादयेत्, न मन्त्रमुच्चारयेत् । निष्कामपूजनादिनियमे तु प्रक्रान्ते नाशौचानुरोधं कुर्यात् । सर्वं पूर्ववदाचरेत् ।

३०८ स्मार्तं कर्मद्वेधा-त्याज्यमत्याज्यं च । तत्र यत्त्याज्यं तदाशौचे प्राप्ते सन्त्यजेत् । आशौचनिवृत्तौ पुनः कुर्यात् । अथ यदत्याज्यं तदाशौचे प्राप्ते सत्यसगोत्रेण कारयेत् । यावदाशौचं स्वयं न कुर्यात् । क्वचिद्धोमादौ कर्मविशेषे कर्तव्यतया नियते सत्यकृताकृतान्नेन, व्रीह्यादिना, कृताकृतान्नेन तन्दुलादिना वा, फलेन वा तत्कर्म कुर्यात् कारयेद्वा अनियते तु न कुर्यात् ।

३०९ श्रौतेऽप्येवं नियमानियमतो व्यवस्था । तेन येषां यह्वृचादीनां दशरात्रमहोमेऽपि नाग्निविच्छेदः कल्पेऽभ्युपगम्यते, तैरशौचे प्राप्तेऽग्निहोत्रं न कार्यः । आशौचोत्तरं पुनस्तत्रैवाग्नौ होमसिद्धिर्न तु पुनराधा-

नाद्यावश्यकता । अथ तैत्तिरीयादीनां येषां षडूरात्रमशूद्यमानोऽग्निर्लौकिकः सम्पद्यते तेषां होमनियमाकृष्णाग्नेनपणादिना वा तत् कर्म कुर्यादेवेति सिद्धान्तः । समारूढे स्वग्नौ तैरपि होमो न कार्यः । किन्तु पुनराधानमेव तत्र कृत्वा होमादि कुर्यात् ।

३१० प्रेतश्राद्धप्रतिसांवत्सरिकश्राद्धयोराशौचकालमध्ये प्राप्तौ सत्यां तदाशौचे व्यतीते सत्याशौचान्तद्वितीयेदिने प्रशस्तकालोपलक्षिततिथौ वा कार्यम् । तस्मिन्नपिदिने मलमासादिविघ्ने प्राप्ते मलमासाव्यायायानन्तरकृष्णैकादश्यामेव कार्यम् ॥१॥ समयप्रकाशकारस्तु मलमासेऽप्यशौचकालिकप्रथमतिथावेव कार्यमित्याह । आशौचेन सांवत्सरिकप्रतिरोधेऽशौचान्ते मलमासेऽपिकर्तव्यमिति कृत्यसारसमुच्चयकारोऽमृतनाथो मैथिलोऽप्याह—

प्रतिसंवत्सरं श्राद्धमाशौचोत्पतितं च यत् ।
मलमासेऽपि कर्त्तव्यमिति भागुरिरब्रवीत् ॥

इति वचनं च तन्त्रोपष्टम्भकतया प्रदर्शयति ॥२॥ एतच्चान्ये बह्वृचो गौडाद्रविडा वा नानुमोदन्ते । आशौचेन तुल्यन्यायान्मलमासस्यापि कर्मप्रतिबन्धकत्वौचित्यात् ।

सपिण्डीकरणादूर्ध्वं यत्किञ्चिच्छ्राद्धिकं भवेत् ।
दृष्टं वाप्यथवा पूतं तन्न कुर्यान्मलिम्लुचे ॥

इतिस्मरणाच्च ३ तथा चेदृशविप्रतिपत्तिस्थाने देशाचारात् कुलाचाराद्वा व्यवस्था नेया ॥४॥ अथ पुनरपि यद्याशौचान्तरपातःस्यात् तदा तदशौचेऽपि व्यतीते सति तत्कार्यम् ॥५॥

३१२ शूद्रस्य तु त्रिंशद्दिवसाशौचमध्ये प्रथममासिकप्राप्तौ सच्छ्राद्धमनन्तरकृष्णैकादश्यामेव कार्यम् नत्वशौचान्तदिने । अथ कृष्णैकादश्यामपि करणाशक्तौ द्वितीयमासिकदिने प्रथममासिकविधानाभावात् कृष्णैकादश्यामेव तन्मासिकद्वयमेकत्र कार्यम् ।

३१३ सन्ध्यावन्दनादिनित्यकर्मणस्त्वशौचे प्राप्ते केनचिदंशेन त्यागत्यागश्च विधीयते । तथा हि प्राणायामादिविशिष्टस्य निर्दिष्टरूपस्य तु तस्य परित्याग एव । मानसी तु सन्ध्या कुशवारिविवर्जिता न कदाचित्प-

रित्याज्या। तत्र प्राणायामं स्वमन्त्रकं कुर्याद्वा नकुर्याद्व । मार्जनमन्त्रं मनसोच्चार्य मार्जयेत्, मार्जनं न कुर्याद्वा । अर्घ्यन्तु सूर्याय गायत्रीं सम्यगुच्चार्य निवेदयेत् । प्रदक्षिणं कृत्वा सूर्यं ध्यायन् नमस्कुर्यात् । उपस्थानं तु न कुर्यात् । गायत्रीमन्त्र-जपं मानसंकुर्यात्, न कुर्याद्वेति विकल्पः । सैषा मानसी सन्ध्या भवति । तत्र जलेन सूर्यार्घदानं सावित्र्याः सम्यगुच्चारणं च कल्पसिद्धमपि नाचरन्ति बहवः शिष्टाः ।

३१४ राज्ञां राजकर्मणि, राजभृत्यानां राजाज्ञासंधने, भिषजां भैषज्ये, शिल्पिनां कारूणां दासीदासानां च प्रतिनियतेष्वेव केषुचित् स्वस्वकार्येषु शिल्पादिषु अस्पृश्यत्वादिलक्षणाशौचं नास्ति । तत्राभिषिक्तक्षत्रिया ऐन्द्रस्थानोपसन्ना राजानः । नानाद्रव्यगुणादिविज्ञानिष्णाताश्चिकित्साप्रवणा भिषजः । द्रव्योत्पादकाः सूर्पकारादयः कारवः । द्रव्ये गुणोत्पादकाश्चित्रकाररजकादयः शिल्पिनः । इतरसाधारणा असाधरणा वा नापितादयो दासीदासाः । कर्मविशेषेष्वेवाशौचप्रतिषेधादन्यत्र सन्ध्यावन्दनाद्यदृष्टकर्मसु दानश्राद्धादिधर्मकृत्येषु चैषां स्वस्वजात्युक्तमशौचमवतिष्ठत एव ।

३१५ अशौचिगृहे आशौचोपधायककर्मविशेषे नियुक्ता अप्येते भिषजः शिल्पिनः कारवो दासीदासाश्चान्यत्र पुनरन्येषां देवकार्यादौ तत्तद्भिषगादियोग्यकर्मसु वा यथेच्छं नियोक्तुं शक्यन्ते । संसर्गाशौचस्य एतेष्वनभ्युपगमात् ॥

३१६ भोजनकाले तु भुञ्जानस्याशौचप्राप्तौ तं ग्रासं भूमौ निक्षिप्य स्नात्वा शुध्येत् । तद्ग्रासभक्षणे त्वहोरात्रेण शुद्धिः । अथाशौचं श्रुतमगणयित्वा यदि तत्सर्वमेवान्नमश्नीयात्तदास्य त्रिरात्रेणाशुद्धिः । अत्र कर्मणः प्रारब्धापरिसमाप्तविषारोऽशौचसंकोचको नाभ्युपगम्यते इति दिक् । इति कर्मभेदाधिकारः ।

३ अथ द्रव्यभेदा-धिकारः ।

३१७ पण्याधिष्ठातुरशौचित्वे पण्ये प्रसारितानां सर्वेषामेव द्रव्याणां पण्याधिष्ठात्रनुज्ञया स्वहस्तेन ग्रहणे दोषाभावः । तथाविधपण्याधिष्ठातृहस्ताद्ग्रहणे तु ग्रहीतरि तदशौचं संक्रमते । द्रव्यं च तद्दुष्टं देवकर्मणि नोपयुज्यते ।

३१८ दधि-मधु-घृत-क्षीर-मद्य-मांसानि लवणं जलं तृणकाष्ठ-शाक-फलमूलपुष्पाणि तिलमौषधमजिनं पुस्तकादिकं च एतान्यशौच्यधिष्ठितानि स्वहस्ताद्ग्राह्याणि । अशौचिहस्ताद्ग्रहणे तु तदशौचं ग्रहीतरि संक्रमते ।द्रव्यं च तद्दुष्टमकर्मण्यम् ।

३१९ अपक्वं तन्दुलादिद्रव्यम् । पक्वं मोदकलड्डुकादि । एतदुभयमन्नसत्रावृत्तानामशौचिनामपि तदशौचिहस्तसम्पर्कव्यतिरेकेण स्वहस्ताद्ग्राह्यम् । अन्नसत्रादन्यत्र तु तदशौचिपक्वान्नं मोदकादिकं भुक्त्वा त्रिरात्रव्रतेन शुध्यति ।

३२० उभाभ्यां भोजयितृभोक्तृभ्यां दातृग्रहीतृभ्यां वा व्यवहर्तृभ्यामपरिज्ञाते त्वशौचे तदशौच्यन्नं भुक्तवतोऽपि न दोषः । आशौचसंक्रमणे ज्ञानस्यैव निमित्तत्वात् । तयोरेकेनाप्यशौचे परिज्ञाते तु भोक्तरि दोषः संक्रमते ।

३२१ विवाहोत्सवयज्ञेषु प्रवृत्तेषु यद्यन्तरा सूतकं मृतकं वा जायते तदाशौचिभिन्नगोत्रैः परैरन्नं तदशौचिहस्तासंपृक्तं प्रदातव्यम् । तत्र पूर्वसंकल्पितान्ने दोषाभावात् तदन्नभक्षणे भोक्तृणां ब्राह्मणानां दोषाप्रसक्तिः ।

३२२ अथ भुञ्जानेषु ब्राह्मणेषु भोजनार्थं भुक्ते सत्यन्तरा सूतके मृतके वा प्राप्ते तत्रोच्छिष्टशेषं त्यक्त्वोत्थिता अन्यगेहे परकीयेन जलेनाचान्तास्ते ब्राह्मणा न दुष्यन्ति । अथ तत्रैवाशौचिनोगृहे कृताचमनानां तु दोषः स्यादेव । इति द्रव्यभेदाधिकारः ॥

४-अथ मृतदेहाधिकारः

३२३ यादृशेभ्यः प्रेतेभ्यः प्रदीयमानमुदकं पिण्डदानं वा केवलमन्तरिक्षे विलीयते न तु प्रेतेभ्य उपतिष्ठते ते प्रदर्श्यन्ते ।

३२४ यो हि महापातकी गलत्कुष्ठी । यो वा कण्ठदेशोत्पन्नभगरोगः स्यात् । यो वा चर्मास्थ्यादिमयपात्रनिर्माता ब्राह्मणादिः स्यात् । योवा पुंकर्मासक्तनपुंसकः स्यात् । योवा व्याधिजनकौषधदाता विषदाता अग्निदाता वा स्यात् । यो वा मनुष्यवधस्थानाधिकारी स्यात् । एवंविधानां पातकिनां कालमृतानामपि न दाहो न श्राद्धं नाप्याशौचं प्रकल्प्यते । तत् कृत्वा तप्तकृच्छ्रद्वयं कुर्यात् ।

३२५ अथ यदि शृङ्गिनखाद्यादिपशुभिः स्त्रिया वा सहक्रीडां कुर्वन् प्रमादतो म्रियमाणः स्यात् । यदि वा मरणोद्देशप्रवृत्तो विद्युद्धतःस्यात् । यदि वा पाखण्डाश्रयितया नित्यपरद्वेषितया वा क्रोधादिना वा स्वयं प्रायविषाग्न्यादिशस्त्रोद्बन्धनजलगिरितरुप्रपतनादिप्रयोगेण म्रियमाणः स्यात् । यथा कथंचिद्वा शास्त्रानुमतं बुद्धिपूर्वकमात्मघाती स्यात् । एवं विधानां पातकिनामपि न दाहो न श्राद्धं नाप्याशौचं प्रकल्प्यते । तत् कृत्वा तप्तकृच्छ्रद्वयं कुर्यात् ।

३२६ अथ यो ब्राह्मणविषयापराधकरणान्निहतः स्यात् । यो वा बुद्धिपूर्वकं ब्राह्मणेन हतः स्यात् । परदारान् हरन् द्वेषात् तत्पतिभिर्निहतः स्यात् । यो वा चौर्यादिदोषेण राज्ञा हतः स्यात् । यो वा कलहं कुर्वाणो विप्रादिः कदाचिदसमानवर्णैश्चाण्डालाद्यैर्निहतः स्यात् । यो वा नागविप्रियकारितया नागहतः स्यात् । एवंविधानां विशिष्टदोषनिमित्तकमृत्युमतामपि न दाहो न श्राद्धं नाप्याशौचं प्रकल्प्यते तत् कृत्वा तप्तकृच्छ्रद्वयं कुर्यात् ।

३२७ एतत्सर्वमवैधे दर्पकृते च मृत्युकृते च मृत्युनिमित्ते कर्मणि द्रष्टव्यम् । वैधे प्रमादकृते वा मरणेतु तेषामशौचनैर्ऋतदेहिकादिकं च सर्वं यथायथमस्त्येव । एवमेव कृतप्रायश्चित्तस्य गलत् कुष्ठिनोपि दाहाशौचादिकं भवत्येव । तथा युद्धे स्वाम्यर्थं म्लेच्छतस्करादिभिरपि निहतस्य विप्रादेर्दाहाशौचादिकं भवत्येव । युद्धे शस्त्रेणाभिमुखहतस्य दाहादिकं

प्रवर्त्तते सद्यः शौचं च । गोविप्रपालनेऽभिमुखयुद्धे हतस्य सद्यः शौचम् । पराङ्मुखहतस्य तु तस्य त्रिरात्रम् । गवार्थे ब्राह्मणार्थे वा दस्युना युद्धे हतस्याहोरात्रमाशौचम् । नृपतिरक्षितयुद्धे लगुडादिहतस्य च त्रिरात्रम् । ३२८ लौकिकपारिभाषिकोभयविधशस्त्रघातेतरघातेन तु सप्ताहमध्येमरणे सर्ववर्णानां त्र्यहम् । सप्ताहादूर्ध्वं तु मरणे सति स्वजात्युक्तं संपूर्णाशौचमेव । लौकिकेन पारिभाषिकेण वा शस्त्रघातेन त्र्यहमध्ये मरणे त्र्यहाशौचम् । त्र्यहादूर्ध्वं तु मरणे सर्ववर्णानां स्वजात्युक्तं प्रकृताशौचमेव ।

३२९ खड्गशरछुरिकादिघातो लौकिकशस्त्रघातः । वज्रपाताद्, अग्निदाहात्, जलप्रवेशात्, उच्चदेशप्रपतनात्, संग्रामात्, शृङ्गिनखिदंष्ट्रिव्यालादिघातात्, विषभक्षणात्, चौरचाण्डालादिभिर्घातात्, उद्बन्धनाद्वा, मरणं शास्त्रानुमतम् । अनशनादिमरणं च पारिभाषिकशस्त्रघातः सेयं परिभाषा देवीपुराणे समाम्नाता । इति मृतदोषाधिकारः ।

अथ वचनाधिकारः ।

३३० साङ्गसार्थज्ञानवेदवतः श्रौतस्मार्ताग्निद्वयवतो वेदविहितसकलक्रियावतो विप्रस्य सपिण्डमरणादौ सद्यः शौचम् ॥१॥ वेदार्थमविजानतस्तु साङ्गवेदवतोऽग्निद्वयवतः क्रियानिष्ठस्यैकाहः ॥२॥ साङ्गसार्थज्ञानवेदवतोऽग्निद्वयवतोविहितैकदेशक्रियावतोऽप्येकाहः ॥ ३ ॥ साङ्गसार्थज्ञानवेदवतः स्मार्तैकाग्निमतः श्रौताग्निहीनस्य क्रियानिष्ठस्य त्र्यहः ॥ ४ ॥ वेदशून्यस्याग्निद्वयवतः क्रियानिष्ठस्य त्र्यहः ॥ ५ ॥ साङ्गसार्थज्ञानवेदवतोऽप्यग्निद्वयहीनस्य चतुरहः॥६॥ अङ्गानभिज्ञस्य वेदवतोऽग्निद्वयहीनस्य पञ्चाहः॥७॥ वेदैकदेशाध्यायिनोऽग्निद्वयहीनस्य षडहः ॥८॥ अनधीतवेदा अनग्नयोजातिब्राह्मणा ब्राह्मणाब्रुवा इत्युच्यन्ते । तेषां दशाहमाशौचम् । अघापकर्षकवेदाग्निशून्यतया यत्रापवादाप्रसक्तावौत्सर्गिकाशौचप्रसक्तेर्निराबाधात्ए सर्वे चेते सद्यः शौचादिका अपकर्षपक्षाः सपिण्डान्तराणामशौचिनां संसर्गाभावे सति बोध्याः । सति तु संसर्गे तेषां निमित्तिनामिवैषां वेदाग्निमतामप्यशौचं दशाहव्याप्यमेवोपधीयते । न त्वपकर्षः ।

३३१ संसर्गश्चात्रैकत्रशयनासनभोजनादिलक्षणो नवविधो द्रष्टव्यः । तत्राह देवलः—

आलापस्पर्शनिश्वासात् सहयानासनाशनात् ।
याजनाध्यापनाद् यौनात् पापं संक्रमते नृणाम् ॥ इति

३३२ विशेषश्चात्र त्रिंपष्टितमे प्रतिज्ञावाक्ये द्रष्टव्यः ॥

क्षत्रियस्य वेदाग्निमत्वे क्रियानिष्ठत्वे च दशाहो न तु द्वादशाहः १

वैश्यस्य वेदाग्निमत्वे क्रियानिष्ठत्वे च द्वादशाहो न तु पञ्चदशाहः २

अद्वया द्विजशुश्रूषां पञ्चयज्ञादीनि च शूद्रविहितकर्माणि नियमेन कुर्वाणस्य न्यायवर्त्तिनः शूद्रस्य पञ्चदशाहाशौचं न तु मासम् ।

३३३ सर्वं चैतदाशौचसंकोचविधानं प्रतिनियतेष्वेव होमाध्ययनादिकर्मस्वनुज्ञालाभार्थं बोध्यम् । न तु सन्ध्यावन्दने पञ्चमहायज्ञे, मृत्तिकाग्रहणमार्जन, प्राणायाम, तर्पणाद्युपेतप्रधानक्रियारूपस्नानात्मकनित्यकर्मसु स्मार्त्तकर्मसु कुलान्नभोजने दानप्रतिग्रहयोः काम्यहोमस्वाध्यायादिषु चानुष्ठानानुज्ञानार्थमयमाशौचसंकोच उपकल्प्यते । तेनेदं दशाहाद्याशौचं कुलान्नभोजनादिनिवर्त्तकं स्वाध्यायहोमदानप्रतिग्रहादिविशिष्टकर्मप्रतिबन्धकमपि वेदाग्निमतां क्रियानिष्ठानां नित्यकर्त्तव्यस्य वेदाध्ययनाध्यापनाग्निहोत्रादिकर्मणः केवलमेकाहादिलक्षणमत्यल्पकालमेव प्रतिबन्धकं भवति न तु दशाहादिपर्यन्तमधिककालमित्येतावन्नात्रे तात्पर्यं बोध्यम् ।

३३४ यत्रापि वेदाग्निमतामपसंकोचो विहितस्तत्राप्याशौचे सत्यग्निमता श्रौताग्नौ शुष्कान्नेन फलेन वा होमः कार्यः । स्मार्त्ताग्नौ त्वकृतान्नेन कृताकृतान्नेन वा परद्वाराहोमः कारयितव्यः । कृतान्नं तु परद्वारापि न हावयेत् । ओदनसक्तुलाजमोदकलड्डुकादिकं कृतान्नम् । तन्दुलमाषमुद्गादिकं कृताकृतान्नम् । व्रीहियवगोधूमादिकं त्वकृतान्नम् ।

३३५ कुमारप्रसवे नाडीच्छेदात्पूर्वं हिरण्यधान्यगोवस्त्रकम्बलादिप्रावरणतिलान्नगुडसर्पिषां दानं प्रतिग्रहं वा कुर्वन् नदोषेण युज्यते ॥१॥ पुत्रोत्पत्तौ नाडीच्छेदात्पूर्वं जातश्राद्धमप्यसिद्धान्नेन कुर्वन्नदुष्यति ॥ २ ॥ जननदिवसात् षष्ठेहनिच जन्मदानां षोडशमातृणां षष्ठिकासहितानां रात्रियागं कुर्वन् न दुष्यति ॥ ३ ॥

३३६ जन्माशौचे मरणाशौचेऽपि वा स्थिते यदि पुत्रजन्म स्यात् तदा पुत्रजन्मनिमित्तकं जातेष्टिसंस्कारादिकं कुर्यादेव न त्वाशौचात्तन्निवृत्तिः ।

अन्माशौचे मरणाशौचेऽपि वा स्थिते यदि पित्रादिसपिण्डानां मरणं स्यात् तदा मरणनिमित्तकमन्त्येष्टिकर्मादिकं कुर्यादेव न त्वशौचान्तन्नि-वृत्तिः ॥ २ ॥

३३७ प्रारब्धे प्रेतपिण्डे यदि मध्ये जननं स्यात् तदाशेषानप्याशौच-पिण्डान् यथाविधि यथोपक्रमं दद्यादेव नत्वपूर्वोशौचात् तन्निवृत्तिः ॥

३३८ पित्राशौचमध्ये मातृमरणे पित्राशौधानन्तरं पत्नीवृद्धिः पूर्वमाम्नाता । चतुस्त्रिंशदधिकद्विशततमे प्रतिज्ञावाक्ये (२३४) तत्र तथाविधे मातुः पत्नीमध्ये पितुरेकादशाहश्राद्धं कुर्यादेव न त्वाशौचान्नि-वृत्तिरिति देवयाज्ञिकादयः प्राहुः। पत्नीपर्यन्ताशौचनिवृत्तौ सत्यां तदः पितुरेकादशाहनिमित्तकमाद्यश्राद्धं कुर्यादिति मिताक्षराकारादयः । तेनात्र विकल्पः । विकल्पे त्वाचाराद्व्यवस्था । एवमन्यत्रापि यथायथमूह्यम् ।

इति वाचनिकाधिकारः ।

३३९ श्रीपूर्णस्य रमेश्वरस्य मिथिलाशीस्य विद्याभिधे-
र्भूवृन्दारकवृन्दवन्दितपदस्यात्यन्तसन्तुष्टये ।
धीरैर्भारतधर्म्मसंग्रहपरैः संप्रार्थितो मैथिलः
सोऽयं श्रीमधुसूदनो व्यतनुताशौचे समीक्षामिमाम् ॥ १॥

इत्याशौचापवादाभ्यायो नवमः ॥ ९ ॥

अथ प्रमाण संग्रहाध्यायः ॥

३४० अत्राध्याये स्मृतिसंग्रहो वचनसंग्रहो नामसंग्रहश्चेति त्रयोऽधिकाराः प्रदर्श्यन्ते । तत्राद्ये आशौचार्था विंशतिस्मृतयो यथा-मनुस्मृतिः१ प्रक्षिप्तमनुस्मृतिः, २ याज्ञवल्क्यस्मृतिः, ३ पराशरस्मृतिः, ४ बृहत्पराशरस्मृतिः, ५ गौतमस्मृतिः, ६ वसिष्ठस्मृतिः, ७ दक्षस्मृतिः, ८ शङ्खस्मृतिः, ९ लिखितस्मृतिः, १० लघ्वत्रिस्मृतिः, ११ अत्रिस्मृतिः, बृद्धात्रिस्मृतिः १३ यमस्मृतिः, १४ संवर्त्तस्मृतिः, १५ विष्णुस्मृतिः, १६ औशनसस्मृतिः, (६) १७ आङ्गिरसस्मृतिः, १८ आपस्तम्बस्मृतिः, १९ कात्यायनस्मृतिश्चेति २०।

द्वितीये स्वधिकारे नानामुनिवचनानि २१ पुराणवचनानि२२ च संगृहीतानि । तृतीये तु आशौचनिबन्धानां नामोल्लेखःकृत । इत्येवमादीन्यधिकरणान्यत्र भवन्ति ।

तत्रादौ मनुस्मृतिः—

३४१ अतःशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च ।
चतुर्णामपि वर्णानां यथावदनुपूर्वशः ॥ १ ॥
दन्तजातेऽनुजाते च कृतचूडे च संस्थिते ।
अशुद्धा ज्ञातिवान्धवाः सर्वे सूतके च तथोच्यते ॥२॥
दशाहं शावमाशौचं सपिण्डेषु विधीयते ।
अर्वाक् संचयनादस्थ्नां त्र्यहमेकाहमेव च ॥ ३ ॥
सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु जन्मनाम्नोरवेदने ॥ ४ ॥
यथेदं शावमाशौचं सपिण्डेषु विधीयते ।
जननेऽप्येवमेव स्यान्निपुणां शुद्धिमिच्छताम् ॥५॥
सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् ।
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥ ६ ॥
निरस्यतु पुमान् शुक्रमुपस्पृश्यैव शुद्ध्यति ।
वैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम् ॥७॥
अहा चैकेन रात्र्या च त्रिरात्रैरेव च त्रिभिः ।
शवस्पृशो विशुद्ध्यन्ति त्र्यहादुदक दाहिनः ॥८॥

गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् ।
प्रेतहारैः समं तत्र दशरात्रेण शुद्धयति ॥ ९ ॥
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्धयति ।
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ॥१०॥
नृणामकृतचूडानां विशुद्धिर्नैशिकी स्मृता ।
निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते ॥११॥
ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः ।
अलंकृत्य शुचौ भूमावस्थिसंचयनाहते ॥ १२ ॥
नास्य कार्योऽग्निसंस्कारो न च कार्योदकक्रिया ।
अरण्ये काष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव च ॥१३॥
नात्रिवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया ।
जातदन्तस्य वा कुर्युर्नाग्नि वापि कृते सति ॥१४॥
सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतम् ।
जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते ॥१५॥
स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुद्धयन्ति बान्धवाः।
यथोक्तेनैव कल्पेन शुद्धयन्ति तु सनाभयः ॥१६॥
अक्षारलवणान्ताः स्युर्निर्मज्जेयुश्च ते त्र्यहम् ।
मांसाशनं च नाश्नीयुः शयीरँश्च पृथक् क्षितौ॥१७॥
सन्निधावेव वैकल्पः शावाशौचस्य कीर्तितः ।
असन्निधावयं ज्ञेयो विधिः सम्बन्धिबान्धवैः१८
विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् ।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥१९॥
अतिक्रान्ते दशाहे च त्रिरात्रमशुचिर्भवेत् ।
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्धयति ॥२०
निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ।
सवासा जलमाप्लुत्य सद्य एव विशुद्धति ॥२१॥
काले देशान्तरस्थे च पृथक् पिण्डे च संस्थिते ।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥२२॥

अन्तर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी ।
तावत् स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम् २३॥
त्रिरात्रमाहुराशौचमाधार्ये संस्थिते सति ।
तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः २४॥
श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत् ।
मातुले पक्षिणी रात्रिः शिष्यर्त्विग्बान्धवेषु च २५॥
प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितिः ।
अश्रोत्रिये त्वहः कृत्स्नमनूपाने तथा गुरौ ॥२६
शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥२७॥
न वर्द्धयेदघाहानि प्रत्यूहे नाग्निषु क्रिया ।
न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् २८॥
दिवा कीर्त्तिमुदक्यां च पतितं सूतिकां तथा ।
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुद्ध्यति २९
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ।
सौरान्मन्त्रान्यथोत्साहं पावमानीश्च शक्तितः ३०
नरं स्पृष्ट्वाथसस्नेहं स्नात्वाविप्रो विशुद्ध्यति ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ३१॥
आदिष्टो नोदकं कुर्यादाव्रतस्य समापनात् ।
समाप्ते तूदकं कृत्वा त्रिरात्रेणैव शुद्ध्यति ॥ ३२ ॥
वृथा संकरजातानां प्रव्रज्यासु च तिष्ठताम् ।
आत्मनस्त्यागिनां चैव निवर्त्तेतोदकक्रिया ३३॥
पाखण्डमाश्रितानां च चरन्तीनां च कामतः ।
गर्भभर्तृघ्नां चैव सुरापीनां च योषिताम् ॥३४
आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम् ।
निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ॥३५
दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजन्मनः ॥३६॥

न राज्ञामघदोषोऽस्ति व्रतिनां न च सत्रिणाम् ।
ऐन्द्रंस्थानमुपासीना ब्रह्मभूता हि ते सदा ३७
राज्ञो महात्मके स्थाने सद्यः शौचं विधीयते ।
प्रजानां परिरक्षार्थमासनं चान्नकारणम् ॥३८॥
डिम्बाहवहतानां च विद्युता पार्थिवेन च ।
गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ३९
सोमाग्न्यर्कानिलेन्द्राणां वित्तेशस्यार्यमस्य च
अष्टानां लोकपालानां वपुर्धारयते नृपः ॥ ४० ॥
लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते ।
शौचाशौचं हि मर्त्यानां लोकेशप्रभवाप्ययम् ४१
उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च ।
सद्यः सन्तिष्ठते यज्ञस्तथाशौचमितिस्थितिः ४२
विप्रः शुद्ध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम्।
वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः४३
एतद्वोऽभिहितं शौचं सपिण्डेषु द्विजोत्तमाः ।
असपिण्डेषु सर्वेषु प्रेतशुद्धिं निबोधत ॥ ४४
असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान्४५
यद्यन्नमत्ति तेषान्तु दशाहे नैव शुद्ध्यति ।
.....महैव न चैतस्मिन् गृहे वसेत् ॥ ४६॥
अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च ।
स्नात्वा सचैलःस्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति४७
न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत् ।
अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्र संस्पर्श दूषिता४८
ज्ञानं तपोग्निराहारो मृन्मनो वार्युपांजनम् ।
वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनाम्४९
सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् ।
योर्थे शुचि र्हि स शुचिर्न मृद्वारिशुचिः शुचिः५०

क्षान्त्या शुद्धयन्ति विद्वांसो दानेनाकार्यं कारिणः।
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः ॥ ५१ ॥
मृत्तोयैः शुद्धयते शीघ्रं नदी वेगेन शुद्धयति ।
रजसा स्त्री मनोदुष्टा सन्यासेन द्विजोत्तमः ॥५२
अद्भिर्गात्राणि शुद्धयन्ति मनः सत्येन शुद्धयति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुद्धयति५३
एष शौचस्य वः प्रोक्तः शारीरस्य विनिर्णयः ।
नानाविधानां द्रव्याणां शुद्धेः शृणुत निर्णयम् ५४

अथ मनुस्मृतौ क्षेपकवचनानि (२)

३४३ उभयत्र दशाहानि कुलस्यान्नं न भुञ्जते ।
दानं प्रतिग्रहो यज्ञः स्वाध्यायश्च निवर्त्तते ॥१
जननेऽप्येवमेवस्यान्मातापित्रोस्तु सूतकम् ।
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥ २ ॥
प्राक्संस्कारप्रमीतानां वर्णानामविशेषतः ।
त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वहो विधीयते ३
आदन्तजन्मनः सद्य आचूडान्नैशिकी स्मृता ।
त्रिरात्रमा व्रतादेशात् दशरात्रमतः परम् ॥ ४॥
परपूर्वासु भार्यासु पुत्रेषु प्रकृतेषु च ।
मातामहे त्रिरात्रं तु-एकाहं दत्तपिण्डतः ॥५॥
परपूर्वासु पुत्रेषु सूतके मृतकेषु च ।
मातामहे त्रिरात्रं स्यादेकाहं तु सपिण्डने ॥६॥
मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा ।
अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुद्धयति ॥ ७ ॥
पितरौ वेन्मृतौस्यातां दूरस्थोऽपि हि पुत्रकः ।
श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् ॥८॥
क्षत्र विट् शूद्रदायादाः स्युश्चेद्विप्रस्य बान्धवाः ।
तेषामशौचं विप्रस्य दशाहाच्छुद्धिरिष्यते ॥९॥

राजन्यवैश्ययोश्चैवं हीनयोनिषु बन्धुषु ।
स्वमेव शौचं कुर्वीत विशुद्ध्यर्थं मिति स्थितिः१०
विप्रः शुद्ध्येद्दशाहेन जन्महानौ स्वयोनिषु ।
षड्भिस्त्रिभिरथैकेन क्षत्रविट् शूद्रयोनिषु ॥११॥
सर्वे चोत्तमवर्णास्तु शौचं कुर्युरतन्द्रिताः ।
तद्वर्णं विधिवद्दृष्टे न तु शौचं स्वयोनिषु ॥१२॥

३४३ यानि वचनानि हेमाद्रिमाधवादिभिर्निबन्धकारैर्मनूक्तत्वेन स्वीक्रियन्ते किन्तु संप्रत्युपलब्धमुद्रितमनुस्मृतिपुस्तकेषु नोपलभ्यन्ते तानि आशौचविषयाणि प्रदर्श्यन्ते ।

मातुले श्वशुरे मित्रे गुरौ गुर्वङ्गनासु च ।
आशौचं पक्षिणीं रात्रिं मृता मातामही यदि ॥
श्वशुरयोश्च भगिन्यां च मातुलान्यां च मातुले ।
संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते ॥
संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थितः ।
पित्रोः स्वसरि तद्वच्च पक्षिणीं पक्षयन्निशाम् ॥
भगिन्यां संस्कृतायान्तु भ्रातर्यपि च संस्कृते ।
मित्रे जामातरिप्रेते दौहित्रे भगिनीसुते ॥
शःलके तत्सुते चैव सद्यः स्नानेन शुद्ध्यति ॥
पित्रोरुपशमे क्षीणांमूढानां तु कथं भवेत् ।
त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान् यमः ॥
दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः ।
शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते ॥
श्वशूद्रपतिताश्चान्त्या मृताश्चे द्द्विजमन्दिरे ।
शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा ॥
दशरात्रच्छुनिमृते मासाच्छूद्रे भवेच्छुचिः ।
द्वाभ्यां तु पतिते गेहमन्त्येमासचतुष्टयात् ॥
अत्यन्तं वर्जयेद्गेहमित्येवं मनुरब्रवीत् ।
द्विजस्य मरणे वेश्म विशुद्ध्यति दिनत्रयात् ॥

ग्राममध्ये मृतो यावच्छवस्तिष्ठति कस्यचित् ।
ग्रामस्य तावदाशौचं निर्गते शुचिता भवेत् ॥
ग्रामेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि ।
शिष्ये पञ्चत्वमापन्ने शुद्धिर्नक्षत्रदर्शनात् ॥
महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः ।
बाधो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥
देशनामनदीभेदान्निकटेऽपि भवेद्यदि ।
तत्तु देशान्तरं प्रोक्तं स्वयमेव स्वयंभुवा ॥
दशरात्रेण या वार्ता यत्र न श्रूयतेऽथवा ।

अथ याज्ञवल्क्यस्मृतिः (३)।

३४४ ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः ।
भ्रातृभ्रातृव्यसगोत्रसोदकानां तु बान्धवाः ॥ १ ॥
यमसूक्तं तथा गाथा अपद्विर्लौकिकाग्निना ।
सदग्धव्यश्च पेतश्च दाहिताग्न्या वृताधवत् ॥ २ ॥
सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयन्त्यपः ।
अयनः शोशुचदघमनेन पितृदिङ्मुखाः ॥ ३ ॥
एवं मातामहाचार्यप्रेतानामुदकक्रिया ।
कामोदकं सखि प्रेता स्वस्रीयश्वशुरर्त्विजाम् ॥४॥
सकृत्प्रसिञ्चन्त्युदकं नामगोत्रेण बान्धवाः ।
न ब्रह्मचारिणः कुर्युरुदकं पतितास्तदा ॥ ५ ॥
पाखण्ड्यनाश्रिताः स्तेनाः भर्तृघ्न्यः कामगादिकाः।
सुराप्य आत्मत्यागिन्यो नाशौचोदक भाजनम् ॥६॥
प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि ।
इच्छतां तत्क्षणाच्छुद्धिः परेषां स्नानसंयमात् ॥७॥
आचार्ये पितृपाध्यायान्निर्हृत्यापि व्रती व्रती ।
संकटान्नं च नाश्नीयान्न च तैः सहसंवसेत्॥८॥
त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ।
ऊनद्विवर्षे उभयोः सूतकं मातुरेव हि ॥ ९ ॥

पित्रोस्तु सूतकं मातुस्तदसृग्दर्शनाद्ध्रुवम् ।
तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात् ॥ १० ॥
अन्तरा जन्ममरणे शेषाहोभिर्विशुद्ध्यति ।
गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् ॥११॥
हतानां नृपगोविप्रैरन्यक्षं चात्मघातिनाम् ।
प्रेषिते कालशेषः स्यात् पूर्णे दत्वोदकं शुचिः ॥१२॥
क्षत्रस्य द्वादशाहानि विशः पञ्चदशैव तु ।
त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्त्तिनः ॥१३॥
आदन्तजन्मनः सद्य आचूडान्नैशिकी स्मृता ।
त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ॥ १४ ॥
अहस्त्वदत्तकन्यासु वालेषु च विशोधनम् ।
गुर्वन्ते वास्यनूचानमातुलश्रोत्रियेषु च ॥ १५ ॥
अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ।
निवासराजनि प्रेते सदहः शुद्धिकारणम् ॥ १६ ॥
ब्राह्मणेनानुगन्तव्यो न शूद्रो न द्विजः क्वचित् ।
अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतमुक् शुचिः ॥१७॥
महीपतीनां नाशौचं हतानां विद्युता तथा ।
गोब्राह्मणार्थे संग्रामे यस्यचेच्छति भूमिपः ॥१८॥
ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम् ।
सत्रिव्रतिब्रह्मचारिदातृ ब्रह्मविदां तथा ॥ १९ ॥
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्यः शौचं विधीयते ॥२०॥
उदक्या शुचिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशेत् ।
अलिङ्गानि जपेच्चैव गायत्रीं मनसासकृत् ॥२१॥
कालोऽग्निः कर्म मृद्वायुर्मनोज्ञानं तपो जलम् ।
पञ्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥ २२ ॥
अकार्यकारिणां दानं वेगो नद्याश्च शुद्धिकृत् ।
शौध्यस्य मृच्च तोयं च सन्यासोवै द्विजन्मनाम् ॥ २३ ॥

तपोवेदविदां शान्तिर्विदुषां यज्ञकर्मणाम् ।
जपः प्रच्छन्नपापानां मनसः सत्यमुच्यते ॥२४॥
भूतात्मनस्तपोविद्ये बुद्धेर्ज्ञानं विशोधनम् ।
क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमात्मता ॥ २५ ॥

अथ पराशरस्मृतिः (४)

३४५ अतः शुद्धिं प्रवक्ष्यामि जनने मरणे तथा ।
दिनत्रयेण शुद्ध्यन्ति ब्राह्मणाः प्रेतसूतके ॥१॥
क्षत्रियो द्वादशाहेन वैश्यः पञ्चदशाहकैः ।
शूद्रः शुद्ध्यति मासेन पराशरवचो यथा ॥२॥
उपासने तु विप्राणामङ्गशुद्धिश्च जायते ।
ब्राह्मणानां प्रसूतौ तु देहस्पर्शो विधीयते ॥३॥
जातौ विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥४॥
एकाहाच्छुद्ध्यते विप्रो योऽग्निवेदसमन्वितः ।
त्र्यहात् केवलवेदस्तु द्विहीनो दशभिर्दिनैः॥५॥
जन्मकर्मपरिभ्रष्टः सन्ध्योपासनवर्जितः ।
नामधारकविप्रस्तु दशाहं सूतकं भवेत् ॥ ६ ॥
अजा गावो महिष्यश्च ब्राह्मणी नवप्रसूतिका ।
दशरात्रेण संशुद्ध्येद् भूमिस्थं च नवोदकम् ॥७॥
एकपित्रोस्तु दायादाः पृथगदारनिकेतनाः ।
जन्मन्यपि विपत्तौ च तेषां तत्सूतकं भवेत्॥८॥
तावत् तत् सूतकं गोत्रे चतुर्थपुरुषेण तु ।
दायाद्विच्छेदमाप्नोति पञ्चमोत्तरसंश्रयः ॥९॥
चतुर्थे दशरात्रं स्यात् षण्मासाः पुंसि पञ्चमे ।
षष्ठे चतुरहाच्छुद्धिः सप्तमे तु दिनत्रयात् ॥१०॥
भृग्वग्निसरणे चैव देशान्तरमृते तथा ।
श्राद्धे प्रेते च संन्यस्ते सद्यः शौचं विधीयते ११

देशान्तरमृतः कश्चित् सगोत्रः श्रूयते यदि ।
न त्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेत् १२
देशान्तरगतो विप्रः प्रयातात् कालकारितात्
देहनाशमनुप्राप्त स्तिथिर्नश्यायते यदि ॥ १३ ॥
कृष्णाष्टमी त्वमावास्या कृष्णा चैकादशी च या।
उदकं पिण्डदानं च तत्र श्राद्धं च कारयेत् ॥१४॥
अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः ।
न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया ॥१५॥
यदि गर्भो विपद्येत स्रवते वापि योषितः ।
यावन्मासं स्थितो गर्भो दिनं तावत्तु सूतकम् ॥१६॥
आषतुर्याद्भ भवेत्स्रावः पातः षड्यमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् ॥१७॥
दन्तजातेऽनुजाते च कृतचूडे च संस्थिते ।
अग्निसंस्कारणे तेषां त्रिरात्रमशुचिर्भवेत् ॥१८॥
आदन्तजन्मनः सद्यः आचूडान्नैशिकी स्मृता ।
त्रिरात्रमात्रतादेशाद्दशरात्रमतः परम् ॥ १९ ॥
ब्रह्मचारी गृहे येषां हूयते च हुताशनः ।
संपर्कं चेन्न कुर्वन्ति न तेषां सूतकं भवेत् ॥ २० ॥
संपर्काद्भ दुष्यते विप्रो जनने मरणे तथा ।
संपर्कोच्च निवृत्तस्य न प्रेतं नैव सूतकम् ॥ २१ ॥
शिल्पिनः कारुका वैद्या दासीदासाश्च नापिताः ।
राजानः श्रोत्रियाश्चैव सद्यःशौचाः प्रकीर्तिताः ॥२२॥
सव्रतो मन्त्रपूतश्च आहिताग्निश्च यो द्विजः ।
राज्ञश्च सूतकं नास्ति यस्य चेच्छति पार्थिवः ॥२३॥
उद्यतो निधने दाने आर्तो विप्रो निमन्त्रितः ।
तदेव ऋषिभिर्दृष्टं यथाकालेन शुद्ध्यति ॥ २४ ॥
प्रसवे गृह्यमेधी तु न कुर्यात्संकरं यदि ।
दशाहाच्छुद्ध्यते माता स्ववर्गाच्च पिता शुचिः ॥२५॥

सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् ।
सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥२६॥
यदि पत्न्यां प्रसूतायां संपर्कं कुरुते द्विजः ।
सूतकं तु भवेत्तस्य यदि विप्रः पदङ्गवित् ॥ २७ ॥
संपर्कोऽजायते दोषो ..... ।
तस्मात्सर्वप्रयत्नेन संपर्कं वर्जयेद्बुधः ॥ २८ ॥
विवाहोत्सवयज्ञेषु त्वन्तरामृतसूतके ।
पूर्वं संकल्पितं द्रव्यं दीयमानं न दुष्यति ॥२९॥
अन्तरा तु दशाहस्य पुनर्मरणजन्मनी ।
तावत् स्यादशुचि र्विप्रो यावत्तत्स्यादनिर्दशम्३०
आत्मत्राणं विपन्नानां बन्दीग्रहणे तथा ।
आहवेषु विपन्नानामेकरात्रमशौचकम् ॥ ३१ ॥
द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
परिव्राट् योगयुक्तश्च रणे चाभिमुखो हतः ॥३२॥
अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे यज्ञफलमानुपूर्व्या लभन्ति ते ॥ ३३ ॥
न तेषामशुभे किञ्चित् पापं वा शुभकर्मणाम् ।
जलावगाहनात्तेषां सद्यः शौचं विधीयते ॥३४॥
असगोत्रमबन्धुं च प्रेतीभूतं द्विजोत्तमम् ।
वहित्वा च दहित्वा च प्राणायामेन शुद्ध्यति ३५
अनुगम्येच्छया प्रेतं ज्ञातिसम्बन्धिमेव वा ।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति३५
क्षत्रियं मृतमज्ञानाद् ब्राह्मणो योऽनु गच्छति ।
एकाहमशुचिर्भूत्वा पञ्चगव्येन शुद्ध्यति ॥३७॥
शूद्रं च वैश्यमज्ञानाद् ब्राह्मणो ह्यनुगच्छति ।
कृत्वाऽशौचं द्विरात्रं च प्राणायामान् षडाचरेत्३९
प्रतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।
अनुगच्छेन्नीयमानं दिरात्रमशुचिर्भवेत् ॥ ३९ ॥

त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्धयति ४०
विनिवर्त्य यदा शूद्रा उदकान्तमुपस्थिताः ।
द्विजैस्तदानुगन्तव्या एष धर्मः सनातनः॥४१
तस्माद् द्विजो मृतं शूद्रं न स्पृशेन्नच दाहयेत् ।
दृष्टे सूर्यावलोकेन शुद्धिरेषा पुरातनी ॥४२॥

अथ वृहत्पराशरस्मृतिः । (५)

३४६ अथातः संप्रवक्ष्यामि शुद्धिं पाराशरोदिताम् ।
सूतकेऽप्यथवा शौचे यथावत्तां निबोधत ॥ १ ॥
प्राक्तनं सूतकं प्राहुः शावमाशौचमुच्यते ।
यावत्कालं च यस्मानं तथा तावच्चिशोधतः ॥२॥
केषांचित्तेन वै स्यातां केषांचिन् मरणान्तिके ।
अपःशौचात्तथा चान्ये स्मृताश्चैकाहिकाः परे ३
त्रिपड् दशद्वादश्यां दशभिः सह षड्यभिः ।
तान्येव त्रिगुणान्याहुर्वदन्त्येवं मनीषिणः ॥४॥
सद्यस्नायां निशोदुष्यमुक्तक्रमभिदं बुधाः ।
शक्तिजो यन्मुनीन्द्राणां प्रागचे किल धर्मवित्५
विष्णुध्यानरतानां च सदैव व्रतचारिणाम् ।
गृहमेधि द्विजातीनां तथैव व्रतचारिणाम् ॥ ६॥
वेदतत्त्वार्थवेतृणां नित्यस्नानकृतामपि ।
अनुसंसर्गिणामेषां नाशौचं नापि सूतकम् ॥७
संसर्गं वर्जयेद् यस्मात् संसर्गो दोषकारणम् ।
कुर्याकाकादिसंसर्गं वर्जयन्स्यादकिल्बिषी ॥८
वदन्ति मुनयः प्राज्ञ्याः संसर्गो दोषकारणम् ।
असंसर्गः स्वकर्मस्थो द्विजो दोषैर्न लिप्यते ॥९॥
दानोद्वाहेष्टिसंग्रामे देशविप्लवकादिषु ।
सद्यः शौचं द्विजातीनां सूतकाशौचयोरपि ॥१०॥

दातृणां प्रतिग्रहीतॄणां क्रियाः सुनृशामपि ।
सद्यः शौचमदोषाणामृषुर्धर्मविदः कलौ ॥११॥
सर्वेमन्त्रपवित्राः स्युरग्निहोत्रपरिक्रियाः ।
राजा च श्रोत्रियश्चैव सद्यःशौचाः प्रकीर्तिताः १२
देशान्तरगते जाते मृते चापि सगोत्रिणि ।
(!) नियमे तु सद्यःशौचं विशोधनम् ॥ १३ ॥
सद्यः शौचं विधातव्यमवयांग्यादन्तजन्मनः ।
धान्यधादिषु विप्रेषमन्यदूर्ध्वं विधीयते ॥ १४
नाशौचसूतके स्यातां नृपतीनां कदाचन ।
यज्ञकर्मप्रवृत्तस्य श्रौत्रियस्य दीक्षितस्य च ॥१५
पृथक् पिण्डे मृते बाले निर्दशेन्यत्र च श्रुते ।
ज्ञातेनापि विशुद्धिः स्यात्सद्यः शौचादसंशयम् १६
सवेदःसाग्निरेकाहाद् ब्राह्मणः शुद्धिमाप्नुयात्।
सपैकाहो नृपे संस्थे तथैव ब्रह्मचारिणि ॥ १७ ॥
दुर्भिक्षे राष्ट्र भङ्गे च विपत्काल उपस्थिते ।
उपसर्गमृते चापि सद्यः शौचं विधीयते ॥१८॥
गोद्विजार्थे विपन्नानामाहवेषु गतायुषाम् ।
ते योगिभिः समा ज्ञेयाः सद्यःशौचाः प्रकीर्तिताः१९
विप्रे संस्थे व्रतादर्वाक् श्रोत्रिये च द्विजे मृते ।
अनूचाने गुरौ चैव आचार्ये चापि संस्थिते॥२०॥
क्षीणामसंस्कृतानां च श्रोत्रिये च नृपे मृते ।
त्रिरात्रमेव शौचं स्यात्तथैवोदकदायिनाम् ॥२१॥
विद्वान्ननग्निको विप्रस्त्रिरात्राच्छुद्धिमाप्नुयात् ।
मनीषिणोऽपरे ब्रूयुरसपिण्डे त्र्यहं त्र्यहम् ॥२२॥
प्रेतीभूतं च यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।
अनुगच्छेच्छ्मशानं त्रिरात्रमशुचिर्भवेत् ॥ २३ ॥
षड्रात्रं नवरात्रं च शवस्पृशां विशुद्धिकृत् ।
त्र्यहं चैव विशुद्धयर्थं धर्मशास्त्रविदो विदुः ॥२४॥

अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे यज्ञफलमनुपूर्वं लभन्ति ते ॥ २५ ॥
अशुचित्वं न तेषां तु पापं वाऽशुभकारणम् ।
जलावगाहनात्तेषां सद्यः शुद्धिः प्रकीर्तिता ॥२६॥
असगोत्रमसम्बन्धं प्रेतभूतं तथा द्विजम् ।
उद्वह्य दग्ध्वा द्विजाः सर्वे स्नातास्ते शुचयः स्मृताः ॥२७॥
एकरात्रं वदन्त्येके सद्यः स्नानमथापरे ।
गोगृहादिमृतानां च मुनयः शुद्धिकारणम् ॥२८॥
हतः शूरो विपद्येत शत्रुभिर्यत्र कुत्रचित् ।
स मुक्तो यतिवत्सद्यः प्रविशन्परवेधसि ॥२९॥
संन्यासी संस्थितो योगी संमुखो यो रणे हतः ।
सूर्यमण्डलभेत्तारावितिप्राहुर्मनीषिणः ॥३०॥
पराङ्मुखे हते सैन्ये यो युद्धाय निवर्तते ।
तत्पदा————स्युरित्याह पराशरः ॥ ३१ ॥
वदने प्रविशेद्येषां लोहितं शिरसः पतत् ।
सोमपानेन तत्तुल्या विन्दवो रुधिरस्य वै ॥३२॥
संन्यासेन मृता ये स्युर्ये संग्रामे तनुत्यजः ।
मुक्तिभाजो नरास्ते स्युरिति वेदोऽपि कीर्तयेत् ॥३३॥
सद्यः शौचं विधातव्यं शुद्धिरेवं विधीयते ।
तेनोच्यन्ते मृताः लोकास्साद्या ब्रह्मवपुर्गताः ॥३४॥
सन्ध्याचारविहीनानां सूतकं ब्राह्मणद्रुवाम् ।
अशौचं द्वादशाहं स्यादिति पाराशरो ब्रवीत् ॥ ३५ ॥
राज्ञां च द्वादशाहं तु पक्षो वैश्यस्य पावनः ।
वृषलस्य तथा मासः त्र्यहादेष्वपि धर्मतः ॥३६॥
क्षपा च पक्षिणी सद्भिः—तुल्यादिषु प्रकीर्तिता ।
गर्भस्रावे च पाते च रात्रयो माससम्मिताः ॥३७॥
स्रावं गर्भस्य विद्वांसो मासादर्वाक् चतुर्थकात् ।
पातमूर्ध्वं वदन्त्येते तत्राधिकं च सूतकम् ॥३८

ऋणग्रस्तनिरागारपराधीनकदर्यकाः ।
तृष्णावन्तो निराचाराः पितृसात्तु विवर्जिताः ॥३९॥
स्त्रीजिताश्चानपत्याश्च देवब्राह्मणवर्जिताः ।
परद्रव्यग्रहस्वान्ताः सदा सूतकिनः स्मृताः ॥४०॥
सूतके सत्यशौचे वा अन्यदापद्यते यदि ।
पूर्वेणैव तु शुद्ध्येत जाते जातं मृते मृतम् ॥४१॥
एकपिण्डाश्च दायादाः पृथक् कृतनिकेतनाः ।
जन्मन्यपिमृते वापि तेषां वै सूतकं भवेत् ॥४२॥
भृगुवन्हिप्रपाते च देशान्तरमृतेषु च ।
बाले प्रेते च संन्यासे सद्यः शौचं विधीयते ॥४३॥
अजातदन्ता ये बाला ये च गर्भाद्विनिर्गताः ।
न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया ॥४४॥
विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके ।
पूर्वसंकल्पितानर्थान्भोज्यान्तानब्रवीन् मनुः ॥४५॥
शिल्पिनः कारुकाश्चैव दासीदासास्तथैव च ।
इत्यादीनां न ते स्यातामनुगृह्णन्ति यान् द्विजाः॥४६॥
पिता पुत्रेण जातेन दद्याच्छ्राद्धं यथाविधि ।
तत्राप्यनंतकं दानं कर्तव्यं पुत्रजन्मनि ॥४७॥
प्रसवे च द्विजातीनां न कुर्यात्संकरं यदि ।
दशाहाच्छुद्ध्यते माता स्नानाच्च पिता शुचिः ॥४८॥
अतिमानादतिक्रोधात्स्नेहाद्वा यदिवा भयात् ।
बद्ध्वा म्रियते यस्तु न तस्याग्निः प्रदीयते ॥४९॥
न स्नायाच्छ्रोदकं दद्यान्नापि कुर्यादशौचताम् ।
सर्पेण शस्त्रिणा वापि जलेन वह्निना तथा ॥५०॥
न स्नानादौ विपक्षस्य तथा चैवात्मघातिनः ।
अर्वाग्वै हायनादग्निर्नैव दद्यान्मृतस्य च ॥ ५१॥
किन्तु ताम्रिखनेद्भूमौ कुर्याच्छ्रोदकक्रियाम् ।
षण्मासे तु गते कार्या मुनिः प्राह पराशरः ॥५२॥

सपोदिप्राप्तमृत्यूनां वह्निदाहादिकाःक्रियाः ।
शास्त्रदृष्टं द्विजैः कार्यमस्थिसंचयनादिकम् ॥५३॥
तत्कृत्वा त्यक्तदिवसे शुद्धिमर्हति धर्मतः ।
अन्यायसृतविप्राणां ये वोढारो भवन्ति हि ।
अग्निदाश्चैव ये तेषां तथोदकादिदायिनः ॥५४॥
उद्बन्धने मृतस्यापि यश्छिन्द्यात्पाशरज्जुकम् ।
सर्वे ते पापसंयुक्ताः प्रायश्चित्तस्य भाजनाः ॥५५॥
सूतकाशौचयोरुक्ता शुद्धिर्यथानुपूर्वशः ।

अथ गौतमस्मृतिः ॥ (६)

३४७ शावमाशौचं दशरात्रमनृत्विग्दीक्षितब्रह्मचारिणां सपिण्डाना-मेकादशरात्रं क्षत्रियस्य द्वादशरात्रं वैश्यस्यार्द्धमासमेकमासं शूद्रस्य । तच्चेदन्तः पुनरापतेत्तच्छेषेण शुद्ध्येरन्, रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिः । गोब्राह्मणहतानामन्वहं राजक्रोधाच्च युद्धे प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छताम् पिण्डनिवृत्तिः सप्तमे पञ्च मेवा। जननेऽप्येवं मातापित्रोस्तन्मातुर्वा गर्भमाससमा रात्रिः स्रंसने गर्भस्य त्र्यहं वा श्रुत्वा चोर्द्धं दशरात्र्याः पत्नीषु असपिण्डे योनिसम्बन्धे सहाध्यायिनि च सब्रह्मचारिण्येकाहं श्रोत्रिये चोपपन्ने प्रेतोपस्पर्शने दशरात्रमशौचमभि संधापयेत् उक्तं च वैश्यशूद्रयोः—आर्तवीर्वा पूर्वयोश्चाहं वा आचार्यस्तत्पुत्रस्त्रीयाज्यविशेषेषु चैव अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत् पूर्वोवावरं तत्र शावोक्तमाशौचं पतितचण्डालसूतिकोदक्य शवस्पृष्टि तत्स्पृश्युपस्पर्शने सचैलोदकोपस्पर्शनाच्छुद्ध्येत् । शवानुगमिनः शुनश्च यदुपहन्यादित्येके उदकदानं सपिण्डैः कृतचूडस्य तत् स्त्रीणां चानतिभाग एके प्रेतानामधः शय्यासनिनो ब्रह्मचारिणः सर्वे न मार्ष्टयेरन् न मांस भक्षयेयुरा प्रदानात् प्रथमतृतीय सप्तमनवमेषूदकक्रिया वाससां च त्यागः अग्नेयेत्वन्त्यानां दंतजन्मादि मातापितृभ्यां तु माता, बालदेशान्तरस्थे प्रव्रजितासपिण्डानां सद्यः शौचं राज्ञां च कार्यविरोधात्

अथ वसिष्ठस्मृतिः ॥

३४८ उदकक्रियामशौचं-द्विवर्षात्प्रभृतिमृत जन्म कुर्यात् । दन्तजन-मादित्येके शरीरमग्निना संयोज्य प्रत्येकमाका अपोऽभ्यवयन्ति। ततस्तत्रस्था एव सव्येतराभ्यां पाणिभ्यामुदकक्रियां कुर्वन्ति । अदुग्धा दक्षिणामुखाः पितृणां वा एषा दिक् या दक्षिणा एतामुन्नयित्वा स्वस्तरे व्यहमश्नत आसीरन् अधःकी क्षीरोदकेन वर्तेरन् । दशाहं शावमाशौचं सपिण्डेषु विधीयते । मरणात्प्रभृति दिवसगणना सपिण्डता समानोदकं विज्ञायते असत्तानां स्त्रीणां त्रिपुरुषं त्रिदिनं विज्ञायते असंज्ञानामितरे क्षुवीरन् ताश्च तेषां जननेऽप्येवमेव निपुणां शुद्धिमिच्छतां मातापित्रो र्बीजानि निमित्तत्वात्-अथाप्युदाहरन्ति नाशौचं सूतके पुंसः संस्तवं चेन्न गच्छति रजस्तत्राशुचिज्ञेयं तच्च पुंसि न विद्यते । ब्राह्मणो दशरात्रेण पक्षमात्रेण भूमिपः विंशतिरात्रेण वैश्यः शूद्रो मासेन शुद्ध्यति । अशौचे यस्तु शूद्रस्य सूतके वापि भुक्तवान् स गच्छेन्नरकं घोरं तिर्यग् योनिषु जायते । अनिर्दशाहे पक्वान्ननि-र्योगाद्यस्तु भुक्तवान् कृमिर्भूत्वा स देहान्ते लक्षिताशुपजीवति द्वादशमासा-न्द्वादशार्द्धमासान्वाऽनश्नन्संहितामधीयानः पूतो भवतीति विज्ञायते । ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रमाशौचं सद्यः शौचमिति गौतमः । देशान्तरस्थे प्रेते ऊर्ध्वं दशाहाच्चैकरात्रमाशौचं आहिताग्निश्चे-त्प्रवसन्म्रियते पुनः संस्कारं कृत्वा शुद्ध्यतीति गौतमः भूपतिश्च-शानरजस्वलासूतिकाशुचीनुपस्पृश्य सशिरा अभ्युपेयादपः ।

अथ दक्ष स्मृतिः ॥ (८)

३४९ अशौचं प्रवदयामि जन्ममृत्यु निमित्तकम् ।
यावज्जीवं तृतीयं तु यथावदनुपूर्वशः ॥१॥
सद्यः शौचं सपिंडाहो द्वित्रिचतुरहस्तथा ।
षट् दशद्वादशाहश्च पक्षोमासस्तथैव च ॥२॥
मरणान्तं तथा चान्यद्दशपक्षास्तु सूतके ।
उपन्यासक्रमेणैव वक्ष्याम्यहमशेषतः ॥३॥
ग्रन्थार्थतो विजानाति वेदमंगैः समन्वितः ।
संकल्पं सरहस्यं च क्रियादर्शनेन सूतकी ॥४॥

राजर्त्विग्दीक्षितानां च वाले देशान्तरे तथा ।
व्रतिनां सत्रिणां चैव सद्यः शौचं विधीयते ॥५॥
एकाहस्तु समाख्यातो योग्निवेदसमन्वितः ।
हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा ॥६॥
जातिविप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्धयति ॥७॥
अस्नात्वाघस्य अप्त्वा च दत्वा हुत्वा च भुंजते ।
एवं विधस्य सर्वस्य यावज्जीवं हि सूतकम् ॥८॥
व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा ।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ॥९॥
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः ।
श्रद्धात्यागविहीनस्य भस्मान्तं सूतकं भवेत् ॥१०॥
न सूतकं कदाचित्स्याद्यावज्जीवन्तु सूतकम् ।
एवं गुणविशेषेण सूतकं समुदाहृतम् ॥११॥
सूतके मृतके चैव तथा च मृतसूतके ।
एतत् संहतशौचानां मृताशौचेन शुद्धयति ॥१२॥
दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते ।
दशाहात्तु परं शौचं विप्रोऽर्हति च धर्मवित् ॥१३॥
दानं च विधिना देयमशुभात्तारकं हितत् ।
मृतकांते मृतो यस्तु सूतकान्ते च सूतकम् ॥१४॥
एतत्संहतशौचानां पूर्वाशौचेन शुद्धयति ।
उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ॥१५॥
चतुर्थेऽहनि कर्तव्यमस्थिसंचयनं द्विजैः ।
ततः संचयनादूर्ध्वमंगस्पर्शो विधीयते ॥१६॥
वर्णानामानुलोम्येन स्त्रीणामेको यदा पतिः ।
दशषट् त्र्यहमेकाहः प्रसवे सूतकं भवेत् ॥१७॥
स्वस्यकाले त्विदंसर्वमशौचं परिकीर्तितम् ।
आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम् ॥१८॥

यज्ञेः प्रवर्तमाने तु जायेताथ म्रियेत वा ।
पूर्वं संकल्पिते कार्ये न दोष स्तत्र विद्यते ॥१९॥
यज्ञकाले विवाहे च देवयागे तथैव च ।
हूयमाने तथा चाग्नौ नाशौचं नापि सूतकम् ॥२०॥

अथशंख स्मृतिः (६) ।

३५० जनने मरणे चैव सपिण्डानां द्विजोत्तमः ।
त्र्यहाच्छुद्धिमवाप्नोति योऽग्निवेदसमन्वितः ॥१॥
सपिण्डतातु पुरुषे सप्तमे विनिवर्तते ।
नामधारकविप्रस्तु दशाहेन विशुद्धयति ॥२॥
क्षत्रियो द्वादशाहेन वैश्यः पक्षेण शुद्धयति ।
मासेन तु तथा शूद्रः शुद्धिमाप्नोति नान्तरा ॥३॥
राज्ञिभि र्मासतुल्याभिर्गर्भस्रावे विशुद्धयति ।
अजातदन्तबाले तु सद्यः शौचं विधीयते ॥४॥
अहोरात्रात् तथा शुद्धिर्बाले त्वकृतचूडके ।
तथैवानुपनीते तु त्र्यहाच्छुद्धयन्ति बान्धवाः ॥५॥
अनूढानां तु कन्यानां तथैव गर्भजन्मनाम् ।
अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परम् ॥६॥
मृत्यं समधिगच्छेद्धेन्मासात्तस्यापि बान्धवाः ।
शुद्धिं समधिगच्छेयुर्नात्र कार्या विचारणा ॥७॥
पितृ वेश्मनि या कन्या रजः पश्यत्यसंस्कृता ।
तस्यां सुतायां नाशौचं कदाचिदपि शाम्यति ॥८॥
हीनवर्णातु या नारी प्रमादात्प्रसवं व्रजेत् ।
प्रसवे मरणे तज्जन्माशौचं नोपशाम्यति ॥९॥
समानं स्वल्पशौचं तु प्रथमेन समापयेत् ।
असमानं द्वितीयेन धर्मराजवचो यथा ॥१०॥
देशान्तरगतः श्रुत्वा कुल्यानां मरणोद्भवौ ।
यच्छेषं दशरात्रस्य तावदेवाशुचि र्भवेत् ॥१२॥

अनौरसेषु पुत्रेषु भार्यास्वन्यंगतासु च ।
परपूर्वासु च स्त्रीषु त्र्यहाच्छुद्धिरिहेष्यते ॥१३॥
मातामहे व्यतीते तु आचार्ये च तथा मृते ।
गृहे दत्तासु कन्यासु मृतासु तु त्र्यहस्तथा ॥१४॥
निवासराजनिर्गत्ते जाते दौहित्रके गृहे ।
आचार्यपत्नीपुत्रेषु प्रेतेषु दिवसे न च ॥१५॥
मातुले पक्षिणी रात्रि शिष्यर्त्विग्बान्धवेषु च ।
सब्रह्मचारिण्येकाहननूढाये तथा मृते ॥ १६ ॥
एकरात्रं त्रिरात्रं च षड्रात्रं मासमेव च ।
शूद्रे सपिण्डे वर्णानामशौचं क्रमशः स्मृतम् ॥१७॥
त्रिरात्रमेव षड्रात्रं पक्षं मासं तथैव च ।
वैश्यसपिण्डे वर्णानामाशौचं क्रमशः स्मृतम् ॥१८॥
सपिण्डे क्षत्रिये शुद्धिः षड्रात्रं ब्राह्मणस्य तु ।
वर्णानां परिशिष्टानां द्वादशाहं विनिर्दिशेत् ॥१९॥
सपिण्डे ब्राह्मणे वर्णाः सर्वेऽवा विशेषतः ।
दशरात्रेण शुद्ध्येयु रित्याह भगवान्यमः ॥२०॥
भृग्वग्न्यनशनांभोभिर्मृतानामात्मघातिनाम् ।
पतितानां च नाशौचं शस्त्रविद्युद्धृताग्न्ये ॥२१॥
यतिव्रतिब्रह्मचारि नृपकाल्कदीक्षिताः ।
नाशौचभाजः कथिता दाताज्ञाकारिणश्च ये ॥२२॥
यस्तु भुङ्क्ते पराशौचे वर्णीसोऽप्यशुचिर्भवेत् ।
अशौचशुद्धौ शुद्धिश्च तस्याप्युक्ता मनीषिभिः ॥२३॥
पराशौचे नरो भुक्त्वा कृमियोनौ प्रजायते ।
भुक्त्वान्नं म्रियते यस्य तस्य योनौ प्रजायते ॥२४॥
दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्तते ॥२५॥

---

१९ समाना शौचसंपाते—इतिपाठान्तरम्

अथ लिखित-स्मृतिः । (१०)

३५१ द्वादशैवदशाहे तु पक्षत्वं यदि गच्छति ।
सद्य एव विशुद्धयेत नाशौचं नोदकक्रिया ॥
शावसूतक उत्पन्ने सूतकन्तु यदा भवेत् ।
शवेन शुद्धयते सूतिः न सूतिः शवशोधिनी ॥
षष्ठेन शुद्धयेदेकाहं पञ्चमे त्र्यहमेव तु ।
चतुर्थे सप्तरात्रं स्यात्त्रिपुरुषे दशमेऽहनि ॥
मरणारब्धमाशौचं संयोगो यस्य नाग्निभिः ।
आदाहंतस्य विज्ञेयं यस्य चैतानिको विधिः ॥

अथ अत्रि-स्मृतिः । (१२)

३५२ अतः परं प्रवक्ष्यामि सूतकस्य विनिर्णयम् ।
प्रायश्चित्तं पुनश्चैव कथयिष्याम्यतः परम् ॥ १ ॥
एकाहात् शुद्धयते विप्रोऽग्निवेद समन्वितः ।
त्र्यहादकेवलवेदस्तु निर्गुणो दशभिर्दिनैः ॥२॥
व्रतिनः शास्त्रपूतस्य आहिताग्नेस्तथैव च ।
राज्ञां तु सूतकं नास्ति यस्य चेच्छन्ति ब्राह्मणाः ॥३॥
ब्राह्मणो दशरात्रेण द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रोमासेन शुद्धयति ॥ ४ ॥
सपिण्डानां तु सर्वेषां गोत्रजः सप्तपौरुषः ।
पिण्डाश्चोदकदानं च शावशौचं तथानुगम् ॥ ५ ॥
चतुर्थे दशरात्रं स्यात् षड्हः पंचमे तथा ।
षष्ठे चैव त्रिरात्रं स्यात् सप्तमे त्र्यहमेव वा ॥ ६ ॥
मृतसूतके तु दासीनां पत्नीनां चानुलोमिनाम् ।
स्वामितुल्यं भवेच्छौचं मृतेभर्तरियोनिकम् ॥७॥
शवस्पृष्टं तृतीये तु सचैलं स्नानमाचरेत् ।
चतुर्थे सप्तभिर्वा स्यादेष शवविधिः स्मृतः ॥८॥
एकत्र संस्कृतानां तु मातृणामेकभोजनम् ।
स्वामितुल्यं भवेच्छौचं विभक्तानां पृथक् पृथक् ॥९॥

उष्ट्री क्षीरनवीक्षीरं पञ्चान्नं मृतसूतके ।
पाचक्षान्नं नवश्राद्धं भुक्त्वा चान्द्रायणं चरेत् ॥१०॥
सूतकान्नमधर्मेण यस्तुप्राश्नाति मानवः ।
त्रिरात्रमुपवासः स्यादेकरात्रं जलेवसेत् ॥ ११ ॥
महायज्ञविधानां तु न कुर्यान्मृतजन्मनि ।
होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा ॥१२॥
बालश्चैव दशाहे तु पंचत्वं यदि गच्छति ।
सद्य एव विशुद्धिः स्याच्च प्रेतं नैव सूतकम् ॥१३॥
कृतचूडे प्रकुर्वीत उदकं पिण्डमेव च ।
स्वधाकारं प्रकुर्वीत नामोच्चारणमेव च ॥ १४ ॥
ब्रह्मचारी यतिश्चैव मन्त्रे पूर्वकृते तथा ।
यज्ञे विवाहे काले च सद्यः शौचं विधीयते ॥१५॥
विवाहोत्सवयज्ञेषु अन्तरामृतसूतके ।
पूर्वसंकल्पितार्थस्य न दोषश्चान्त्रिरब्रवीत् ॥ १६ ॥
मृतसंजननोर्ध्वं तु सूतकादौ विधीयते ।
स्पर्शनाचमनाच्छुद्धिः सूतिकाञ्चेन्न संस्पृशेत् ॥१७॥
पञ्चमेऽहनि विज्ञेयं स्पर्शनं क्षत्रियस्य तु ।
सप्तमेऽहनि वैश्यस्य विज्ञेयं स्पर्शनं बुधैः ॥१८॥
दशमेऽहनि शूद्रस्य कर्तव्यं स्पर्शनं बुधैः ।
मासेनैवात्मशुद्धिः स्यात् सूतके मृतके तथा ॥१९॥
व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा ।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ॥२०॥
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः ।
श्राद्धत्यागविहीनस्य मासान्तं सूतकं भवेत् ॥२१॥

अथ यमस्मृतिः (। १४)

सूतके तु समुत्पन्ने द्वितीये समुपस्थिते ।
द्वितीये नास्ति दोषस्तु प्रथमेनैव शुद्धयति ॥१॥

जातेन शुद्धयते जातं मृतेन मृतकं तथा ।
गर्भसंस्रवणे मासे त्रीण्यहानि विनिर्दिशेत् ॥२॥
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्धयति ।
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ॥३॥
अनूढा न पृथक् कन्या पितृगोत्रेषु सूतके ।
पाणिग्रहणमन्त्रेभ्यः स्वगोत्रात् भ्रश्यते ततः ॥४॥
येन येन तु वर्णेन या कन्या परिणीयते ।
तत्सूतकं सूतकं याति तथा पित्रुदकेऽपि च ॥५॥
विवाहे चैव संवृत्ते चतुर्थेऽहनि रात्रिषु ।
एकत्वं सा व्रजेत् भर्तुः पिण्डे गोत्रे च सूतके ॥६॥
प्रथमेऽहनि द्वितीये वा तृतीये वा चतुर्थके ।
अस्थिसंचयनं कार्यं बन्धुभिर्हितबुद्धिभिः ॥७॥
चतुर्थे पञ्चमे चैव सप्तमे नवमे तथा ।
अस्थिसंचयनं प्रोक्तं वर्णानामनु पूर्वशः ॥ ८॥
दैवेभये समुत्पन्ने प्रधानाङ्गे विनाशिते ।
पूर्वसंकल्पिते चार्थे तस्मिन्नाशौचमिष्यते ॥९॥ (कन्यासार समुच्चये)

अथ संवर्त-स्मृतिः (१५)

३५४ विप्रोदशाहमाशौच दानाध्ययन वर्जितः ।
क्षत्रियो द्वादशाहानि वैश्यः पञ्चदशैव तु ॥१॥
शूद्रः शुद्धयति मासेन संवर्तवचनं तथा ।
प्रेतायान्नं जलं देयं स्नात्वा तद्गोत्रजैः सह ॥२॥
प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा ।
चतुर्थेऽहनि कर्तव्यमस्थि संचयनं द्विजैः ॥३॥
ततः संचयनादूर्ध्वमंगस्पर्शो विधीयते ।
चतुर्थेऽहनि विप्रस्य षष्ठे वै क्षत्रियस्य च ॥४॥
अष्टमे दशमे चैव स्पर्शःस्याद् वैश्य शूद्रयोः ।
जातस्यापि विधिर्दृष्ट एष एव महर्षिभिः ॥५॥

दशरात्रेण शुद्ध्येत विप्रोवेदविवर्जितः ।
जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ॥६॥
माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः ।
होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा ॥७॥
पंचयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोः ।
दशाहात्तु परं सम्यग्विप्रोऽधीयीत धर्मवित् ॥८॥

अथ लघ्वत्रि स्मृतिः (११)

३५५ सूतके मृतके चैव मृतान्ते च प्रसूतिके ।
तस्नात्तु संगताशौचे मृताशौचेन शुद्ध्यति ॥
सूतकाद्द्विगुणं शावं शावाद्द्विगुणमार्तवम् ।
आर्तवाद्द्विगुणा सूति रतत्तोऽपिशवदाहकः ॥
अनुगच्छेद्यथा प्रेतंज्ञातिमज्ञाति मेववा ।

अथ वृद्धात्रि-स्मृतिः (१२)

३५६ शावे शवगृहं गत्वा श्मशाने वान्तरेऽपि वा ।
आतुरं व्यंजनं कृत्वा दूरस्थोऽप्यशुचिर्भवेत् ॥
अतिक्रान्ते दशाहेतु त्रिरात्रमशुचि र्भवेत् ।
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति ॥
अशुद्धस्वयमप्यन्यानशुद्धांस्तु यदि स्पृशेत् ।
स शुद्ध्यत्युपवासेन भुङ्क्ते कृछ्रेण सद्विजः ॥
सूतकं सूतके स्पृष्ट्वा स्नानं शावे च सूतके ।
भुक्त्वा पीत्वा तदज्ञानादुपवासोऽयहं भवेत् ।
मृण्मयानां च पात्राणां दाहे शुद्धिर्विधीयते ॥
स्नानादिषु प्रयुक्तानां त्याग एव विधीयते ।
सूतके मृतके चैव सूतके च प्रसूतके ।
तस्मात्तु संहताशौचे मृताशौचेन शुद्ध्यति ।
सूतकाद्द्विगुणं शावं शावाद्द्विगुणमार्तवम् ।
आर्तवाद्द्विगुणं सूतिस्ततोऽधिशवदाहकः ।

अगुणस्पैकशया प्रेतमज्ञातो बन्धुमेवच ।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्धयति ॥
रात्रिं कुर्यात् त्रिभागंतु द्वौ भागौ पूर्व एव वा ।
उत्तरांशप्रभातेन युज्यते ऋतुसूतके ॥

अथांगिरसः स्मृतिः (१८)

३५७ दशाहाच्छुद्धयते विप्रो द्वादशाहेन भूमिपः
पाक्षिकं वैश्य एवाह शूद्रो मासेन शुद्धयति ॥

अथ आपस्तम्ब स्मृतिः (१९)

३५८ विवाहोत्सवयज्ञेषु अन्तरामृतिसूतके ।
सद्यः शुद्धिं विजानीयात् पूर्वं संकल्पितं चरेत् ॥
देवद्रोणयां विवाहेषु यज्ञेषु प्रतेषु च ।
कल्पितं सिद्ध मन्नाद्यं नाशौचं मृतसूतके ॥

अथ विष्णु स्मृतिः (२०)

३५९ ब्राह्मणस्य सपिण्डानां जननमरणयो र्दशाहमाशौचम् । द्वादशाहं राजन्यस्य । पञ्चदशाहं वैश्यस्य । मासंशूद्रस्य । सपिण्डतातु पुरुषे समसे विनिवर्तते । अशौचे होमदानप्रतिग्रहस्वाध्याया निवर्तन्ते । नाशौचे कस्यचिदन्नमश्नीयात् । ब्राह्मणदीनामशौचेयःसकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषाम् । अशौचापगमेप्रायश्चित्तं कुर्यात् । सवर्णस्याशौचे द्विजो भुक्त्वा स्रवन्तीमासाद्य तस्मिन्नग्नस्त्री ऋषमर्षेणं जप्त्वोत्तीर्य गायत्र्यष्टसहस्रं जपेत् । क्षत्रियाशौचे ब्राह्मणस्त्वेतदेवोपोषितः कृत्वा शुद्धयति । वैश्याशौचे राजन्यश्च । वैश्याशौचे ब्राह्मण स्त्रीरात्रोषितश्च । ब्राह्मणाशौचे क्षत्रियः क्षत्रियाशौचे वैश्यः स्रवंतीमासाद्य गायत्रीशतपञ्चकं जपेत् । वैश्यश्च ब्राह्मणाशौचे गायत्र्यष्टशतं जपेत् । शूद्रशौचे द्विजो भुक्त्वा प्राजापत्यव्रतञ्चरेत् । शूद्रश्च द्विजाशौचे

स्नानमाचरेत् । शूद्रः शूद्राशौचे स्नातः षडवगद्यं पिबेत् । पत्नीनां दासानामानु लोम्येन स्वामिन स्तुल्य मशौचम् । मृते स्वामिन्यात्मीयम् । हीनवर्णानामधिकवर्णेषु तस्य गमे शुद्धिः । ब्राह्मणस्य क्षत्रविट् शूद्रे षुषड्रात्रत्रिरात्रैकरात्रैः । क्षत्रियस्य विट शूद्रयो षड्रात्रत्रिरात्राभ्याम्। वैश्यस्य शूद्रेषु षड्रात्रेण । मासतुल्यै रहोरात्रैर्गर्भस्रावे । जात मृते मृत जाते वा कुलस्य सद्यः शौचम् । अदन्तजाते बाले प्रेते सद्य एव । नास्याग्निसंस्कारो नोदकक्रिया । दन्तजाते त्वकृतचूडे त्वहोरात्रेण । कृतचूडे त्वसंस्कृते त्रिरात्रेण । ततः परं यथोक्तकालेन । स्त्रीणां विवाहः संस्कारः । संसकृतासु स्त्रीषु नाशौचं भवति पितृपक्षे । तत् प्रसव मरणे चेत् पितृगृहे स्यातां तदैकरात्रं त्रिरात्रंच । जननाशौचमध्ये पक्ष परं जननाशौचं स्यात्तदा पूर्वाशौचव्यपगमे शुद्धिः । रात्रिशेष दिनद्वयेन । प्रभाते दिनत्रयेण मरणाशौच मध्ये (ज्ञातिमरणे) प्येवम् । श्रुत्वादेशान्तरस्थजननमरणे शेषेण शुद्धयेत् । व्यतीते सम्वत्सरान्तस्त्वेकरात्रेण । ततःपरं स्नानेन । आचार्य्यमातामहे च व्यतीते त्रिरात्रेण ॥ अनौरसेषु पुत्रेषु जातेषु च मृतेषु च । पर पूर्वासु भार्य्यासु प्रसूतासु मृतासु च । आचार्य्य पत्नी पुत्रो पाध्याय मातुल श्वशुर श्वसुर्य्य सहाध्यायि शिष्येष्वतीतेष्वेकरात्रेण । स्वदेश राजनि च । असपिण्डे स्ववेश्मनि मृते च । भृग्वग्न्यनाशकाम्बुसंग्राम विद्यु न्नृपहतानां नाशौचम् । न राज्ञो राजकर्मणि । न व्रतिनां व्रते न सत्रिणां सत्रे । न कारूणां स्वकर्मणि । राजाज्ञाकारिणां तदिच्छया । न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोः । न देशविप्लवे । आपद्यपि च कष्टायाम् । आत्मत्यागिनः पतिताश्च नाशौचोदकभाजः । पतितस्य दासी मृतेऽग्नि पादाभ्यां घटमपवर्जयेत् । उद्बन्धमृतस्यथः पाशं च्छिन्द्यात् स तस्य कृच्छ्रेण शुद्धयति । आत्मघातिनां संस्कर्ता च । तदश्रुपातकारी च । सर्वस्यैव प्रेतस्य बान्धवैः सहाश्रुपातं कृत्वास्नानेन । अकृते त्वस्थि संचये सचैलस्नानेन । द्विजः शूद्रप्रेतानुगमनं कृत्वा स्रवन्ती मासाद्य । तन्निमग्नस्त्री रघमर्षणं जप्त्वोत्तीर्य गायत्र्यष्ट सहस्रं जपेत् । द्विज प्रेतस्याष्ट शतम् । शूद्र प्रेतानु गमनं कृत्वा स्नान माचरेत् । चिता धूम सेवने सर्व्वे वर्णाः स्नान माचरेयुः ।

शवस्पर्शं च स्पृष्ट्वा पञ्चनखजलं तदस्थि च स्नेहञ्च ।
गुरोः प्रेतस्यशिष्यस्तु पितृमेधं समाचरेत् । प्रेताहारि समं तत्र दशरात्रेण शुद्ध्यति ॥ आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम् । निर्हृत्यतु व्रतीप्रेताश्च व्रतेन वियुज्यते ॥ आदिष्टोनोदकं कुर्यादाव्रतस्य समापनात् । समाप्ते तूदकं कृत्वा त्रिरात्रेण विशुद्ध्यति ॥ स्नानं तपोऽग्निराहारीमृगमनोवाय्युं पाञ्चनम् । वायुः कर्माकंकालौ च शुद्धिकर्तृणिदेहिनाम् ॥

अथ औशनस स्मृतिः । (१७)

३६० दशाहं प्राहुरार्षेयं सपिण्डेषु विपश्चितः । मृतेऽग्न्याधानजातेषु ब्राह्मणानां द्विजोत्तमाः ॥ नित्यानि चैव कर्माणि काम्यानि च विशेषतः । न कुर्यादहितं किञ्चित् स्वाध्यायं मनसापि च ॥ शुचिरक्रोधन स्तवन्यान् कालेग्नौ भोजयेद्द्विजान् । शुष्कान्नेन फलैर्वापि पितरं जुहुयात्तथा ॥ न स्पृशेयुरिमानन्ये न भूतेभ्यः समाचरेत् । सूतके तु सपिण्डानां संस्पर्शोनैव दुष्यति ॥ सूतके सूतकाश्चैव दर्भपित्वा तृणंपुनः । अधीयान स्तया यज्ञा-वेदविच्चापियो भवेत् ॥ चतुर्थे पञ्चमे चाह्नि संस्पर्शे कथितो बुधैः । स्पृश्यास्तु सर्वएवैते स्नानात्तु दशमेऽहनि ॥ दशाहं निर्गुणं प्रोक्तमशौचन्दास निर्गुणे । एवं द्विगुणेयुक्तं चतुश्चैकदिने शुचिः ॥ दशाहात्तु परं सम्यगधीयीत जुहोसि च । चतुर्थे त्वस्य संस्पर्शोमनुराह प्रजापतिः ॥ क्रियाहीनस्य मूर्खस्य महारोगिण एवच । येषां मरणस्याहुर्मरणान्तमशौचकम् ॥ त्रिरात्रं दशरात्रं वा ब्राह्मणानामशौचकम् । प्राक् संस्कारात्त्रिरात्रं स्याद्दशरात्रमतः परम् ॥ अदन्तजातमरणे मातपित्रोतस्तदिष्यते । जातदन्ते त्रिरात्रं स्यादन्तः स्यात्यत्र निर्णयः ॥ जन्मद्विवर्षगेप्रेते मातापित्रो स्तदिष्यते । त्रिरात्रेण शुचिस्त्वन्यो यश्च हात्यन्त्य निर्गुणः ॥ आदन्तजन्मनः सद्यआचौलादेक रात्रकम् । त्रिरात्रमुपनयनाद्दशरात्रमुदाहृतम् ॥ जातमात्रस्य बालस्य यदिस्यान्मरणं पितुः । मातुश्चसूतकादि स्यात् पितास्य स्पृश्य एवहि । सद्यः शौचं सपिण्डानां कर्तव्यं सोदरस्य तु । उर्ध्वंदशाहादेकाहः सोदरो यदि निर्गुणः ॥ अथोर्ध्वं दन्तजन्मस्यात् सपिण्डानामशौचकम् । एकरात्रं निर्गुणा नां चौलादूर्द्धं त्रिरात्रकम् ॥ आदन्तजातमरणं सम्भवेद्यदि सत्तमा ।

एकरात्रम् सपिण्डानां यदिचारयन्तनिर्गुणाः ॥ व्रतादेशात्सपिण्डानां गर्भस्रावश्च पातनः । गर्भच्युता वहो रात्रं सपिण्डेऽत्यन्तनिर्गुणे ॥ यथेष्टाचरणाद्ज्ञातौ त्रिरात्रादिति निर्णयः । सूतके यदिसूतिश्च मरणेवा गतिर्भवेत् ॥ शेषेणैव भवेच्छुद्धिरहःशेषे द्विरात्रकम् । मरणोत्पत्तियोगे तु मरणेन समाप्यते । अर्द्धवृत्तिमनाशौचमूर्ध्वमन्येन शुद्धयति । देशान्तर गतः श्रुत्वा सूतकं शाव एव वा ॥ तावद्अप्रयतोऽन्येवा यावच्छेषं समाप्यते। अतीते सूतके प्रोक्तं सपिण्डानां त्रिरात्रकम् ॥ तथैव मरणे स्नानमूर्द्धंसंवत्सराद्व्रती । वेदांश्चयस्तवधीयानो नभवेत्वृत्तिकर्षितः ॥ सद्यः शौचं भवेत्तस्य सर्वावस्थासु सर्वदा । स्त्रीणामसंस्कृतानां तु प्रदानात्परतः पितुः ॥ सपिण्डानां त्रिरात्रं स्यात् संस्कारो भर्तुरेव च । अहस्तदत्तकन्यानामशौचं मरणे स्मृतम् ॥ द्विवर्षंजन्ममरणे सद्यः शौचमुदाहृदम् । आदन्तात् सौदरः कल्पः आलोचादेकरात्रकम् ॥ आवृत्तानां त्रिरात्रं स्याद्दशर्मन्तु ततः परम् । मातामहानां मरणे त्रिरात्रं स्यादशौचकम् ॥ एकोदराणां विज्ञेयं सूतके चैतदेवहि । पत्निणी यौनसम्बन्धे वान्धवेषु तथैव च ॥ एकरात्रं समुद्दिष्टं गुरौ सब्रह्मचारिणि । प्रेतेराजनि सप्तस्तु यस्यस्याद्विषयेस्थितिः ॥ गृहेमातासु दत्तासु कन्यकासु त्यहं पितुः । परपूर्वासुभार्यासु पुत्रेषु कुलजेषु च ॥ त्रिरात्रंस्यात्तथाचार्ये भार्यासु प्रत्यगासु च । आचार्यपुत्रपत्न्योश्च त्यहोरात्रमुदाहृतम् ॥ एकरात्रमुपाध्याये तथैव श्रोत्रियेषु च । एकरात्रं सपिण्डेषु स्वगृहे संस्थितेषु च ॥ त्रिरात्रं श्वश्रूमरणे श्वसुरेण तथैव च । सद्यः शौचं समुद्दिष्टं सगोत्रे संस्थिते सति ॥ शुद्धयेत् द्विजोदशाहेन द्वादशाहेन भूपतिः । वैश्यः पञ्चदशाहेन शुद्रोमासेन शुद्धयति ॥ क्षत्रविट् शूद्रदासा ये स्युर्विप्रसेवकाः । तेषामशेषं विप्रस्यदशाहात् शुद्धिरिष्यते ॥ राजन्यवैश्यावप्येवं हीनवर्णासुयोनिषु । षड्रात्रंवात्रिरात्रंवाप्येकरात्रंक्रमेणहि॥ वैश्य क्षत्रियविप्राणां शूद्रैश्चाशौचमेवतु । अर्द्धमासो य षड्रात्रं त्रिरात्रं द्विजपुङ्गवाः ॥ शूद्रक्षत्रियविप्राणां शूद्रेष्वशौचमिष्यते । षड्रात्रं द्वादशाहं च विप्राणां वैश्यशूद्रयोः ॥ आशौचं क्षत्रिये प्रोक्तं क्रमेणाद्विजपुङ्गवाः । शूद्रविट् क्षत्रियाणां तु ब्राह्मणे संस्थितेयदि ॥ दशरात्रेण शुद्धिःस्यादित्याह कमलोद्भवः ॥ असपिण्डं द्विजप्रेतं विप्रो निसृत्यबन्धुवत्॥ अश्नित्वा च सहोषित्वा

दशरात्रेण शुद्ध्यति । यदि निर्दहतिक्षिप्रं प्रलोभात्क्रान्तमानसः ॥ दशाहेन द्विजः शुद्ध्येत द्वादशाहेन भूमिपः । अर्द्धमासेन वैश्यस्तु शुद्रो मासेन शुद्ध्यति॥ षड्रात्रेणाथवा सप्तत्रिरात्रेणाथवा पुनः । अनाथं चैव निर्बन्धुं ब्राह्मणं धनवर्जितम् ॥ स्नात्वा संप्राश्यतुघृतं शुद्ध्यन्ति ब्राह्मणादयः । अपरश्चेत्परं वर्णमपरश्चापरोयदी ॥ एकरात्रंत्रिरात्रेशुद्धिर्वैश्ये तु स्यात्–हे सति । शूद्रेषु च दशं प्रोक्तं प्राणायामशतंपुनः ॥ अनस्थि संचिते शूद्रे रीति चेत् ब्राह्मणस्यकेः । त्रिरात्रं स्यात्तथाशौचमेकाहं क्षत्रवैश्ययोः॥ अन्यथा चैत सज्योति ब्राह्मणे स्नानमेव या । अनस्थि सञ्चिते विप्रे ब्राह्मणी रीति चत्तदा ॥ स्नानेनैव भवेच्छुद्धिः सद्यैलेन न संशयः । यस्तैः सहान्नं कुर्याच्च पानादीनि तु वैयक्ति ॥ ब्राह्मणी या परेवापि दशाहेन विशुद्ध्यति । यस्तेषामन्न मश्नाति सतु देवोपि कामतः॥ तदाशौच निवृत्तेषु स्नानं कृत्वा विशुद्ध्यति यायत्तदन्नमश्नाति दुर्भिक्षाभि हतोनरः ॥ तावन्त्यहान्यशुद्धिः स्यात् प्रायश्चित्तं ततश्चरेत् । दाहतशौचं कर्तव्यं द्विजानामग्निहोत्रिणां ॥ सपिण्डानांतु मरणे मरणादितरेषु च । सपिण्डता च पुरुषे सप्तमे विनिवर्तते ॥ समानोदक भावस्तु जन्मनाम्नोरवेदने । पिता पितामहश्चैव सपैव प्रपितामहः ॥ लेपभाजस्तु यश्चात्मा सापिण्ड्यं सप्तपौरुषम् । उद्धृतानां चैव सापिण्ड्यमाहदेवः प्रजापतिः ॥ येचेहजाता बहवोभिन्नयोनय एवच । भिन्नवर्णास्तु सापिण्ड्यं भवेत्तेषां त्रिपुरुषम् ॥ कारवः शिल्पिनो वैश्य दासी दासास्तथैव च । राजानो राजभृत्याश्चसद्यः शौचाः प्रकीर्तिताः ॥ दातारो नियमीचैव ब्रह्मविद्ब्रह्मचारिणौ। सत्रिणो व्रतिनस्तावत् सद्यःशौच मुदाहृतम् ॥ राजाचैवाभिषिक्तश्च प्राणसत्रिण एवच । यज्ञे विवाह काले च देवयागे तथैव च॥ सद्यः शौचं समाख्यातं दुर्भिक्षे वाप्युपद्रवे। विधा तुपहतानाञ्च विद्युता पार्थिवे द्विजैः ॥ सद्यः शौचं समाख्यातं सर्पादि मरणे पिच । अग्निमेरु प्रपतने विषो धान्य पराशने ॥ गो ब्राह्मणान्ते सन्न्यस्ते सद्यः शौचं विधीयते । नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणां ॥ नाशौचं विद्यते सद्भिः पतिते च तथा मृते ।

कात्यायन स्मृतिः (२०)

सूतके कर्मणांत्यागः संध्यादीनां विधीयते ।
होमः श्रौतेतुकर्तव्यः शुष्कान्नेनापिवाफलैः ॥
अकृतं हावयेत् स्मार्ते तद् भावे कृता कृतम् ।
कृतं वाहावयेत् अन्न मन्वारम्भ विधानतः ॥
कृत मोदनसत्वादि तण्डुलादि कृताकृतम् ।
व्रीह्यादि चाकृतंप्रोक्त मितिहव्यम् त्रिधाबुधैः ॥

सूतके च प्रवासेषु चाशक्तौ श्राद्ध भोजने । एवमादि निमित्तेषु हावये दिति योजयेत् । न त्यजेत्सूतके कर्म ब्रह्मचारी स्वकं क्वचित् न दीक्षणात्परं यज्ञे न कृच्छ्रादि तपश्चरन् । पितर्यपि मृते नैषां दोषो भवति कहिंचित् आशाचं कर्मणोऽन्ते स्याद्व्यहं वा ब्रह्मचारिणाम् ।

इति स्मृतिसंग्रहाधिकारः ।

अथ वचन संग्रहाधिकारे

नाना मुनि वचनानि । (२१)

३६२ देये पितृणां श्राद्धेवै श्राशौचं जायते यदि । श्राशौचे तु व्यतीते वै तेषां श्राद्धं प्रदीयते । (ऋष्य शृङ्गः) शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते ।सातिथिस्तत्र कर्तव्या न त्वयावै कदाचन । (श्रीदत्तः) प्रति संवत्सरं श्राद्धमाशौचोत्पतितं च यत् । मलमासेऽपि कर्तव्यमिति भागुरिरब्रवीत् । (उशोषिते) पित्रा दत्तातु याकन्या स्वातन्त्र्यादन्यमाश्रिता । यं यं श्रितवती भूयस्तस्याशौचं त्र्यहं त्र्यहम् । (स्मृतिः) मृतायां वा प्रसूतायां नान्येषामिति निश्चयः । कामदत्तयोनि श्चेदन्यं गत्वा व्यवस्थिता ॥ ,, तस्यान्यस्य सगोत्रा सा यं त्वा श्रितवती स्वयम् । ,,

गर्भस्रुत्याय यामासम चिरेतूत्तमे त्र्यहम् । राजन्येतु चतूरांत्रं वैश्ये पञ्चाहमेषतु । श्रष्टाहनतु शूद्रायाः शुद्धिरेषा प्रकीर्तिता । (मरीचिः) संध्यांयज्ञमहायज्ञान्नैत्यकं स्मृतिकर्मच । तन्मध्येहावयेत् तेषां दशाहान्ते पुनःक्रिया ॥१॥ निमन्त्रणंतु वा श्राद्धे प्रारम्भःस्यादिति स्मृतिः । मरणेमध्य

मांसे च पुष्पमूलफलेषु च । शाकक्काष्ठ तृणोष्वेवंदधिसर्पिःपयः सुच । तैलौषध्यजिनेचैव पक्वापक्वे स्वयंग्रहे । पुरयेषु चैवसर्वेपुनाशौचं मृत सूतके ॥ मरीचिः ।

पुराण वचनानि ।

३६३ आ जन्मनस्तु चूड़ान्तं यत्र कन्या विपद्यते । सद्यः शौचं भवेत् तत्र सर्व वर्णेषु नित्यशः ॥ ततो वाग्दानपर्य्यन्तं यावदेकाहमेवहि । अतः परं प्रविद्वानांत्रिरात्रमिति निश्चयः ॥ वाग्दानेतु कृते तत्र क्षेयं चो भयतस्त्र्यहम् । पितुर्वरस्य च ततो दत्तानां भर्तु रे वहि ॥ ब्रह्मपुराणे दत्तानारी पितुर्गेहे सूयते म्रियतेऽथवा । स्वमशौचं चरेत् सम्यक् पृथक् स्थाने व्यवस्थिता । तद्बन्धु वर्गस्त्वेकेन शुद्धेत जनकस्त्रिभिः ॥ ब्रह्मपु० षण्मासाभ्यन्तरं यावद्गर्भस्रावो भवेद्यदि तदामासैस्समैस्तासां दिवसैः शुद्धिरिष्यते । अतऊर्ध्वंस्वजात्युक्तमशौचंतासु विद्यते । सद्यःशौचं सपिण्डानां गर्भस्यपतनेसति । ब्राह्मपुराणे ॥ अनतीतद्विवर्षस्तुप्रेतोयत्रापि दह्यते अति मोहाभिभूतैश्च देश साधर्म्यमादरात् । आशौचं ब्राह्मणानांतु त्रिरात्रं तत्र विद्यते । राज्ञामेकादशाहंतु वैश्यानां द्वादशाहकम् । अपिविंशतिरात्रंतु शूद्राणां भवति क्रमात् ॥१॥

भिन्नगोत्राः पृथक् पिण्डाः पृथक् गोत्र करास्तथा ॥ सूतके मृतके चैव त्र्यहाशौचस्य भागिनः ।

गृहीतमधुपर्कस्य यजमानाच्चऋत्विजः । पश्चादशौचेपतिते न भवेदिति निश्चयः ।

आद्यभागद्वयंयावत् सूतकस्यतु सूतके । द्वितीयेपतिते चाद्यात् सूतकाच्छुद्धिरिष्यते । अतऊर्ध्वं द्वितीयात्तु सूतकान्नाच्छुचिः स्मृतः ।

३६४ यान्त्येतान्यार्षवचनानि प्रदर्शितानि तेषांमध्ये कतिपयानां तात्पर्यार्थविनिर्णये विद्वांसो विप्रवदन्ते । केचिदन्यथा तदर्थमन्यन्तेऽपरेन्यथा । एवंकेषांचिद्वचनानामार्षत्वमभिप्रेत्य प्रामाण्यमभ्युपगच्छन्ति तदनुसारेणैव व्यवस्थामातिष्ठन्ते ।

परेत्वनार्षत्वंतेषामभिप्रेत्यतान्यनादृत्यान्यथा व्यवस्थापयन्ति ॥१॥ एवंकेषांचित् वचनानामेके ग्रन्थकाराः स्वग्रन्थे स्थानंददतेऽपरेपुनः स्वग्रन्थे-तान्यपठित्वा तत्सत्वमेवास्वीकृत्ययथेच्छमन्यथा व्यवस्थापयन्ति । एभिरेवकारणैरत्राशौचं विषये प्रमाणव्यवस्थापकानां विदुषांपरस्पर विरुद्धतर्कैः प्रवर्तमानानां परस्पर विरोधे युक्तमयुक्तंवापश्यतां बहवो मतभे-दादृश्यन्ते । तत्रकिंसत्यमिति किमसत्यं निर्द्धारयिष्युन्त्युत्तरे विशिष्टा विद्वांसः —इत्यलम् ।

३६५ इतोन्येऽप्याशौचसम्बधिनो बहवो नियमा स्तत्रतत्र प्रकरणा-न्तरेषूल्लिखिता दृश्यन्ते । तथा विधानिचवचनान्य शभूयप्रस्तुतां स्त्वा-दिहपृथक्कृत्य नोपदर्श्यन्ते । तदुक्ता नियमास्तु पूर्वं मिह ग्रन्थे तत्रतत्र प्रकरणे प्रदर्शिता एवेति सुविमृश्य संतोष्टव्यम् ॥

३६६ अयं च ग्रन्थः प्रमाणभूतानां विधायकानामार्षवचनानां, तथा प्रामाणिकानां व्यवस्थापकानां निबन्धग्रन्थानां चाधारेण मया संपादितः। तत्रैतान्यार्षवचनानि प्रदर्शितानि ॥

३६७ सन्त्याशौच विनिर्णये बहुविधा, ग्रन्था बुधैर्निर्मिता
स्ते तर्कैर्जटिला न संप्रतिसुखेनार्थावबोधक्षमाः ॥
तत्सिद्धान्तसमुच्चयं, पृथगिवा कृष्टायसुस्पष्टयन् ।
तस्माच्छ्री मधुसूदनो व्यतनुताशौचे समीक्षामिमाम् ॥ १ ॥
शुद्धिर्वोऽप्यृषि देवसंपदिति वा संस्कारधर्मोद्विधा ।
तत्रैतां न विना विशुद्धिमपरो धर्मः क्वचित् सिध्यति ॥
शुद्धिः पञ्चविधाहिंसा निगदिता तासां तृतीयाधुना ।
सुख्यांतिं लभतां चिरं प्रचरतादाशौचशुद्धिर्भुवि ॥ २ ॥



३६७—एतद्ग्रन्थग्रन्थनाय ये ये निबन्धा अवलोकिताः, येषां वा व्यवस्थाधारेण विवेचितान्यत्राधिकरणानि, तेषां धर्मशास्त्रनिबन्धग्रन्थानां नामानि प्रदर्श्यन्ते—

१	शुद्धिविवेकः—	रुद्रधरोपाध्यायस्य
२	शुद्धिचन्द्रिका—	रघुपतिमिश्रस्य
३	शुद्धिदीपिका—	श्रीनिवासस्य
४	शुद्धिप्रदीपिका —	कृष्णदेवस्य
५	शुद्धिकारिका—	नारायणबन्धोपाध्यायस्य
६	शुद्धिकारिकावली—	मोहनचन्द्रस्य
७	शुद्धिकौमुदी—	गोविन्दानन्दस्य
८	शुद्धिमुक्तावली—	भीमस्य
९	शुद्धिरत्नम्—	मणिरामस्य १
१०	,,	दयाशङ्करस्य २
११	शुद्धिरत्नाङ्कुरः—	मथुरानाथ चक्रवर्तिनः
१२	शुद्धिदर्पणः—	अनन्तदैवयाज्ञिकस्य
१३	शुद्धिनिर्णयः—	उमापतेः
१४	शुद्धिनिबन्धः—	मुरारेः
१५	शुद्धिमयूखः—	नीलकण्ठस्य
१६	शुद्धिप्रकाशः—	भास्करभट्टस्य
१७	शुद्धिप्रदीपः—	केशवभट्टस्य
१८	शुद्धिसारः—	श्रीकान्तस्य
१९	शुद्धिसारः—	कृष्णदेवस्य
२०	शुद्धितत्त्वम्—	रघुनन्दनभट्टाचार्यस्य
२१	शुद्धितत्त्वम्—	गुरुप्रसादस्य
२२	शुद्धितत्त्वम्—	काशीरामवाचस्पतेः
२३	शुद्धितत्त्वार्णवः—	श्रीनाथस्य
२४	शुद्धिव्यवस्थासङ्क्षेपः—	गौड़चिन्तामणेः
२५	अघनिर्णयः— / आशौचशतकम्—	वेङ्कटनाथस्य
२६	आशौचशतकम्—	रामानुजदीक्षितस्य
२७	आशौचशतकम्—	नीलकण्ठस्य
२८	आशौचदशकम्—	वेङ्कटाचार्यस्य
२९	,, —	माधवानन्दस्य
३०	,, —	ज्ञानेश्वरस्य

३१			श्रीधरस्य
३२		—	हरिहरस्य
३३	आशौचप्रकाशः	-	चतुर्भुजभट्टाचार्यस्य
३४	आशौचचन्द्रिका	—	वेदाङ्कुरायस्य
३५	आशौचसङ्क्षेपः	—	मधुसूदनवाचस्पतेः
३६	आशौचादर्शः	—	सारसङ्ग्रहभागः
३७	आशौचतत्त्वम्	—	महादेवस्य
३८	,,	—	शिवसूरेः
३९	आशौचदीपिका	—	श्यामसुन्दरभट्टाचार्यस्य
४०	,,	—	विश्वेश्वरभट्टस्य
४१	आशौचनिर्णयः	—	भट्टोजिदीक्षितस्य
४२	,,	—	नागोजिभट्टस्य
४३	,,	—	वरदस्य श्रीनिवासारमजस्य
४४	,,	—	रघुनाथस्य
४५	,,	—	त्र्यम्बकस्य
४६	,,	—	सोमव्यासस्य
४७	,,	—	हरेः
४८	,,	—	गोपालन्यायपञ्चाननस्य
४९	,,	—	जीवदेवस्य
५०	,,	—	गोविन्दस्य
५१	आशौचनिर्णयषडशीतिः	—	कौशिकादित्यस्य
५२	द्वैतनिर्णयः	—	वाचस्पतिमिश्रस्य
५३	द्वैतपरिशिष्टः	—	केशवमिश्रस्य
५४	.....	—	श्रीदत्तोपाध्यायस्य
५५	स्मृत्यर्थनिर्णयः	—	गोकुलनाथोपाध्यायस्य
५६	नरसिंहप्रसादः	—	नरसिंहस्य
५७	कृत्यसारसमुच्चयः	—	अमृतनाथोपाध्यायस्य
५८	विधानपारिजातः	—	अनन्तभट्टस्य
५९	पराशरमाधवः	—	सायणमाधवस्य
६०	निर्णयसिन्धुः	—	कमलाकरभट्टस्य
६१	मिताक्षरा	—	विज्ञानेश्वरस्य
६२	चतुर्वर्गचिन्तामणिः	—	हेमाद्रिसूरेः